

नि:श्रेयसम्
संस्कृत-पत्रम्
३

# ॥ निःश्रेयसम् ॥

## संस्कृत–पत्रम्

३

संपादकः
मुनि सम्यग्दर्शनविजयः

प्रकाशनप्रतिष्ठानम् :
जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भठ्ठा, पालडी, अहमदाबाद फोन : (ओ) २६६० ५८६४



।। णमोत्थुणं समणस्सभगवओ महावीरस्स ।।
।। ॐ ह्रीं श्री शंखेश्वरपार्श्वनाथाय नमः ।।
।। पू.आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ।।
।।पू.मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुंज्जर-मुक्तिप्रभ-हेमभूषणसूरीभ्यो नमः।।

# निःश्रेयसम्

## संस्कृत-पत्रम्

## ३

निमित्तम्

जैनशासनज्योतिर्धर पू.आ.श्री

**विजय रामचन्द्रसूरीश्वराणां दीक्षाशताब्दी**

आशीर्वाद प्रदानम् :

सुविशालगच्छनायक पूज्यपादाचार्य प्रवर श्रीमद् **विजय पुण्यपालसूरीश्वराणाम्**
प्रवचनप्रभावक-पूज्यपादाचार्यप्रवर श्रीमद् **विजय मुक्तिप्रभसूरीश्वराणाम्**
वात्सल्यवारिधि-पूज्यपादपंन्यास प्रवर **श्रीमद् वज्रसेनविजयगणिवराणाम्**

प्रेरणादानम् :

प्रसिद्ध प्रवचनकार-गुरुदेव-पूज्यपादाचार्यप्रवर श्रीमद् **विजय श्रेयांसप्रभसूरीश्वराणाम्**
प्रवचनकुशल-पूज्यपादाचार्य प्रवर श्रीमद् **विजय हेमप्रभसूरीश्वराणाम्**

प्रकाशनम् :

वैक्रमीय २०७०, पोषशुक्ला त्रयोदशी,

सोमवार, दि.१३-१-२०१४

प्रतयः ७५०  मूल्यम् : १७५

# प्रकाशकस्य हृदयोद्गारः

अये! सहृदया:! महानुभावा:! विद्वद्वरेण्या:!

प्रणामपूर्वकं निवेद्यते यद् ''नि:श्रेयसपत्रं प्रकाशयद्भिरस्माभिरति महासाहसं कृतमस्ति'' श्रीमतामर्हतां सद्गुरुवराणाञ्च परमकृपयैव यत्किञ्चित्साफल्यमनुभवामहे तत्रभवतां भवतां श्रीमतां विदुषां परमसाहाय्येन च। सूरिसार्वभौमपरमगुरुदेवजैनाचार्यप्रवर–श्रीमद् विजय रामचन्द्रसूरीश्वराणां दीक्षाशताब्दीं निमित्तीकृत्य तेषां परमोपकारवर्षाञ्च स्मृत्वैतत्सत्कार्यं प्रारब्धमस्ति तन्निर्वाहयितुं नाऽस्माकं तादृशी शक्तिस्तथाऽपि शनै:. शनै: प्रगतिपथं गच्छन्तस्तृतीयोऽङ्क: भवतां करकमले स्थापयाम: । ''गच्छत: स्खलना क्वाऽपि भवति महतामपि'' इत्युक्तिं स्मरणगोचरीकृत्याप्यस्माकं प्रमादाऽनुभवाल्पत्वमज्ञत्वञ्चाऽपि न विस्मरामस्तथापि प्रयत्नसाध्यं सत्कार्यं भवतां मार्गदर्शन–साहाय्येन च निश्चितं सुपथं प्राप्स्यति इत्याशास्महे।

सं.: २०७०
पोष शुक्ला-पञ्चमी,
रविवार, दि.५-१-२०१४

-श्रीविजयहीरसूरीश्वरश्रुतज्ञानभवनम्
मुख्यसञ्चालक: दिनेश जैन:
अहमदाबाद (गूर्जरदेश:)

# -संपादकीयम्

## अमूल्यं संस्कृतं धनम्।

ऐन्द्राच्यं भगवद्वचनमेव भव्योद्धरणाय समर्थमस्ति। ततो भगवद्-वचनमेवोपास्यम्।

भगवद्वचनं तु आत्मदर्शिभिः प्राचीनैः महर्षिभिः मुख्यत्वेन संस्कृत-प्राकृतभाषयोरेव बहुविधं बहुप्रमाणम् व्यावर्णितम्।

तैश्चारित्रपूतात्मभि भर्गवद्वचनं सात्मीभावं कृतं ततस्तेषां वचनमपि भगवद्वचनमिवाराध्यम् सततं सेव्यञ्च। यत स्तेनैव तत्त्वार्थप्रबोधो जायते तेन संस्कृतप्राकृतभाषाभ्यां निबद्धाः पूर्वर्षिरचितग्रन्थाः, तद्गतपदार्थाश्च सौख्यप्राप्तौ सरलोपायभूताः। सर्वे जीवाः सौख्यमिच्छन्ति किंतु तत्पार्श्वे तदुपायो नास्ति।

जडवादेन जडीभूते भौतिकविज्ञानप्रधानेऽस्मिन् काले प्रायः बहुलतया प्राणिनः दुःखोपाये कार्ये सुखं-सुखोपायञ्च मत्वा प्रवर्त्तन्ते आत्मा-पुण्य-पाप-परलोकपरमात्मादयः पदार्थास्तु प्रायः कुत्राऽपि न श्रूयन्ते। एतत्पदार्थास्तु अरोचकाः सर्वेभ्योऽभवन्। तत्र सुखोपायप्रदर्शकाः प्राचीनमहर्षिग्रन्था एव तरणोपायीभूताः। तैरेव जीवा आत्मा-पुण्य-पापादिविज्ञानं जानन्ति स्वीकुर्वन्ति च। ततो "पापोदयाल्लब्धं दुःखं मत्कर्मणैव प्राप्तं-पुण्योदयलब्धे सुखे च धर्म एव कारणं" इति मन्यन्ते। एवं कर्मपारतन्त्र्यं विज्ञाय संतोष-समाधिसुखं हस्तगतं कुर्वन्ति। स्वाधीनां स्वात्मसुख-समृद्धिश्च लभन्ते।

भौतिकवादप्रधानेऽस्मिन् युगे एतत्सर्वं बहुजनानां ''पुरातनं, अनर्थकं, मिथ्या'' च प्रतिभाति। पश्चिमविदेशवर्त्तीनाम् आङ्ग्ल्यादिभाषाणां प्रभावः सर्वत्र व्यापकत्वात् मातृभाषापि सर्वे विस्मर्त्तुं लग्नास्तत्र संस्कृतभाषायास्तु का कथा? संस्कृतभाषाप्रीतिः, संस्कृतभाषाप्रसारश्चास्य पत्रस्य लक्ष्यम्। यतः संस्कृतभाषाप्रीति-प्रसाराभ्यां जनाः विनय-विवेक-मर्यादादिप्रभूत-गुणप्राप्तिं सरलतया लप्स्यन्ते। संस्कृतभाषया विद्वत्ताऽपि स्वाधीना।

यो लघुवयसि संस्कृतज्ञो भवति स शीघ्रमेव शास्त्रकोविदो भवति। प्रायः सर्वेऽपि आद्यशङ्कराचार्यस्य कथां जानन्ति-तथाहि

एकदा पञ्चमे वर्षे नगरदर्शनं कृत्वा नगरबहिः धूल्यां नगरस्य चित्रं विलिख्य स क्रीडन् तिष्ठति तदा तन्नगरनृपस्तेन मार्गेणैव निर्गतः। स्वलिखितां नगरीं भङ्क्त्वा गच्छते नृपायोक्तं तेन, किं कृतं भवद्भिः मत्कृता नगरी विनाशिता? नृपेणोक्तं त्वं बालोऽसि मया तव पुरी कथं नाशिता? तदा तेन बालेनोक्तं

''अये राजन्नाहं बालः, न मे बाला सरस्वती।
अपूर्णे पञ्चमे वर्षे, वर्णयामि जगत्त्रयम्।।

एतच्छ्रुत्वा नृपः सविस्मयोऽभवत् तस्य संस्कृतभाषाश्रवणेन प्रतिभया च। तात्पर्यमेतदेव यत् संस्कृतभाषा-विद्वज्जनचित्तचमत्कारकारिणी। किन्तु ऐदंयुगीनानां तस्यां न स्वारस्यम्!

यतः संस्कृतभाषां विज्ञाय जनः शास्त्रस्वाध्यायेन सदात्मजागरुकतां प्राप्नोति तया च, कर्मकाष्ठकर्त्तने कुठारवत् प्रभवति, आत्मनि प्रभुं प्रति परां प्रीतिं प्रकटयति, निर्दलयति दुष्टमनोभावं, प्रसरति स्वहृदये सद्भावस्रोतः, भिनत्ति क्रोधादिकषायभावगिरिशिखराणि क्षमादिवज्रेण, विश्वैकश्रेयस्करं स्वस्वभावं परिपोषयति, दुष्टदोषजालञ्च शोषयति। हिंसाऽसत्याऽदत्त-मैथुन-परिग्रहादिपातकलुण्टाकान् विनाशयति। पुनः पुनः सिञ्चति सत्यादि-धर्मारामं यतः चिरन्तनाचार्यैः प्रोक्तम् यत्-

तथा चिन्त्यं तथा वाच्यं, चेष्टितव्यं तथा तथा।
मलीमसं मनोऽत्यर्थं, यथा निर्मलतां व्रजेत्।।

मनोवैशद्यार्थं संस्कृतभाषा प्रधानं सहकारीकारणं यतस्तज्ज्ञानेनजनो भगवद्वचनं लीलयाऽवबुध्यते-भगवद्वचनज्ञानेन नवनवोन्मेषशालिनी प्रज्ञा प्रोल्लसति, यथावस्थिततत्त्वावबोधश्च जायते तदेव सम्यग्ज्ञानम्-

यदाहुः कलिकालसर्वज्ञ-श्रीहेमचन्द्रसूरिभगवन्तः स्वरचित-योगशास्त्रे

यथावस्थिततत्वानां, संक्षेपाद् विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः ।।

एतावतैव न पर्याप्तं किन्तु तज्ज्ञानं मुहुर्मुहुः पठनेनाऽवगाहनेन च प्रवर्धते तस्य श्रुतचिन्ताभावनात्मक-भेदत्रयं चतुश्चत्वारिंशदधिकचतुर्दशशत-(१४४४) ग्रन्थरत्न प्रणेतृभि श्रींहरिभद्रसूरिभिः स्वषोडशकगन्थस्य एकादशमे षोडशके प्रोक्तम्

ऊहादि रहितमाद्यं, तद्युक्तं मध्यमं भवेज्ज्ञानम् ।
चरमं हितकरणफलं विपर्ययतो मोहतोऽन्य इति ।।१।।

**श्रुतज्ञानस्वरुपम् -**

वाक्यार्थमात्रविषयं, कोष्ठकगतबीजसन्निभं ज्ञानम्।
श्रुतमयमिह विज्ञेयं, मिथ्याभिनिवेशरहितमऽलम्। ।।२।।

**चिन्ताज्ञानस्वरुपम् -**

यत्तुमहावाक्यार्थजमतिसूक्ष्म-सुयुक्तिचिन्तयोपेतम्।
उदक इव तैलबिन्दु र्विसर्पि-चिन्तामयं स्यात् ।।३।।

**भावनाज्ञानस्वरुपम् -**

ऐदम्पर्ययगतं यद् विध्यादौ यत्नवत्तथैवोच्चैः ।
एतत्तु भावनामयं शुद्धं सद्रत्नदीप्तिसमम् ।।४।।

**पुनःपीण्डीभूतज्ञानत्रयस्वरुपम् -**

आद्य इह मनाक् पुंसस्तद्रागाद् दर्शनग्रहो भवति।
न भवत्यसौ द्वितीये, चिन्तायोगात् कदाचिदपि ।।५।।
चारिचरकसञ्जीवन्यचरकचारणविधानतश्चरमे।
सर्वत्र हिता प्रवृत्ति-र्गाम्भीर्यात् समरसापत्त्या ।।६।।

तेनैव गीर्वाणभाषाऽपराऽभिधाना संस्कृतभाषा अतिगौरवार्हा! अपिच संस्कृतशब्दस्य व्युत्पत्तिरपि साध्वी भवति-सम्यक् संस्कारो येन कृतो भवति तत्संस्कृतम्-सम्यग्ज्ञानं येन कृतं भवति तत्संस्कृतम्-यस्मिन् सति सुसंस्कृतं जीवनं स्यात् तत् संस्कृतमित्येवमनेकप्रकारेण संस्कृतभाषा गुणकारिणी, प्रभावशालिनी च।

ऐदंयुगीनास्तु प्रायशः धनलिप्सव एव दृश्यन्ते, किन्तु स्वभाषा-संस्कृतभाषा- रक्षणमेव तात्त्विकं धनमिति नैव मन्यन्ते।

भाषारक्षणेन मर्यादारक्षा, मर्यादारक्षणेन सदाचाररक्षा, सदाचाररक्षणेन शुद्ध-सात्विकजीवनपद्धत्याः रक्षा, तस्या रक्षणे मानवतारक्षणं, मानवतारक्षणे धर्मरक्षा, धर्मरक्षया पाप्मनां पापानाश्च प्रध्वंसो भवति तेन च निःश्रेयससुखं संभवति। एवं तात्त्विकं धनं वैभवो न, किन्तु संस्कृतभाषैव इति विद्वांसो वदन्ति।

धनमेव सर्वस्वं मन्वानान्, धनलिप्सून् ऐदंयुगीनान् प्रति व्यङ्ग्यात्मिका एका कथा सुष्ठुतरबोधप्रदात्री भविष्यति इति मत्वाऽत्र प्रस्तूयते।

एकत्र वने एकदा वनराजेन निमंत्रणपत्रेण वन्यप्राणिनां सभाऽऽयोजिता। निमन्त्रिताः सर्वे प्राणिनो निश्चितसमये निश्चितस्थले च समागताः। सिंहमहाराजाऽऽगमनानन्तरं भ्रूविक्षेपेण तेनादिष्टः वृकमन्त्रीश्वरः समुत्थितः। स्वहस्तमुत्थाप्य परस्परवार्ताजनित-कोलाहलं निराकृत्य सभा-निरवीकृता। तेन चोक्तं महाशयाः। व्याघ्रमहोदयाः कतिपयमासं यावत् नगरे

पर्युस्य अद्य प्रातः समागताः सन्ति ततोऽद्य सभा योजिता । अथ तान् प्रष्टव्यं यदुत नगरमध्ये वसद्भि र्भवद्भि र्मानवानां किं वैशिष्ट्यं दृष्टम्?।

वृकमंत्रीश्वरेण प्रोक्तः व्याघ्रोऽपि समुत्थाय तन्नगरं तत्स्थस्थानानां च वर्णनं कृत्वा कथयति यद् मानवानां अन्यत्सर्वं श्रेष्ठं किन्तु मानवसदृशो मूर्खोऽन्यः कोऽपि न दृष्टः।

यतः तत्रस्थेन मया पुनः पुन-रेतदेव श्रुतं तथाहि-"अनेन मम धनं खादितं, अनेन मम धनं चर्वितं, अनेन मम धनं लीढम्" इत्यादि एतच्छ्रुत्वा मया बहुधा चिन्तितं अरे! इदं धनं कीदृक् रसप्रदं भविष्यति! यस्मात् एतदर्थं सर्वे जना अनीति-विश्वासघात-प्रपञ्चादिपाप-समूहं कृत्वाऽपि एतत्खादन-चर्वण-लेहनार्थं प्रयासवन्तो भवन्ति? अन्येद्युः नाट्यगृहे कस्यचिन्मानवमहाशयस्य स्यूताच्च्युतं धनं (रुप्यको) मया दृष्टमवसरं विज्ञाय मया शनैः शनै र्निकटीभूय तद् गृहित्वा तद्रसास्वाद-जिज्ञासुरहं तत्खादन-चर्वण-लेहनेभ्यः प्रयत्न-शीलोऽभवम् किन्तु रसास्वादलेशोऽपि ततोऽनाप्नुवन्नहं समुद्विग्नस्ततो विरतः। एवं स्वानुभवसिद्धं धनं नीरसं दृष्ट्वा मया चिन्तितं धिङ्मानवान्! ये निरास्वादधनार्थं कियदकृत्यानि कुर्वन्ति? खलु! मानवसदृशः महामूर्खः कोऽपि नास्ति। तस्मात्ततो-केनाप्युपायेन नष्ट्वाऽत्राऽऽगतोऽस्मि। मानवमूर्खतां प्रख्याप्य विसृष्टा सभा। कथाऽवबोधोऽयं यद् वास्तविकं धनं संस्कृतभाषैव संस्कृतिश्च। अत एव तद्रक्षणार्थं परमसुखरुप-निःश्रेयसप्राप्त्यर्थञ्च 'निःश्रेयसम्' इति षाण्मासिकं संस्कृतपत्रं परमगुरुदेवसंयम-स्वीकारशताब्दिस्मृत्यर्थं प्रारब्धम् तृतीयाङ्केऽस्मिन् प्रथमे खण्डे अद्यावद्यप्रकाशितौ प्राचीनौ द्वौ ग्रन्थौ प्रस्तुतौ। प्रथमः कनकसागरगणि प्रणीत-भक्तामरटीका, द्वितीयस्तु हस्तलिखितप्रतप्राप्त-अज्ञातपरमर्षिकृत-"पत्रपद्धति" ग्रन्थः यः प्रज्ञावतां प्रीतिदायको भविष्यत्येव।

द्वितीयखण्डे "आत्मारामजी...संक्षिप्तवृत्तं, परमगुरुसंयमशताब्दिं निमित्तीकृत्य तेषां प्रवचनानुवादरुपौ द्वौ लेखौ "राम-वचनमौक्तिकानि"

''सामन्तभद्राचार्यस्य आप्तमिमांसा जैनसाहित्यसमृद्धिव्यापकतां प्राचीनताञ्च दर्शयति।'' ''रामायणे कालगणनम्'' पारिस्थितिकं किञ्चित्'' सहकारस्य महिमा '' वाक्यवृद्धेः कारणम्'' ''अहं आत्मा'' ''योगशास्त्र-परिचयपत्रम्'' क्रोधो-वैश्वानरोपम, इत्यादयो गद्यलेखाः ''वर्धमान-महावीरस्तवम्'' शंखेश्वरपार्श्वनाथाष्टकम्-''देवगुरुवन्दनं-परमगुरुजीवनकथात्मक-''रामचन्द्रीय-महाकाव्यस्य प्रथम सर्गः'' स्तवनानुवादः सरस्वत्या-वन्दनम्-चारित्रसप्तविंशिका, काव्यशास्त्रविनोदेन, चैत्यवन्दनानि हिन्दिभारतभारती, तपोमहिमागानम्-इत्यादि पद्यलेखाः संवेगप्रियकुलकम्-नवकारेण मच्चुतो रक्खा, कुवलयमाला-संखित्तसरुवम् इति प्राकृतलेखाः।

इत्यादि पठित्वा निश्चे विद्वद्वराः प्रसन्नतामृतरसास्वादमनुभविष्यन्ति किन्तु ममाऽयं प्रयासो नूत्नः, नव्योऽसौऽध्वा, न चाऽस्मिन्विषये बोधानुभवौ, मदर्थं सर्वं नव्यं ततो विद्वद्भिः मित्रीभूय मां स्वकीयमेव मत्वा मम क्षतयः संशोधनीयाः प्रदर्शनीयाश्च।

यद् यत्शोभनं तत्तन्मम तातपाद-भवनिस्तारक-प्रसिद्ध-प्रवचनकार गुरुदेव-पूज्यपाद-आचार्यप्रवर श्रीमद्विजय **श्रेयांसप्रभसूरी**श्वराणां चरण कमलोपासनया, सारस्वतसाधनया च सञ्जातम अत्र मुविप्रवर श्री **जिनभद्र**विजयस्यस्य पंडित **अमृतभाई** पटेलस्य च साहाय्यमविस्मार्यम्।

मुद्रणक्षतिसंशोधने साध्वीवर्याश्री **ज्ञानरसा**श्रीशिष्या-साध्वीवर्याश्री **विरागदर्शना**श्रिया साहाय्यं कृतम्। साध्वीवर्याश्री **क्षमानिधि**श्री-शिष्या-साध्वीवर्याश्री-प्रशमनिधिश्रिया मुद्रणक्षति-संशोधन-लेखसंमार्जना-द्यनेक-कार्येष्वनिर्वचनीयं कृतम् साहाय्यं मम सदैव स्मरणीयं भविष्यतीति शम्।

भव्याः! संस्कृतज्ञान-पठनेन जीवनं सुसंस्कृतं कुर्वन्तु इति शुभं भवतु।

**वि.सं.२०७०,पौष शुक्लासप्तमी**
**हुबली नगरम् ता.७-१-२०१४**

**सद्गुरुचरणचञ्चरीकायमाणो**
**मुनि सम्यग्दर्शनविजयः।**

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| * निःश्रेयसम् प्रति प्रतिघोषः | | १ |
| **खण्ड-१ प्राचीन कृतयः** | | |
| * भक्तामरस्तोत्रम् | साध्वीवर्या श्री क्षमानिधिश्रीजी | १० |
| * भावदेवसूरिरचित-जिनस्तुतिः | शा. सत्यदासः | ४५ |
| * पत्रपद्धतिः (प्राचीन परमर्षि प्रणीत) | मु.श्री जिनभद्रविजयाः | ५७ |
| **खण्ड-२ अर्वाचीन कृतयः** | | |
| * परमपरमगुरु श्रीआत्मारामजीमहाराजसंक्षिप्तवृत्तम् | आ.श्री विजयश्रेयांसप्रभसूरीश्वराः | ६२ |
| * रामवचनमौक्तिकानि | मुनिश्री मोक्षरतिविजयाः | ६६ |
| * रामवचनमौक्तिकानि | मुनिश्री श्रुततिलक विजयाः | ६८ |
| * समन्तभद्राचार्यस्य आप्तमीमांसा | एच्.वि. नागराज राव् | ७० |
| * रामायणे कालगणनम् | कालूरि हनुमन्तरावः | ७६ |
| * पारिस्थितिकं किञ्चित् | अशोकन् पुरनाट्टुकरा | ७८ |
| * सहकारस्य महिमा | देवर्षि कलानाथ शास्त्री | ८० |
| * वाक्यवृद्धेः कारणम् | कमलेशकुमार छ. चोक्सी | ८२ |
| * "योगशास्त्र" - ग्रंथरत्नस्य परिचयपत्रम् | मुनिश्री आत्मदर्शनविजयाः | ८४ |
| * क्रोधो वैश्वानरोपमः | साध्वीवर्या श्री नम्रगिराश्री | ९० |
| * अहं आत्मा एकस्वरुपः स्थिरः | पं.अमृत पटेलः | ९५ |
| * देव-गुरु वन्दनम् | मुनिश्री धुरंधरविजयाः। | ९६ |
| * श्री चैत्यवन्दन-स्तवनानुवादः | मुनिश्री धुरंधरविजयाः | ९७ |
| * श्रीरामचन्द्रीयमहाकाव्यम् | मुनिश्री मोक्षरतिविजयाः | १०० |
| * श्री शंखेश्वरपार्श्वनाथाष्टकम् | मुनिश्री सिद्धसेनविजयाः | १०८ |
| * काव्यशास्त्र विनोदेन... | मुनिश्री सम्यग्दर्शनविजयाः | ११० |
| * चारित्र सप्तविंशिका-३ | मुनिश्री सम्यग्दर्शन विजयाः | ११३ |
| * श्री चतुर्विंशतिजिनचैत्यवन्दनानि | साध्वीवर्या श्री विरागदर्शनाश्रीजी | ११५ |
| * तपोमहिमागानम् | साध्वीवर्या श्रीप्रशमनिधिश्री | १२१ |
| * श्री वर्धमानमहावीरस्तवपञ्चकम् | डॉ. आचार्य रामकिशोर मिश्र | १२३ |
| * श्री सरस्वत्या वन्दनम् | डॉ. आचार्य रामकिशोर मिश्रः | १२५ |
| * हिन्दी भारत भारती | डॉ. कृष्ण नारायण पाण्डेयः | १२७ |
| * संवेगप्पिय कुलगम् | मुनिश्री प्रशमरक्षित विजयाः | १२८ |
| * नवकार-पहावेण मच्चुतो रक्खा | साध्वीवर्या जिनमति श्री | १२१ |
| * कुवलयमालाकहाए संखित्तसरुवं | पं.कुणालभाई हेमेन्द्रभाई कपासी | १३२ |

# ।। नि:श्रेयसम् प्रति प्रतिघोष: ।।

(''नि:श्रेयसम्'' संस्कृतपत्रम्२) जिनभद्रविजयमुनिद्वारा अधिगतम्। विहङ्गावलोकनं विहितम्। उत्तरार्धम् अधिकं रुचितम्। तच्च पठितमपि। विचारप्रेरकलेखश्रेणिसमन्वितमिदम् उत्तरार्धं विज्ञजनमन:प्रमोदप्रदमस्ति। द्विजेन्द्रनाथ–शिवदत्त–देवर्धिप्रभृतीनां लेखा: अत्युत्तमा: सन्ति। एतल्लेखकेभ्य: शतश: साधुवादा:। आगामिषु अङ्केषु अपि एतादृशा: लेखा: अधिक–संख्याका: भवन्तु इति वयं सूचयाम:। संस्कृतेन लेखनं न सुकरं तथाऽपि सावहितचेतसा विहितेन अभ्यासेन एतत् सिध्येदपि। किमसाध्यम् अभ्यासस्य?। केवलं तत्र रुचि: अपेक्ष्यते। यत्र रुचि: तत्र स्वयमेव प्रवृत्ति: भवति।

एतादृशानि पत्राणि तादृश–लेखानां प्रकाशन–कृते अवसरमपि ददति। अवसरमिमं सत्कारयन्तु विपश्चित:।

**-विजयमुक्ति-मुनिचन्द्रसूरी,**

**शङ्खेश्वरतीर्थम्**

---

श्रुतप्रेमी मुनिराजश्री सम्यग्दर्शन विजयजी

अनुवंदना साथ 'नि:श्रेयसम्' संस्कृतपत्र मळेल छे आपश्रीनो श्रुतज्ञानप्रसार अनुमोदनीय छे।

जैनशासनमां जेनुं स्थान अतिमहत्वनुं छे तेवा श्रुतज्ञानने चिरंजीव बनाववानुं अत्यंत जरुरी छे कारणके पाया विना इमारत टके नहि।

जैनशासनने मेळव्या पछी जैनशासनना दरेक अंगनी सार संभाळ लेवी ते आपणुं कर्त्तव्य छे,

जेमां आपश्रीए शरुआत करी छे तेमां खूब ज सफळ थाओ ।

**-उपा. पुंडरीकविजय**

''नि:श्रेयसम्'' पत्र-२ मळ्युं: वांचीने खूब आनंद थयो प्राचीन कृतिओ-अर्वाचीन संशोधनात्मक समीक्षात्मक लेखो वगेरे खूब ज मननीय छे जेम जेम अभ्यास वधतो जशे, तेम तेम लेखन-प्रकाशन वगेरेनी हथोटी-शुद्धि वधुने वधु आवती जशे। संपादक बन्नेय मुनिभगवंतोने सादर वंदना-अनुमोदना-सलाम।

मुनिराजश्री सम्यग्दर्शन वि.म.नी चारित्रवंदना भाववाही होय छे। तेमनी कवित्वशक्तिने सलाम एमणे प्रस्तावनामां खूब सुंदर नम्रता दाखवी छे-शुद्धिओ बतावावांनी वात करी छे। ए तो अधिकारी जनो ज बतावी शके। मारो कोई अधिकार नथी अनधिकारपणे पण एक वात रजू करतां रही शकतो नथी। आ पत्रमां 'ग्रंथ-समीक्षा' जेवो पण एक विभाग होय तो केम?

**- गुर्वाज्ञाथी तीर्थबोधिवि.**

**बोरिवली-मुंबई.**

---

पूज्यविद्वद्वर्यमुनिप्रवर-

श्री सम्यग्दर्शनविजयानां चरणारविन्दे वंदनम्,

अनुमोदनम्, संपादितं भवद्भिः सुप्रयत्नेन ''नि:श्रेयसं'' संस्कृतपत्रम्। सर्वजनमुखेभ्योऽस्य नि:श्रेयससंस्कृतपत्रकमलस्य प्रशंसासौगन्ध्यं गाढतरं स्फीतमेति। तज्ज्ञात्वा श्रुत्वा च प्रभूतानंदः। भवतां कार्यशक्तिरियं सर्वकालं वृद्धितरा स्यादिति मे शुभकामना। विशेषतः अस्मिन् संस्कृतपत्रे संस्कृतकृतीनामिव प्राकृतकृतीनां प्रकाशनं भवेच्चेद्, सुष्ठु, यदि भवेत् तर्हि सेवकोऽयमवश्यं स्मरणीयः।

मम प्रायोग्यकार्यसेवां ज्ञापयन्तु। कार्यरतानां भवतां कार्यकाले स्वास्थ्यं सुखदं वर्ततामित्याकाङ्क्षे।

**- प्रशमरक्षितविजयो मुनिः**

---

मुनिवर सम्यग्दर्शनविजयेषु प्रणतिपूर्वकं विज्ञाप्यते-'नि:श्रेयसं' पत्रमधिगम्य सुमहान् प्रमोदः।

व्यापकं विषयफलकमधिकृत्य प्राचीनानां नवीनानां च प्रातिनिध्यं कुर्वाणा सामग्री समाहिता-ऽस्मिन्नङ्के। 'भारती' संस्कृतमासपत्रिकायामस्य समीक्षा प्रकाशयिष्येते

(अहमस्याः पत्रिकायाः प्रधानसम्पादकः)

**- देवर्षि कलानाथशास्त्री**

**जयपुर**

(देवर्षि कलानाथशास्त्री अध्यक्षः आधुनिकसंस्कृतपाठस्य जगद्गुरु-रामानंदाचार्य-राजस्थान संस्कृत विश्वविद्यालये)

दीनेशचन्द्रजी जैन कार्यालयप्रमुख

सादर जय जिनेन्द्र !

संस्कृत अध्ययन-अध्यापनको समर्पित आपकी संस्थाने महत्त्व के लघुग्रन्थ 'निःश्रेयसम् संस्कृतपत्रम्' प्रकाशित कर संस्कृत-प्राकृत के जिज्ञासु पाठको को सुपठनीय साहित्य उपलब्ध कीया है।

त्रुटिरहित मुद्रण, मनोहारी चित्रावली सीमितपृष्ठो में असीम शान्तिप्रदाता परमपूज्य आ. श्री विजय रामचन्द्रसूरीश्वरकी अनुकम्पा तथा मुनि सम्यग्दर्शन विजयजी ने शानदार ग्रन्थ भिजवाने की महती कृपा की है।

एतदर्थ धन्यवाद ।

**- विनीत मोतीलाल जैन ''विजय'' रिटायर्ड लेक्चरर**

**एम.ए.हिन्दी + संस्कृत साहित्य**

---

श्रीमान्, सादरं नमस्काराः।

भूरि भूरि अभिनन्दनानि 'निःश्रेयसम्' नाम संस्कृतपत्रस्य प्रकाशनाय।

द्वितीयाङ्कस्य-सम्यगवलोकनं कृतम्।

श्रीपूर्वाचार्य-विहिताऽप्रकटग्रन्थानां प्रकाशनम् अध्ययनं च आवश्यकमेव। अर्वाचीनलेखाः अपि संपादनीयाः । भवताम् आध्यात्मिकतैव लक्ष्यं प्रतीयते । भवतु ।

यथासमयम् मया घण्टाकर्णविषये लेखो यदि भविष्यति तदा भवते प्रेषयिष्यतैव।

मया तु घण्टाकर्णकथामाश्रित्य वितीर्णामृतं नाम नाटकं प्राप्तं। अतः तस्मिन् विषये मेऽभिरुचिः सञ्जाता। तद्विषयमधिकृत्य गवेषणायै प्रयत्नः क्रियते यदि किञ्चित् भवद्भ्यो प्राप्येत इति आशासे समीहे च।

''निःश्रेयसम्'' द्वितीयाङ्के केचन मुद्रण दोषाः दृष्टिपथम् आयाताः। तद्विषये गुरुवर्याः प्रयत्नः क्रियेत इति आशासे।

**-भवदीयः दशरथलाल वी. वेदीया**

**(''शास्त्रचूडामणी'') वटवा-अमदावाद**

---

परमश्रद्धेयाः श्री दिनेशमहाभागाः सादरं

नमस्कारपूर्वकं अनामयं कामये ।

भवद्भिः प्रेषितं 'निःश्रेयसम्' इति संस्कृतपत्रस्य द्वितीयमङ्कं इति भूर्यनुगृहितोऽस्मि।

विपुल-भव्य-संस्कृत-वाङ्मयवारिधौ संस्थिता निःश्रेयस-कारिणि बहुमूल्यानि रत्नानि-संचयित्वा भवद्भिः पू.पा.आचार्यसूरिभिश्च अस्मिन्नङ्के तेषां आध्यात्मिकः प्रकाशः उद्घाटितः। अभिनंदनम्।

शेषं कुशलम्।

**- विनीतः वसन्तः परीखः**

**अमरेली**

सम्मान्या:

नमो नम:।

अकारणकरुणावरुणालयै र्भवद्भि: प्रेषितं नि:श्रेयसमिति संस्कृतपत्रम् (२) सम्प्राप्तम्। भृशमुपकृतोऽस्मि।

खण्डद्वयात्मकेऽस्मिन् पत्रे प्राचीनकृत्य: इति प्रथम: खण्डोऽनुसंधित्सूनां कृते महदुपकरिष्यति इत्ययं नास्ति शंङ्कालेश:। अर्वाचीनकृतय: इति द्वितीयखण्डोऽपि सहृदयजनहृदयावर्जक: इति। संस्कृतपत्रस्यास्य भूरिप्रसार: प्रचारश्च स्यादिति कामये। शुभं भूयात्।

''नामूलं लिख्यते किञ्चित्। नानपेक्षितमुच्यते।'' श्री मल्लिनाथसूरि:।।

**-भावत्क: किशोरचन्द्रपाठक:**

**अमरेली**

---

पूज्यश्री,

श्री विजय हीरसूरिश्वरजी महामान्यानां सविधे प्रणामांजलय:

महामान्या: तपस्विन:।

नि:श्रेयसम् पत्रिकाया: अंक: एक: अक्षरम् भवने दृष्ट:। पत्रिकेयं नवीना अचिरात् प्रकाशितेति अवगत्य महान् सन्तोष: समजनि। पत्रिकाया अस्या: शुभोदर्कं कामये।

जना: सर्वे नि:श्रेयसमधिगत्य सर्वथा सुखिन: सन्तु इति। प्रणतय:

**- पल्लापुरं कृष्ण शर्मा**

**बेंगलूरु**

---

मान्यवर संपादक महाभागा:

('नि:श्रेयसम्' पत्रिका)

मधुसूदनस्य नमो नम:। कुशलं कामये भवतां सर्वेषाम् नम्रतया विनिवेद्यते यत् अनेन सहैव मया लेख एक: श्रद्धांजलिरुपेण प्रेषित: अस्ति। यत: स्व ऋषिराजअग्निहोत्रीणां सामजिकं, शैक्षणिकम्, सांस्कृतिकम् प्रदानं अनतिसाधारणम् विद्यते। अत: नि:श्रेयसमध्ये चेत् अस्य मुद्रणम् भविष्यति चेत् वरम्। तदर्थे प्रार्थना अस्ति।

अपरमपि कथनीयम् यत् गूर्जर प्रदेशे द्वे जैन-पत्रिके विद्यते तस्मिन् अपरा पत्रिका तु नंदनवन कल्पतरो: नामधेयमस्ति। उभयो: नि:शुल्कवितरणम् समग्र देशे भवति। एतादृशं वैशिष्टयं कदाचित् गुजरातस्य एव अस्ति एवं मे विचार:।

अन्ते भवतां पत्रिकाया: चतुर्दिक् प्रचार: प्रसार: भवेत् एतदर्थे प्रभुं अभ्यर्थना। जिनालयनिवासिन: देवा: सर्वेषां कल्याणं कुर्वन्तु।

**-मधुसुदन व्यास.**



आदरणीया: श्री जैनमहाभागा:

नि:श्रेयसम् पत्रस्य द्वितीयं अंकं प्राप्य खलु प्रसन्नता संजाता मम हृदये। भवतामेष: खलु अनुग्रह: इति मन्ये।

अस्मिन् लेख-समुच्चये प्राचीनानां अर्वाचीनानां लेखान् पठित्वा हर्ष: अनुभूत:। अन्यांश्च काव्यान्, काव्यहेतु, स्तवनान् च अधीत्य संस्कृत भाषाया: गौरवं अनुभवामि।

महाशया:, लेखकानां कवीनां च वृन्दं धन्यवादान् अर्हति। अहमपि यथावकाशं लघु-लेखान् प्रषयित्वा उद्बाहुरिव वामन: किंचिद् लिखित्वा तच्च प्रेषयित्वा ऋणमुक्तिं अनुभविष्यामि। सर्वेऽपि नियमा: शिरोधार्या:।

**-भवदीय: प्रा.चंदुलाल व. ठकराल**

**राजकोट**

---

माननीय महोदय,

सादरं नमो नम:।



भवत्प्रेषिता नि:श्रेयसम् पत्रिका यथाकालं प्राप्ता। पत्रिकाप्रेषणेन भवद्भि: बहूपकृतम्। तदर्थम् अनुगृहीतोस्मि। पत्रिकाया: इमं द्वितीयम् अङ्कम् पठित्वा महान् मोद: सञ्जात:। अत्रत्यं विषयवस्तु कलेवरं च सत्यं शिवं सुन्दरञ्चास्ति। आशासे पत्रिकामिमां वीक्ष्य समेषां साधुजनानाम् विद्वज्जनानां च मनांसि अवश्यं परितोषमनुभविष्यन्ति।

वस्तुत: संस्कृतभाषाया: सम्यक् ज्ञानाय प्रतिदिनम् संस्कृतसंभाषणमपेक्षते। परन्तु दुर्भाग्यवशात् एतादृश: अवसर: संस्कृतज्ञानपीपासुजनाय अद्यत्वे सर्वत्र प्राप्तुं न शक्यते। तस्य विकल्परुपेण नि:श्रेयसम् सदृशं पत्रं सततं प्रकाशितं भवेत् सर्वत्र च सुलभं भवेत् इति आवश्यकं प्रतिभाति। यतो हि पत्रपत्रिकामाध्यमेन संस्कृतभाषणस्य आवश्यकता पूर्ति: कर्तुं शक्यते। मह्यमपि पत्रमिदं नियमितरुपेण उपलब्धं भवेदित्यर्थं भवतामनुग्रह: अपेक्षते। तदर्थम् अनेन पत्रेण सह द्रव्यमपि प्रेषितमस्ति। समाप्ते तस्मिन् यथाकालं अन्यदपि प्रेषयिष्यते।

अनेन सह संस्कृतभाषाध्येतृभ्य: प्रेरणादायक: मार्गदर्शक: च एक: लघुलेख: प्रेषित:। यदि स प्रकाशनार्ह: प्रतीयेत तर्हि प्रकाशनाय ग्राह्य: नो चेत् न।

भवदीय: कृपाकाङ्क्षी

**कमलेशकुमार छ. चोकसी**

**प्रोफेसर, संस्कृतविभाग, भाषासाहित्यभवन,**

**विश्वविद्यालय, अहमदाबाद, गुजरात**

वन्दनीया: मुनिश्री सम्यग्दर्शनविजय महाभागा: !

यत्कृतं सविधिवन्दनं स्वीकार्यम् कृपया तत्र भवद्भिः प्रेषितं 'नि:श्रेयसम्' इत्याख्याया: षाण्मासिक्या: अङ्कद्वयम् अधिगतम्। अधीत्य प्रासीदम्। धन्यवादा:।

अनयो: प्रथमेङ्के (१) संस्कृतम् संस्कृतेर्मूलम् तथा द्वितियेऽङ्के (२) संस्कृतभाषैव विश्वभाषा पदवीमर्हति (३) भाषा वैज्ञानिकम् अर्थविज्ञानम् (४) संस्कृत भाषायां लेखनं न सुकरम्-इति लेख चतुष्टयं अतीव उपयोगि ज्ञानवर्धकं मनोरञ्जकश्चास्ति एतदर्थे तेषां लेखकानां अभिनन्दनम् क्रियते मया।

प्रथमेऽङ्के सम्पादकीये एव पञ्चसु स्थानेसु 'रू' स्थाने 'रु' मुद्रितमस्ति। द्वितियाङकस्य सम्पादकीये एकादश त्रुटीः दृष्ट्वा मे मनो दूयते। अन्याश्चापि विविधास्त्रुटयो दृश्यन्ते।

किन्तु सम्प्रति अङ्कौ प्रकाशितौ स्त: अत एव तासाम् उल्लेख: अकिञ्चत्कर: सेत्स्यति अतोऽलम्। आगामिषु अङ्केषु एतादृश्य: त्रुटय: न भवितव्या इत्येव उक्त्वा विरतो भवामि।

प्राचीनकृतिषु सुकविना शोभनमुनिना प्रणीतां स्तुतिचर्तुविंशतिकां सभाष्यां तथा धनपालप्रणीतां ऋषभ- पंचाशिकां प्राकृतभाषानिबद्धां सभाष्यां द्रष्टुमिच्छामि।

आचार्यश्रीमद्भावदेवसूरिविरचिताम् चमत्कृति-परिपूरिताम् मात्रानुस्वार-विसर्गरहितां जिनस्तुतिम् प्रेषयामि प्रकाशानार्थम्।

धन्यवादा:।

**- भवदीयः शा. सत्यदासः**

**नागदा (म.प्र.)**

---

संमाननीय श्री दिनेशचन्द्र जैन:

मधुसूदनव्यासस्य नमो नम:। भवद्भि: प्रेषितं 'नि:श्रेयसम्' (द्वितीयं अङकम्)-२ प्राप्तम्। अस्य मुद्रणम् च विषय-वस्तु च तोषकरम् एवमेव ज्ञानप्रदम् मे प्रातिभाति। अस्य कृते कृतिमपि प्रेषयिष्ये। इयमपि अस्माकं गौरवं यत् गुर्जरे बहव: संस्कृतपत्रिका प्रकाश्यते तस्मिन् पत्रिकाद्वयं जैनजनैः देवभाषायां क्रियते प्रेष्यते च। अनेनैव विद्याया: गौरवं भवति-भविष्यति। जैनश्रेष्ठीन: प्राय: एतादृशे कार्यकृते स्वकीयं धनं ददन्ति। संस्कृतस्य प्रचार: प्रसारमपि भवति एवमेव धर्मवृद्धि: अपि भविष्यति जैनं जयति शासनम् इति निवेदयित्वा विरमामि।

**-प्रा.डॉ.मधुसूदन म. व्यास**

**शामलाजी**

सम्मान्या: श्री दिनेशचन्द्र जैन महोदया:,

नमो नम:।

भवद्भि: सानुग्रहं सम्प्रेषित: 'नि:श्रेयसम्'-इत्याख्य-गीर्वाणगिरापत्रस्य द्वितीयोऽङ्क: सम्प्राप्त:। तदर्थं भूरिशो धन्यवादा:।

प्राचीनकृतीनां सम्पादनै: सह नवीनरचनानामत्र समुत्कर्षो सर्वेषां कृते नूनमेवाह्लादकरो भवति। विबुधवराणां लेखा:, कवीनां कृतयश्च संस्कृत-भाषाया: परं सामर्थ्यं, सञ्जीवितत्वञ्च सम्यक् प्रबोधयन्ति। सम्पादकेभ्य: मुनिश्री-सम्यग्दर्शनविजय-यतिवरेभ्यो नुतिततय:। ससाधुवादं नमस्कुर्वन्।

**-गिरिश बी. जानी**
**अनुस्नातक-शोध-विभाग:,**
**भारतीय विद्याभवनम्-मुंबई**



**नम्रा विज्ञप्ति:**

लेख-प्रेषक-महाशयेभ्यो नम्रा विज्ञप्ति:
यद् भवतां लेखा: स्पष्टाक्षरै: सुवाच्यै:
स्वच्छाक्षरै: प्रेषणीया येन मुद्रण-सारल्यं भवेत्।

# निःश्रेयसम्

संस्कृत-पत्रम्

## खण्ड-१

## प्राचीन कृतयः

# भक्तामरस्तोत्रम्

## कनकसागरगणिप्रणीतवृत्तिसमेतम्

**- साध्वीवर्याश्री क्षमानिधिश्रीजी**

निः श्रेयसम्-१ मां प्रथमवार प्रकाशित थइ रहेल 'भक्तामर वृत्ति श्रेणी'नुं आ तृतीय सोपान, कनकसागर गणि प्रणीत वृत्ति छे। बीजी वृत्तिओने नजर समक्ष राखीने कनक सागरजीअे सं.-१७४६ (राग-वेदर्षि-चंद्र) वर्षे रची छे। अने सं १९३१मां सुज्ञानगढमां चुनीलाल द्वारा स्वाध्याय अर्थे लखाई छे। जे मे कैलासश्रुतसागरमहावीरआराधना केन्द्र कोबा स्थित ज्ञानभंडार नं.-६०८८७मां क्रमांकित उं-११X३० अक्षरमां २६ पत्रोनी हस्तप्रत उपरथी संपादन कर्यु छे। एकमात्र प्रत प्राप्त थइ छे। जेथी कैलास श्रुत सागर-कोबा संस्थानो प्रतनी झेरोक्ष कोपी आपवा बदल तेमनो आभार मानुं छुं खास तो अे नोंधवुं घटे के श्रीयुत मो.देसाई तथा श्री ही. र. कापडीयाजीअे अेमना इतिहासग्रंथोमां आ वृत्तिनो उल्लेख कर्यो नथी।

- संपादन दरमियान केटलाक मुद्दा नजरे आव्या तेनो उल्लेख करुं छुं।
- सरस्वतिदेवीनां चरणकमलने भक्ति पूर्वक नमन करीने कर्ताअे भक्तामर स्तोत्रनी वृति रचवानी प्रतिज्ञा करी छे।
- टीकाकारे प्रायः पूर्व टीकाकारोनुं अनुसरण कर्यु छे। छतां कंईक जे नवीन जेवुं लाग्युं ते पद्य दीठ रजू करुं छुं।

पद्य-१० **भूवनभूषण! हे भूतनाथ** ! अेम बे स्वतंत्र संबोधन छे अथवा भूवनभूषणभूत! हे नाथ! अेवी रीते पण बे स्वतंत्र संबोधन कर्या छे।

पद्य-११ **जलनिधेरशितुं**! अही **अशितुं** आवुं पद आव्युं छे तथा **क्षारं** नो अर्थ कटुकं कर्यो छे।

पद्य-१२ **शान्तरागरुचिभिः** नो **हे शान्तराग ! रुचिभिः**! आवो विग्रह कर्यो छे।

पद्य-१३ **पाण्डुपलाशकल्पम्** नी वृत्तिमां **जीर्ण** - पिक्क अेवो पाकृतशब्दथी अर्थ 'पाकुं' सूचव्यो छे माटे () मां 'पक्व'! शब्द अर्थ द्योतन माटे में मूक्यो छे।

पद्य-१६ **'निधूर्म-वर्ति'** मां निर्गति धूम-वर्ती यस्य सः अे विग्रहमां **वर्ति** शब्द स्त्रीलिंगे वापर्यो छे।

पद्य-१६ मां ज **मरुतां न गम्यो 'मरुतां'** नो बीजो 'देवानां'! अर्थ पण आप्यो छे।

पद्य-२३ **'तमसः पुरस्तात्**! पद मूळमां छे। अर्थ नथी आप्यो।

पद्य-३१ **'प्रख्यापयत्** नो अर्थ खिज्ययत् अपायो छे। ते देश्य धातु हशे?

पद्य-३६ अग्निनां विशेषण 'उज्वलम्' नो अर्थ 'रक्तम्' कर्यो छे। तथा **उत्स्फुलिङ्ग** ! मूळमां वपरायो छे टीकामां पण अे ज शब्द छे।

पद्य-३९ **कुन्ताग्र.... तरुणातुर** मूळमां छे टीकामां पण 'तरुणाः योधाः! एक मात्र हस्तप्रत उपरथी संपादननुं कार्य छे। एटले संपादनमां क्षति रहे अथवा टीकाकारनां अभिप्रायथी विरुद्ध पण लखाई जवा संभव छे। माटे विद्ववज्जनो अेमां कंइ खोटुं/खुटतुं लागे-तेमां मारी मतिनो दोष मानी क्षमा करे।

**सरस्वत्या** नमस्कृत्य, भक्त्या चरणपङ्कजम् ।
**भक्तामरस्य** स्तोत्रस्य, वृत्तिं विरचयाम्यहम् ॥१॥

**भक्तामरप्रणतमौलिमणिप्रभाणा-**

**मुद्द्योतकं दलितपापतमोवितानम्।**

**सम्यक् प्रणम्य जिनपादयुगं युगादा-**

**वालम्बनं भवजले पततां जनानाम्॥**

**यः संस्तुतः सकलवाङ्मयतत्त्वबोधा-**

**दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः।**

**स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः**

**स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम्॥१-२॥ युग्मम्**

१-२ **कनकसागर०**—अनयोर्युग्मरूपयोर्व्याख्या ॥ **किल** इति सत्ये, **अहमपि= मानतुङ्गाचार्योऽपि, तं प्रथमं जिनेन्द्रं स्तोष्ये** इत्यन्वयः, **स्तोष्ये** इति क्रियापदं, 'स्तोष्ये'= स्तवनं विधास्ये, कः कर्ता ?-अहमपि= **मानतुङ्गाचार्यो**ऽपि, कं कर्मतापन्नं ?-'जिनेन्द्रं'= रागादीनां जेतृत्वा[त्]-जिनाः सामान्यकेवलिनः, तेषामिन्द्रः=स्वामी जिनेन्द्रः, तम्। किंभूतं जिनेन्द्रं ?-'प्रथमं'=आद्यं **ऋषभ**जिनेन्द्रं इत्यर्थः, पुनः किंभूतं जिनेन्द्रं ?-तं, कं ?-यः जिनेन्द्रः **सुरलोकनाथैः स्तोत्रैः संस्तुतः**-कर्मोक्तिः, 'संस्तुत' इति क्रियापदम्, 'संस्तुतः'=स्तुतः, कैः कर्तृभिः ?-'सुरलोकनाथैः'= देवलोक-स्वामिभिः, सुराणां लोकाः सुरलोकाः, सुरलोकानां नाथाः सुरलोकनाथाः, तैः-सुरलोकनाथैः इन्द्रैः इत्यर्थः। कः कर्मतापन्नः ? 'यः' जिनेन्द्रः श्रीऋषभः, किंभूतैः सुरलोकनाथैः ?-**उद्भूत-बुद्धि-पटुभिः**=प्रोद्भूतमतिदक्षैः, उद्भूता चासौ बुद्धिश्च उद्भूतबुद्धिः-कर्मधारयः, उद्भूतबुद्ध्या पटवः उद्भूत-बुद्धिपटवः-तत्पुरुषः, तैः उद्भूतबुद्धिपटुभिः। कस्मात् ?-**सकल-वाङ्मय-तत्त्वभेदात्**=समग्रशास्त्रतत्त्वज्ञानात्, वाचा निर्वृत्तं 'वाङ्मयं'-तत्पुरुषः, सकलं च तद् वाङ्मयं च-'सकलवाङ्मयं', सकलवाङ्मयस्य तत्त्वं-'सकलवाङ्मयतत्त्वं, तस्य बोधः-'सकलवाङ्मय-तत्त्वबोधः', तस्मात् सकलवाङ्मय[तत्त्वबोधात्]। कैः कृत्वा संस्तुतः ?-**स्तोत्रैः** कृत्वा, किंभूतैः स्तोत्रैः ?-**जगत्त्रितयचित्तहरैः**—जगतां त्रितयं-[जगत्त्रितयं] तत्पुरुषः, जगत्त्रितयस्य चित्तानि-जगत्त्रितयचित्तानि-तत्पुरुषः,

जगत्त्रितयचित्तानि हरन्ति इति जगत्त्रितयचित्तहराणि-तत्पुरुषः, तैः जगत्त्रितयचित्तहरैः-जगत्त्रय-जन्तुमनआवर्जकैः इत्यर्थः। पुनः तैः किंभूतैः-स्तोत्रैः ? **उदारैः** महार्थैः विस्तीर्णैः। किं कृत्वा स्तोष्ये ? **सम्यक्** त्रिकरण[योगात्], **प्रणम्य** प्रकर्षेण नत्वा प्रणम्य नमस्कृत्य। किं कर्मतापन्नं ?-**जिनपादयुगं**=अर्हच्चरणयुगलं, पादयोर्युगं-पादयुगं तत्पुरुषः, जिनस्य पादयुगं जिनपादयुगं [तत् जिनपादयुगं], किंभूतं जिनपादयुगं ?-**उद्योतकं** उद्दीपकं, कासां ?-**भक्तामरप्रणतमौलिमणिप्रभाणां**-भक्ताश्च ते अमराश्च भक्तामराः-कर्मधारयः, प्रणताश्च ते मौलयश्च प्रणतमौलयः कर्मधारय, भक्तामराणां प्रणतमौलयः भक्तामरप्रणतमौलयः तत्पुरुषः, भक्तामरप्रणत-मौलीनां मणयः-भक्तामरप्रणतमौलिमणयः, भक्तामरप्रणतमौलिमणीनां प्रभाः-भक्तामरप्रणत-मौलिमणिप्रभाः, तासां-भक्तामर[प्रणतमौलिमणि-प्रभाणाम्], पुनः किंभूतं जिनपादयुगं ?-**दलित-पापतमोवितानम्**-तमसो वितानं-तमोवितानं, पापमेव तमोवितानं-पापतमोवितानं, दलितं पापतमोवितानं येन तत्-दलितपापतमोवितानं [तत् दलितपापतमोवितानम्]। पुनः किंभूतं जिनपादयुगं ? -**आलंबनं**=आश्रयणं आधारम्, कस्मिन् ?-**युगादौ** [युगस्य आदिः-युगादिः तत्पुरुषः, तस्मिन् युगादौ]=अवसर्पिण्यास्तृतीयारकशेषे, केषां आलम्बनं ? **जनानां**=लोकानाम्, किं कुर्वतां जनानाम् ?-**पतताम्**-ब्रुडतां, कस्मिन् ?-**भवजले**=संसारोदके, भव एव जलं-भवजलं, तस्मिन् भवजले, इत्याद्यवृत्तद्वयाऽर्थलेशः॥१-२॥

**बुद्ध्या विनाऽपि विबुधार्चितपादपीठ!**
**स्तोतुं समुद्यतमतिर्विगतत्रपोऽहम्।**
**बालं विहाय जलसंस्थितमिन्दुबिम्ब-**
**मन्यः क इच्छति जनः सहसा ग्रहीतुम्?॥३॥**

**३ कनकसागर०—**हे **विबुधार्चितपादपीठ**! **अहं विगतत्रपो**ऽस्मि वर्त्ते, अस्मि-इति क्रियापदम्, कः कर्त्ता ? अहं, किंभूतोऽहं ?-विगतत्रपः=निर्लज्जः, विगता त्रपा यस्मात् सः विगतत्रपः। पुनः किंभूतोऽहं ?-**समुद्यतमतिः**-सज्जीभूतबुद्धिः, समुद्यता

उद्यमवती, मतिः [बुद्धिः] यस्य सः, समुद्यतमतिः। किं कर्तुं ? **स्तोतुं**=स्तवनं कर्तुम्, कथं ? **विना**, कया ? **बुद्ध्या**=मत्या। [किंसंबोधने-**विबुधार्चितपादपीठ !**]-पादयोः पीठं-पादपीठं [तत्पुरुषः], विबुधैः देवैः, अर्चितम् पादपीठम् यस्य स-विबुधार्चितपादपीठः,-तस्य संबोधनम्-हे विबुधार्चितपादपीठ ! । दृष्टान्तमाह-**जलसंस्थितं इन्दुबिम्बं बालं विहाय, अन्यो जन सहसा ग्रहीतुं क इच्छति**-?-अपि तु न कोऽपि। इच्छति इति क्रियापदम्, कः कर्ता ? जनः, किंभूतः जनः ? कः अन्यः=अपरः, किं कर्तुं ?-ग्रहीतुं, किंकर्मतापन्नम् ? इन्दुबिम्बं=चन्द्रमण्डलम् इन्दोः बिम्बं इन्दुबिम्बं, [तत् इन्दुबिम्बम्] किंभूतं इन्दुबिम्बं ?-**जलसंस्थितम्**-पानीये प्रतिबिम्बस्थं जले संस्थितम्-जल-संस्थितम् [तत्पुरुषः], किंकृत्वा ?-**विहाय**=त्यक्त्वा। किं कर्मतापन्नम् ?-**बालं**=शिशुम्, एतावता यो बालो भवति, स एव जलस्थितं चन्द्रमण्डलं सहसा ग्रहीतुं इच्छति, अन्यो विवेकी जनो नेच्छति-इत्यर्थः ॥३॥

**वक्तुं गुणान् गुणसमुद्र ! शशाङ्ककान्तान्**
**कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या ?।**
**कल्पान्तकालपवनोद्धतनक्रचक्रं**
**को वा तरीतुमलमम्बुनिधिंभुजाभ्याम् ? ॥४॥**

४ **कनकसागर०—**हे **गुणसमुद्र** ! गुणानां समुद्रः-गुणसमुद्रः, तस्य संबोधनम्, **ते**=तव, **गुणान् वक्तुं बुद्ध्या सुरगुरुप्रतिमोऽपि कः क्षमो भवति** ?, अपि तु न कोऽपि, भवति, इति क्रियापदम्, कः कर्ता ?-कः, किंलक्षणः कः ?-क्षमः समर्थः, किं कर्तुं वक्तुम्, कान् कर्मतापन्नान् ?-गुणान्, किंभूतान् गुणान् ?-**शशाङ्ककान्तान्,** [शशः अङ्के यस्य सः-शशाङ्क=चन्द्रः, शशाङ्क इव कान्ताः-शशाङ्ककान्ताः-चन्द्रमनोज्ञाः, तान्-शशाङ्ककान्तान्] किंभूतः कः ?-**सुरगुरुप्रतिमोऽपि**= बृहस्पति-तुल्योऽपि, सुराणां गुरुः [सुर-गुरुः-तत्पुरुषः] सुरगुरोः प्रतिमः तुल्यः-सुरगुरुप्रतिमः, कया ?-**बुद्ध्या,** । दृष्टान्तमाह-**वा** इति पक्षान्तरे,-**भुजाभ्यां अम्बुनिधिं तरीतुं कः अलं** भवति ?-अपि तु न कोऽपि,

इति क्रियापदम्, कः कर्ता ?-**कः**, किंभूतः कः ?-अलं=समर्थः, किं कर्तुं ?-तरीतुं, कं कर्मतापन्नं ?-अम्बुनिधिम्=समुद्रम्, अम्बुनो निधिः-अम्बुनिधिः, तं अम्बुनिधिम्, काभ्यां ?-भुजाभ्याम्, किंभूतं अम्बुनिधिं?-**कल्पान्तकाल-पवनोद्धतनक्रचक्रम्**-कल्पस्य अन्तः-कल्पान्तः, कल्पान्तश्चासौ कालश्च कल्पान्तकालः, कल्पान्तकालस्य पवनः-कल्पान्तकालपवनः, कल्पान्त-कालपवनेन उद्धताः=उद्ध्वं चलिताः-[कल्पान्तकालपवनोद्धताः, कल्पान्त-कालपवनोद्धताः] नक्रचक्राः-जलचर-जीवविशेषाः यस्मिन् सः-कल्पान्तकालपवनोद्धतनक्रचक्रः, तं कल्पान्तकाल [पवनोद्धतनक्रचक्रम्] ॥४॥

**सोऽहं तथापि तव भक्तिवशान्मुनीश !**
**कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।**
**प्रीत्याऽऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं**
**नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥५॥**

५ **कनकसागर०**—यद्यपि तव गुणान् वक्तुं न कोऽपि शक्तः, तथाऽपि हे **मुनीश ! सः अहं तव स्तवं कर्तुं प्रवृत्तः**-अस्मि वर्त्ते, 'अस्मि' इति क्रियापद, कः कर्ता ?-अहम्, किंभूतः अहम् ?-सः=पूर्वोक्तः, पुनः किंभूतोऽहम् ? प्रवृत्तः=प्रवर्त्तितः, किंकर्तुं ?-कर्तुं=निर्मातुं, कं कर्मतापन्नम् ?-स्तवं=स्तोत्रम्, कस्मात् ?-**भक्तिवशात्**- भक्तेः वशः भक्तिवशः, तस्मात् भक्तिवशात्, कस्य ? तव, [किं संबोधने ?- हे मुनीश ! ] मुनीनां ईशः-मुनीशः, तस्य सम्बोधने हे मुनीश !, उक्तमर्थं दृष्टान्तेन दृढयति-**मृगः किं मृगेन्द्रं नाऽभ्येति** ?-अपि तु अभ्येत्येव, सन्मुखमागच्छत्येव, 'अभ्येति' इति क्रियापदम्, कः कर्ता ?-मृगो=हरिणः, कं कर्मतापन्नम् ?-मृगेन्द्रं सिंहं, मृगाणां इन्द्रो मृगेन्द्रः, [तं मृगेन्द्रम्], किमर्थं ?-**परिपालनार्थम्**=रक्षणाय, परिपालनाय इति परिपालनार्थम् । कस्य ? **निजशिशोः** =आत्मबालकस्य, निजस्य शिशुः-निजशिशुः, [तस्य] निजशिशोः, किं कृत्वा ?-अविचार्य [=विचारं अकृत्वा], किं कर्मतापन्नम् ?-**आत्मवीर्यम्**=निजबलम्, आत्मनः वीर्यम्-आत्मवीर्यम्, कया ?-**प्रीत्या**=स्नेहेन, यथा मृगो निजबालकरक्षणार्थं सिंहाभिमुखं प्रवर्त्तते, तथा अहमपि तव स्तवं कर्तुं प्रवृत्त इति ॥५॥

=आत्मबालकस्य, निजस्य शिशुः-निजशिशुः, [तस्य] निजशिशोः, किं कृत्वा ?-अविचार्य [=विचारं अकृत्वा], किं कर्मतापन्नम् ?-**आत्मवीर्यम्**=निजबलम्, आत्मनः वीर्यम्-आत्मवीर्यम्, कया ?-**प्रीत्या**=स्नेहेन, यथा मृगो निजबालकरक्षणार्थं सिंहाभिमुखं प्रवर्त्तते, तथा अहमपि तव स्तवं कर्तुं प्रवृत्त इति ॥५॥

**अल्पश्रुतं श्रुतवतां परिहासधाम**
**त्वद्भक्तिरेव मुखरीकुरुते बलान्माम्।**
**यत् कोकिलः किल मधौ मधुरं विरौति**
**तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥**

**६ कनकसागर०**—हे जिनेश ! **त्वद्भक्तिरेव मां मुखरीकुरुते,** अमुखरं मुखरं कुरुते इति मुखरीकुरुते=वाचालं करोति इत्यर्थः। मुखरीकुरुते इति क्रियापदम्, का कर्त्री ?-त्वद्भक्तिरेव-तव भक्तिः त्वद्भक्तिः, कं कर्मतापन्नं ?-मां, कथं ?-एव=निश्चयेन, कस्मात् ?-**बलात्**=हठात्, किंभूतं माम् ?-**अल्पश्रुतं**-अल्पं श्रुतं यस्य सः-अल्पश्रुतः, तं अल्पश्रुतं= स्तोकशास्त्रम्, पुनः किंभूतं माम् ?-**परिहासधाम**=हास्यास्पदं, परिहासस्य धाम-परिहासधाम, केषां ?-**श्रुतवतां**=पण्डितानाम्, श्रुतं विद्यते येषां ते श्रुतवतः (वन्तः), तेषां श्रुतवताम्। दृष्टान्तमाह-**किल** इति सत्ये, **यद्**=यस्मात् कारणात्, **मधौ**=वसन्ते, **कोकिलः मधुरं विरौति**=ब्रूते। विरौति इति क्रियापदम्, कः कर्ता ? कोकिलः, किं कर्मतापन्नं ? मधुरं=प्रियं, कस्मिन् ?-मधौ=वसन्ते, किं भूतं ? मधुरं यत् ?-**तत् चारुचूतकलिकानिकरैकहेतुः**, अस्ति। अस्ति इति क्रियापदम्, किंकर्तृ तत् ? मधुरं, किंभूतं तत् ?-चारुचूतनिकरैकहेतुः=मनोज्ञाऽऽम्रमञ्जरीवृन्दैककारणम्,-चारुश्चाऽसौ चूतश्च चारुचूतः, चारुचूतस्य कलिकाः-चारुचूतकलिकाः, चारुचूतकलिकानां निकरः चारुचूतकलिकानिकरः [एकश्चासौ हेतुः-एकहेतुः] चारुचूत-कलिकानिकर एव एकहेतुः-चारुचूतकलिकानिकरैकहेतुः ॥६॥

**त्वत्संस्तवेन भवसन्ततिसन्निबद्धं**
**पापं क्षणात् क्षयमुपैति शरीरभाजाम्।**

**आक्रान्तलोकमलिनीलमशेषमाशु**

**सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥७॥**

**७ कनकसागर०**—हे स्वामिन् ! **त्वत्संस्तवेन शरीरभाजां पापं** क्षणात् **क्षयं उपैति**=प्राप्नोति । उपैति इति क्रियापदम्, किं कर्तृ ?-पापम्, केषां ?-शरीरभाजाम्= प्राणिनाम्, शरीरं भजन्ति इति शरीरभाजः, तेषां शरीरभाजाम्, किं कर्मतापन्नं ?- क्षयं= विनाशम्, केन ?-त्वत्संस्तवेन, संस्तूयते [अनेन] इति संस्तवः, तव संस्तवः [त्वत्संस्तवः], तेन त्वत्संस्तवेन, किंभूतं पापं ?-**भवसन्ततिसन्निबद्धम्,** भवस्य सन्ततिः-भवसन्ततिः, भवसन्तत्या सन्निबद्धम् भवसन्ततिसन्निबद्धम्, कमिव ? **अन्धकारमिव,** यथा **शार्वरं अन्धकारं सूर्यांशुभिन्नं** सत् **आशु**=शीघ्रं क्षयमुपैति, [उपैति इति क्रियापदम्] किंकर्तृ ?-अन्धकारम्, किं कर्मतापन्नम् ?-क्षयं, किंभूतं अन्धकारं ?-**आक्रान्तलोकं**-आक्रान्ता लोका येन तत् आक्रान्तलोकम्, पुनः किंभूतं अन्धकारम् ? **अलिनीलम्**=भ्रमरश्यामम्, अलिवत् नीलं-अलिनीलम्, पुनः किंभूतं अन्धकारम् ?-**अशेषं**=समस्तम्, पुनः किंभूतं अन्धकारम् ?-**सूर्यांशुभिन्नम्,** सूर्यस्य अंशवः=किरणाः सूर्यांशवः, सूर्यांशुभिः भिन्नं=भेदितं-सूर्यांशुभिन्नम्, पुनः किंभूतम् अन्धकारम् ?-शार्वरम्-शर्वर्या इदं शार्वरं रात्रिसम्बन्धिः(न्धि) ॥७॥

**मत्वेति नाथ ! तव संस्तवनं मयेद-**

**मारभ्यते तनुधियाऽपि तव प्रभावात् ।**

**चेतो हरिष्यति सतां नलिनीदलेषु**

**मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥८॥**

**८ कनकसागर०**—हे **नाथ ! इति मत्वा इदं तव संस्तवनं मया आरभ्यते**-कर्मोक्तिः । आरभ्यते इति क्रियापदम्, केन कर्त्रा ?-मया, किं कर्मतापन्नं ?-संस्तवनं= स्तोत्रं, कस्य ? तव, किंभूतं संस्तवनम् ?-इदं=प्रत्यक्षम्, कस्मात् ? **तव प्रभावात्**= भवन्महात्म्यात् (माहात्म्यात्)-अलुक् समासः, किंभूतेन मया ? **'तनुधियाऽपि'**= तुच्छप्रज्ञेनाऽपि, तनुः=स्वल्पा धीर्यस्य सः-तनुधीः, तेन तनुधिया,

किं कृत्वा ?-इति मत्वा=ज्ञात्वा, 'इति' इति किं ? **इदं संस्तवनं, सतां**=पण्डितानां **चेतो**=मन:, **हरिष्यति** । 'हरिष्यति' इति क्रियापदम्, किं कर्तृ ? इदं संस्तवनं, किं कर्मतापन्नं ? चेत:, केषां ? सताम् । दृष्टान्तमाह-'**ननु**' इति प्रश्ने, **उदबिन्दु: नलिनीदलेषु मुक्ता-फलद्युतिं उपैति**= प्राप्नोति। 'उपैति' इति क्रियापदम्, क: कर्ता ?-'उदबिन्दु:' उदकस्य बिन्दु:-उदबिन्दु:, कां कर्मतापन्नम् ?-'मुक्ता-फलद्युतिम् । मुक्ताफलस्य द्युति:-मुक्ताफलद्युति:, तां मुक्ताफलद्युतिम्, केषु ? 'नलिनीदलेषु' =कमलिनीपत्रेषु, नलिन्या: दलानि नलिनीदलानि, तेषु नलिनीदलेषु ॥८॥

**आस्तां तव स्तवनमस्तसमस्तदोषं**
**त्वत्संकथाऽपि जगतां दुरितानि हन्ति ।**
**दूरे सहस्रकिरण: कुरुते प्रभैव**
**पद्माकरेषु जलजानि विकासभाञ्जि ॥९॥**

**९ कनकसागर०**—हे स्वामिन् !—**तव स्तवनं दूरे आस्ताम्**, 'आस्ताम्' इति क्रियापदम्, किंकर्तृ ? '**स्तवनं**'=स्तोत्रम्, कस्य ?-'तव' कस्मिन् ?-'दूरे', किंभूतं स्तवनम् ?-**अस्तसमस्तदोषम्**, समस्ताश्च ते दोषाश्च समस्तदोषा:, अस्ता: समस्तदोषा येन तत्-अस्तसमस्तदोषम् । **त्वत्सङ्कथा-ऽपि जगतां दुरितानि हन्ति**, 'हन्ति' इति क्रियापदम्, का कर्त्री ?-'त्वत्सङ्कथाऽपि' त्वद्वार्त्ताऽपि, तव सङ्कथा [त्वत्सङ्कथा], कानि कर्मतापन्नानि ?-'दुरितानि'=पापानि, केषां ?, जगताम् । उक्तमर्थं दृष्टान्तेन दृढयति-**सहस्रकिरण: दूरे** तिष्ठतु । 'आस्तां' इति क्रियापदम् क: कर्ता ?-'सहस्रकिरण:'=सूर्य:, सहस्रं किरणा यस्य स-सहस्रकिरण:, त(क)स्मिन् ?-दूरे, **प्रभा एव जलजानि विकाशभाञ्जि कुरुते**। 'कुरुते' क्रियापदम्, का कर्त्री ?-'प्रभा एव' कान्ति: एव, कानि कर्मतापन्नानि ? 'जलजानि'= कमलानि, जले जायते (जायन्ते) इति जलजानि, किंभूतानि जलजानि ?-'विकास(श) भाञ्जि'=विकस्वराणि, विकाशं भजन्ते इति विकाशभाञ्जि, केषु ? **पद्माकरेषु**=तटाकेषु, पद्मानां आकरा येषु ते पद्माकरा:, तेषु पद्माकरेषु ॥९॥

**नात्यद्भुतं भुवनभूषणभूत ! नाथ !**
**भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः ।**
**तुल्या भवन्ति भवतो ननु तेन किं वा**
**भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥**

**१० कनकसागर०—**हे **भुवनभूषण ! हे भूतनाथ ! भूतैः गुणैः भवन्तं अभिष्टुवन्तः** जनाः, **भवतः तुल्याः भवन्ति,**। 'भवन्ति' इति क्रियापदम्, के कर्त्तारः ?-जनाः, किं कुर्वन्तः जनाः ?-'अभिष्टुवन्तः', स्तुवन्तः, [कं कर्मतापन्नं ? 'भवन्तं'=] त्वाम्, किंभूताः जनाः ?-'तुल्याः'=समानाः, कस्य ?-'भवतः'=तव, कैः ?-'गुणैः' ज्ञानादिभिः, किंभूतैः गुणैः ?-'भूतैः'=जातैः, कस्यां ?-'भुवि'=पृथिव्याम्, । **एतत् न अत्यद्भुतम्,** न अत्याश्चर्यम्, अतिशयेन अद्भुतम्-अत्यद्भुतम् । हे 'भुवनभूषण ! हे विश्वमण्डन !-भुवनानां भूषणं भुवनभूषणं, तस्य सं-[बोधनम्] हे भुवनभूषण !, हे 'भूतनाथ' हे प्राणिप्रभो !, भूतानां नाथो भूतनाथः, तस्य संबोधनम्-हे 'भूतनाथ !' अथवा हे 'भुवनभूषणभूत !' हे विश्वमण्डनसमान ! भुवनानां भूषणं भुवनभूषणं, भुवनभूषणमिवभुवन-भूषणभूतः तस्य सं[बोधनम्]-हे भुवनभूषणभूत ! हे 'नाथ'=हे प्रभो ! **ननु**=निश्चितं, '**वा**' अथवा, **तेन**= स्वामिना, **किं** भवति ?, अपि तु न किमपि, क्व ?-**इह**=भुवि, तेन केन ? **यः** स्वामी, **आश्रितं**=सेवकं, **भूत्या**=संपदा, **आत्मसमं न करोति ।** 'करोति' इति क्रियापदम्, कथं ?-'न', कः कर्ता ?-'यः', कं कर्मतापन्नम् ?-सेवकम्, किंभूतं, सेवकं ? आश्रितम्, [पुनः-किंभूतम् ?-] 'आत्मसमं' आत्मनः समः-आत्मसमः, तं आत्मसमम्, कया ?-'भूत्या'=ऋद्ध्या ॥१०॥

**दृष्ट्वा भवन्तमनिमेषविलोकनीयं**
**नान्यत्र तोषमुपयाति जनस्य चक्षुः ।**
**पीत्वा पयः शशिकरद्युति दुग्धसिन्धोः**
**क्षारं जलं जलनिधेरसितुं क इच्छेत् ? ॥११॥**

**११ कनकसागर०—जनस्य चक्षुः अन्यत्र तोषं न उपयाति** । 'उपयाति' इति क्रियापदम्, किं कर्तृ ?-'चक्षुः', कस्य ? 'जनस्य'=लोकस्य, कं कर्मतापन्नं ?-'तोषं'

संतोषं, कस्मिन् ?-'अन्यत्र'=परस्मिन्, किं कृत्वा ?-'**दृष्ट्वा**'=विलोक्य, (कं) कर्मतापन्नं ?-'**भवन्तम्**'=त्वाम्, किंभूतं भवन्तम् ?-**अनिमेषविलोकनीयम्,** विलोक्यते[यः]इति विलोकनीयः, 'अनिमेषैः विलोकनीयः-अनिमेषविलोकनीयः, तम् [अनिमेष-विलोक-नीयम्] । उक्तमर्थं दृष्टान्तेन दृढयति-**दुग्धसिन्धोः पयः पीत्वा, जलनिधेः क्षारं जलं अशितुं कः इच्छेत्** ?-अपि तु न कोऽपि। 'इच्छेत्' इति क्रियापदम्, कः कर्ता ?-'कः', किंकर्तुम् ?-'अशितुं', किं कर्मतापन्नम् ?-'जलं', किंभूतं जलं ?'क्षारं'=कटुकम्, कस्य ?-'जलनिधेः'=समुद्रस्य, जलं निधीयते [यत्र]-जलनिधिः, तस्य [जलनिधेः], किंकृत्वा?-'पीत्वा, किं कर्मतापन्नम् ?-'पयः'=पानीयम्, कस्य ?-'दुग्धसिन्धोः' क्षीरसमुद्रस्य, दुग्धस्य सिन्धुः, तस्य [दुग्धसिन्धोः], किंभूतं पयः ?-**शशिकरद्युति,** शशोऽस्यास्ति इति शशी, शशिनः कराः-शशिकराः, शशिकरवत् द्युतिः यस्य तद्, तत् शशिकरद्युति ॥११॥

**यैः शान्तरागरुचिभिः परमाणुभिस्त्वं**
**निर्मापितास्त्रिभुवनैकललामभूत !।**
**तावन्त एव खलु तेऽप्यणवः पृथिव्यां**
**यत् ते समानमपरं नहि रूपमस्ति ॥१२॥**

**१२ कनकसागर०**—अहं एवं मन्ये, हे **त्रिभुवनैकललामभूत !, तेऽपि अणवः पृथिव्यां तावन्त एव वर्त्तन्ते,** वर्त्तन्ते इति क्रियापदम्, के कर्तारः ?-'अणवः', किंभूताः अणवः ?-'तावन्त एव' [तावत् प्र]माणा एव, नाऽन्ये सन्ति इति भावः, कस्यां ?-'पृथिव्यां,' 'खलु' निश्चयेन। त्रयाणां भुवनानां समाहारः-त्रिभुवनम्, त्रिभुवने एकोऽद्वितीयो ललामः [त्रिभुव-नैकललाम इव ] त्रिभुवनैकललामभूतः, तस्य संबोधनम्-हे त्रिभुवन [ललामभूत ! ] किंभूता अणवः ?-'ते', अणवः ते के ? 'यैः' **परमाणुभिः त्वं निर्मापितः**= निष्पादितः, कर्मोक्तिः । 'निर्मापित' इति क्रियापदम्, कैः कर्तृभिः ?-'परमाणुभिः' परमाश्च ते अणवश्च ते परमाणवः, तैः परमाणुभिः, कः कर्मतापन्नः ?-'त्वं', किंभूतैः परमाणुभिः ?-**शान्तरागरुचिभिः**= उपशमरसनिष्पन्नैः इत्यर्थः, शान्तश्चासौ रागश्च शान्तरागः, शान्तरागस्य रुचिर्येषु ते

शान्तरागरुचय:, तै: [शान्तरागरुचिभि:], अथवा हे 'शान्तराग ! हे-वीतराग !, शान्तो रागो यस्य स: शान्तराग:, तस्य संबो[धनम्]-हे [शान्त-राग !, काभि: ?]-'रुचिभि: 'परमकान्तिभि: उत्तमाऽणुभि:, इति कर्तृपदम्, **अणुभि:** परमाणुभि: इत्यर्थ:, कथमेवं ज्ञायते ?-**यत्** यस्मात् कारणात्, **हि** निश्चितं, **ते** तव, **समानं अपरं रूपं नाऽस्ति** । 'अस्ति' इति क्रियापदम्, 'अस्ति'=विद्यते, कथं ?-'न' किं कर्तृ ?-'रूपं', किंभूतं रूपं ?-'अपरं' अन्यत्, पुन: किंभूतं रूपं ?-'समानं'=तुल्यं, कस्य ? 'ते' तव ॥१२॥

**वक्त्रं क्व ते सुरनरोरगनेत्रहारि**

**नि:शेषनिर्जितजगत्त्रितयोपमानम् ।**

**बिम्बं कलङ्कमलिनं क्व निशाकरस्य**

**यद् वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥**

**१३ कनकसागर०**—द्वौ 'क्व' शब्दौ अत्यन्ताऽसङ्गततावाचकौ भवत:, हे जिनेन्द्र ! **ते** तव, **वक्त्रं**=मुखं **क्व** वर्त्तते, तथा **निशाकरस्य बिम्बं**=मण्डलं **क्व** वर्तते। वर्त्तते इति क्रियापदम्, किं कर्तृ ?-वक्त्रं, कस्य ?- ते=तव, किंभूतं वक्त्रं ? **सुरनरोरगनेत्रहारी ( रि ),** । सुराश्च नराश्च उरगाश्च-सुरनरोरगा:, सुरनरोरगाणां नेत्राणि हरति इत्येवंशीलं, सुरनररोरग-नेत्रहारि, पुन: किंभूतं वक्त्रम् ?- **नि:शेषनिर्जितजगत्त्रितयोपमानम्** । जगतां त्रितयं जगत्त्रितयं, जगत्त्रितयस्य उपमा[ना]नि-जगत्त्रितयोपमानानि, नि:शेषेण निर्जितानि-नि:शेषनिर्जितानि, नि:शेषनिर्जितानि जगत्त्रितयोपमानानि येन तत्-नि:शेषनिर्जितजगत्त्रितयोपमानम्, किंभूतं बिम्बम् ?-**कलङ्क-मलिनम्** । कलङ्केन मलिनम्, कलङ्कमलिनम् । चन्द्रबिम्बं **वासरे**=दिवसे **पाण्डुपलाशकल्पम्** भवति, जीर्णं पिक्क-(पक्व) पाण्डुरवर्णपत्रसदृशं भवति, पाण्डु च तत् पलाशं च-पाण्डुपलाशं, पाण्डुपलाशस्य कल्पं पाण्डुपलाश-कल्पम्। तेन त्वन्मुखस्योपमानं चन्द्रस्य न घटते ॥१३॥

**सम्पूर्णमण्डलशशाङ्ककलाकलाप-**

**शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।**

**ये संश्रितास्त्रिजगदीश्वर ! नाथमेकं**

**कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥१४॥**

**१४ कनकसागर०**—हे जिन ! **जगदीश्वर** ! **तव गुणा**:=क्षमादय: **ते त्रिभुवनं लङ्घयन्ति**। लङ्घयन्ति इति क्रियापदम्। के कर्तार: ?-'गुणा:', कस्य ?-तव, किं कर्मतापन्नम् ?-'त्रिभुवनम्', त्रयाणां भुवनानां समाहार:-त्रिभुवनम्, किंभूता गुणा: ?-**सम्पूर्णमण्डलशशाङ्ककला-कलापशुभ्रा**:-सम्पूर्णं मण्डलं यस्य स:-संपूर्णमण्डल:, शशोऽङ्के यस्य स:-शशाङ्क:, सम्पूर्णमण्डलश्चासौ शशाङ्कश्च संपूर्णमण्डलशशाङ्क:, कलानां कलाप:-कलाकलाप:, संपूर्णमण्डलशशाङ्कस्य कलाकलाप:-संपूर्णमण्डलशशाङ्ककलाकलाप:, संपूर्णमण्डलशशाङ्ककला-कलापवत् शुभ्रा:-सम्पूर्णमण्डल-शशाङ्ककलाकलापशुभ्रा:, **ये** गुणा:, **एकं अद्वितीयं नाथं**-प्रभुम् संश्रिता: '**संश्रिता**' इति क्रियापदम् के कर्त्तार: ?-'ये गुणा:' कं कर्मतापन्नं ? 'नाथं'=स्वामिनम्, किंभूतं नाथं ?-एकम्। तान् गुणान् **यथेष्टं सञ्चरन्त: ( रत: ) को निवारयति** को निषेधयति ?-अपि तु न कोपि । 'निवारयति' इति क्रियापदम्, क: कर्ता ?-'क:' कान् कर्मतापन्नान् ?-'तान् गुणान्', किंकुर्वत:=तान् ? 'सञ्चरन्त:(रत:)'=परिभ्रमत:, कथं ?-'यथेष्टम्'= स्वेच्छया इष्टं अनतिक्रम्य-यथेष्टम् ॥१४॥

**चित्रं किमत्र यदि ते त्रिदशाङ्गनाभिर्-**
**नीतं मनागपि मनो न विकारमार्गम्।**
**कल्पान्तकालमरुता चलिताचलेन**
**किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥१५॥**

**१५ कनकसागर०**—हे जिनेन्द्र ! **तव मन: मनागपि**= अल्प-मात्रमपि **त्रिदशाङ्गनाभि**:-देवीभि: **विकारमार्गं न नीतं**=प्रापितम्, कर्मोक्ति: । द्विकर्मक: । 'नीतं' इति क्रियापदम्, काभि: कर्तृ[का]भि:-?-'त्रिदशाङ्गनाभि:',-तिस्रो दशा येषां ते-त्रिदशा:-देवा:, त्रिदशानां 'अङ्गना:'-त्रिदशाङ्गना:, ताभि:, किं कर्मतापन्नं ?-'मन:'=चित्तं, किं कर्मतापन्नम् ?-'विकारमार्गम्' कन्दर्पवशं, विकारस्य मार्ग:-विकारमार्ग:, तं विकारमार्गम्। **अत्र**=अस्मिन् अर्थ, **किं चित्रं**=किमाश्चर्यम् ? अपि तु न किमपि । उक्तमर्थं दृष्टान्तेन दृढयति । **कदाचित्** प्रस्तावे-**कल्पान्तकालमरुता किं मन्दराद्रिशिखरं चलितं**=स्वस्थानात्, किं[चलितम्]=किं धूतं ? अपि तु न चलितं-

कर्मोक्तिः । 'चलितं' इति क्रियापदम्, केन कर्त्रा ?-'कल्पान्तकालमरुता'-कल्पस्य अन्तः-कल्पान्तः, कल्पान्तश्चाऽसौ कालश्च-कल्पान्तकालः, कल्पान्तकालस्य मरुत्-कल्पान्तकालमरुत्, तेन कल्पान्त-कालमरुता, किं कर्मतापन्नम् ?-'मन्दराद्रिशिखरम्'=मेरुशृङ्गम्, किंभूतेन कल्पान्तकालमरुता ?-**चलिता-ऽचलेन**-'चलिताः'=कम्पिताः, 'अचलाः'= पर्वता येन सः-चलिताचलः, तेन चलि[ताचलेन] ॥१५॥

**निर्धूम-वर्तिरपवर्जिततैलपूरः**
**कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।**
**गम्यो न जातु मरुतां चलिताचलानां**
**दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥१६॥**

१६ **कनकसागर०**—हे स्वामिन् ! **त्वं अपरः**=अपूर्वः **दीपोऽसि**=वर्त्तते(से) । 'अस्ति' इति क्रियापदम् ?-कः कर्ता ? त्वम् ?, किंभूतः त्वं ?-'दीपः'=कज्जलध्वजः । पुनः किंभूतः त्वम् ?-'अपरः' पुनः किंभूतः त्वम् ?-**निर्धूम-वर्त्तिः**-धूमश्च वर्त्तिश्च-धूमवर्त्ती, निर्गते धूम-वर्त्ती यस्य सः- निर्धूम-वर्त्तिः, कोप-[काम]दशाभ्यां रहित इत्यर्थः । प्रदीपे धूम-वर्त्ती भवेताम्, पुनः किंभूतः त्वम् ?-**अपवर्जिततैलपूरः**-त्यक्तस्नेहपूरः, तैलस्य पूरः-तैलपूरः-अपवर्जितः तैलपूरो येन सः-अपवर्जिततैलपूरः, हे नाथ ! **इदं कृत्स्नं जगत्त्रयं** त्वं प्रकटीकरोषि । अप्रकटं प्रकटं करोषि इति प्रकटीकरोषि । कः कर्ता ?-त्वं, किं कर्मतापन्नम् ?-'जगत्त्रयं' जगतां त्रयं-जगत्त्रयं, किंभूतं जगत्त्रयं ?-'इदं' प्रत्यक्षम्, [कदा ?-] 'जातु'-कदाचित् । **त्वं मरुतां न गम्योऽसि** । 'असि' इति क्रियापदम्, कः कर्ता ?-त्वम्, किंभूतः त्वम् ?-'गम्यः' वशः, कथं ?-'न', केषां ?-'मरुतां'-वातानाम्, किंभूतानां मरुताम् ?-**चलिताऽचलानाम्**-चलिता अचला यैः, ते चलिताऽचलाः-तेषां चलिताऽचलानाम्, । भवस्य(भवतः) पक्षे-'मरुताम्'= देवानां, न गम्यः न वशः । किं भूतः त्वम् ?-**जगत्प्रकाशः**-जगत्सु प्रकाशो यस्य सः- जगत्प्रकाशः ॥१६॥



**नास्तं कदाचिदुपयासि न राहुगम्यः**
**स्पष्टीकरोषि सहसा युगपज्जगन्ति।**
**नाम्भोधरोदरनिरुद्धमहाप्रभावः**
**सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥१७॥**

**१७ कनकसागर०**—हे **मुनीन्द्र ! कदाचित्**=प्रस्तावे, **त्वं अस्तं न उपयासि** । 'उपयासि' इति क्रियापदम्, कः कर्ता ?-'त्वम्', कं कर्मता-पन्नम् ?-'अस्तं'-क्षयं, कथम् ?-'न', किंभूतः त्वम् ?-**सूर्यातिशयि-महिमा**=सूर्याऽधिकमहत्वः, सूर्यं अतिशेते इत्येवंशीलः-सूर्यातिशायी, सूर्यातिशायी महिमा यस्य सः-सूर्यातिशायिमहिमा, । सूर्यः अस्तं उपयाति, त्वं तु सदा प्रकाशरूपः, ततस्त्वम् **राहुगम्यो नाऽसि** । 'असि' इति क्रियापदम्, कः कर्ता ?-त्वम्, किंभूतः त्वम् ?-'राहुगम्यः', राहोः गम्य राहुगम्यः, कथं ?-'न', **सहसा**-शीघ्रं, [पुनः कथम् ?-] **युगपत्**-समक्षणात्, त्वं **जगन्ति स्पष्टीकरोषि**-[अस्पष्टं स्पष्टं], करोषि इति स्पष्टीकरोषि, कः कर्ता ?-त्वम्, कानि कर्मतापन्नानि ?-'जगन्ति' त्रिभुवनानि, रविस्तु भुवनैकदेशं प्रकाशयति, अपरं त्वं **अम्भोधरोदरनिरुद्धमहाप्रभावो नाऽसि**-अम्भः-पानीयं, धरति इति 'अम्भोधरः'-मेघः, अम्भोधरस्य 'उदरं' मध्यं-अम्भोधरोदरम्, अम्भोधरोदरेण 'निरुद्धः-अम्भोधरोदरनिरुद्धः, महांश्चासौ प्रभावश्च-महाप्रभावः, अम्भोधरोदरनिरुद्धः महाप्रभावः यस्य सः-अम्भोधरोदरनिरुद्धमहाप्रभावः ॥१७॥



**नित्योदयं दलितमोहमहान्धकारं**
**गम्यं न राहुवदनस्य न वारिदानाम्।**
**विभ्राजते तव मुखाब्जमनल्पकान्ति**
**विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥**

**१८ कनकसागर०**—हे जिनेन्द्र ! **तव मुखाब्जं** अपूर्वशशाङ्क-बिम्बं विभ्राजते, शोभते । 'विभ्राजते' इति क्रियापदम्, किं कर्तृ ? मुखाब्जं=वदनकमलम्, मुखमेव अब्जं-मुखाब्जं, किंभूतं मुखाब्जं ?-'अपूर्वशशाङ्कबिम्बम्'-शशः अङ्के यस्य सः-शशाङ्कः, शशाङ्कस्य बिम्बं-शशाङ्कबिम्बम्, अपूर्वं च तत् शशाङ्क-

बिम्बं-अपूर्वशशाङ्क-बिम्बम्। पुनः किंभूतं मुखाब्जं? **नित्योदयं**-नित्यं उदयो यस्य तत्-नित्योदयम्, पुनः किंभूतं मुखाब्जम्?-**दलितमोहमहान्धकारम्**-महांश्चासौ अन्धकारश्च महान्धकारः, मोह एव महान्धकारः-मोहमहान्धकारः, दलितः मोहमहान्धकारो येन तत्-दलितमोहमहान्धकारम्, पुनः किंविशिष्टं मुखाब्जम्?-**न गम्यं** न वशम्, कस्य?-**राहुवदनस्य**-राहोर्वदनं-राहुवदनं, तस्य राहुवदनस्य, पुनः किंभूतं मुखाब्जं? [न गम्यं, केषाम्?-] **वारिदानाम्,** वारि ददति इति 'वारिदाः' मेघाः, तेषां वारिदानाम्-न गम्यम्। पुनः किं लक्षणं मुखाब्जम्?-**अनल्पकान्ति**-न अल्पा-अनल्पा, अनल्पा कान्तिर्यस्य तत्-अनल्पकान्ति, किं कुर्वत् [मुखाब्जम्]?-'**विद्योतयत्**-प्रकाशयत्, किं कर्मतापन्नम्?-**जगत्**=विश्वम्॥१८॥

**किं शर्वरीषु शशिनाऽह्नि विवस्वता वा?**

**युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ!।**

**निष्पन्नशालिवनशालिनि जीवलोके**

**कार्यं कियज्जलधरैर्जलभारनम्रैः?॥१९॥**

**१९ कनकसागर०**—हे **नाथ**! **शर्वरीषु**=रजनीषु, **शशिना किं कार्यम्** भवति?, [वा=] अथवा **अह्नि**=दिवसे, **विवस्वता**-सूर्येण, किं [कार्यम्] भवति?, । केषु सत्सु? **तमस्सु** सत्सु, किंविशिष्टेषु तमस्सु?-**युष्मन्मुखेन्दुदलितेषु,** [1]मुखमेव इन्दुर्मुखेन्दुः [युष्माकं मुखं-युष्मन्मुखम्], युष्मन्मुखेन्दुना दलितानि-युष्मन्मुखेन्दुदलितानि तेषु युष्मन्मुखेन्दुदलितेषु । उक्तमर्थं दृष्टान्तेन दृढयति-**निष्पन्नसा( शा )लिवनशालिनि जीवलोके** सति **जलधरैः कियत् कार्यं** भवति? न किमपि भवति। किं कर्तृ?-'कार्यम्', किंविशिष्टं कार्यम्?-'कियत्'=कति, कैः?-जलधरैः-जलानि धरंति इति जलधराः, तैर्जलधरैः-मेघैः, क्व?-जीवलोके=मनुष्यलोके,-जीवानां लोको जीवलोकः, तस्मिन् [जीवलोके], किं [विशिष्टे] जीवलोके?-'निष्पन्न-शालि[वनशालि]नि', निष्पन्नाश्च ते शालयश्च निष्पन्नशालयः, निष्पन्नशालीनां वनानि निष्पन्नशालिवनानि, निष्पन्नशालिवनैः

१. अत्र 'युष्मन्मुखं' इति षष्ठ्या समासे कृते, युष्मन्मुखस्य, इन्दुना सह समासो युज्यते।

शालते इत्येवं-शीलः-निष्पन्नशालिवनशाली, तस्मिन् [निष्पन्नशालिवनशालिनि], किं[भूतैः] जलधरैः ?-जलभारनम्रैः ॥१९॥

**ज्ञानं यथा त्वयि विभाति कृतावकाशं**
**नैवं तथा हरिहरादिषु नायकेषु।**
**तेजः स्फुरन्मणिषु याति यथा महत्त्वं**
**नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥**

२० **कनकसागरः**—हे स्वामिन् ! **यथा** येन प्रकारेण, **त्वयि** [तव]विषये **ज्ञानं विभाति**। 'विभाति' इति क्रियापदम्, किं कर्तृ ?-'ज्ञानम्', कस्मिन् ?-त्वयि। किंभूतं ज्ञानं ?-**कृतावकाशम्,** कृतः अवकाशः येन [तद्]-कृतावकाशम्। **तथा** तेन प्रकारेण, **हरि-हरादिषु नायकेषु न** विभाति। 'विभाति' इति क्रियापदम्, किं कर्तृ ?-ज्ञानम्, कथं ?-'न', किंभूतं ज्ञानम् ?-'**एवं**' तादृशं, केषु ? 'नायकेषु'=देवेषु, किंभूतेषु नायकेषु ?-'हरि-हरादिषु' हरिश्च हरश्च हरि-हरौ, हरि-हरौ आदि(दौ) येषां ते हरि-हरादयः, तेषु हरि-हरादिषु। उक्तमर्थं दृष्टान्तेन दृढयति-यथा येन प्रकारेण **तेजो**=धाम, [स्फुरन्] **मणिषु**=रत्नेषु, **महत्वं**=महिमानं, **याति**=प्राप्नोति। 'याति' इति क्रियापदम्, किं कर्तृ ?-'तेजः' किं कर्मतापन्नम्' ? 'महत्वं', केषु ? '**स्फुरन्मणिषु**'-स्फुरन्तो मणयो [1]येषु ते-स्फुरन्मणयः, तेषु स्फुरन्मणिषु। '**तु**' पुनः एवंविधं तेजः **काचशकले** महत्वं **न याति**। 'याति' इति क्रियापदम्, किं कर्तृ ?-तेजः, कथं ?-'न', किंभूतं तेजः ?-'एवं'=तादृशम्, कस्मिन् ? [काचशकले] काचस्य शकलं=खण्डः, काचशकलं, तस्मिन् काचशकले, किंभूते काचशकले ?-**किरणाकुलेऽपि**-किरणैः आकुलं व्याप्तं किरणाकुलं, तस्मिन् कि[रणा-कुले]। काचखण्डतुल्याः हरि-हरादयः, मणितुल्यो जिनेन्द्रः-इति भावः ॥२०॥

**मन्ये वरं हरिहरादय एव दृष्टा**
**दृष्टेषु येषु हृदयं त्वयि तोषमेति।**
**किं वीक्षितेन भवता भुवि येन नान्यः**
**कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥२१॥**

१. कर्मधारयः समुचितः प्रमादोऽयं संभाव्यते लिपिकारस्य टीकाकर्त्तुर्वा

२१ कनकसागर०—हे मुनीन्द्र ! **यन्मया हरि-हरादयः एव देवा दृष्टाः**= कर्मोक्तिः, केन कर्त्रा ? 'मया', किं कर्मतापन्नाः ? देवाः, किंभूताः देवा ?-'हरि-हरादयः,-हरिश्च हरश्च हरि-हरौ, [हरि-हरौ] आदि (आदौ) येषां ते हरि-हरादयः=विष्णु-महेशादयः, विलोकिताः, तदयं **वरं मन्ये** प्रधानं जा(म)न्ये, **येषु** देवेषु **दृष्टेषु** सत्सु, **त्वयि**[तव]विषये, **हृदयं तोषं एति**= प्राप्नोति। 'एति' इति क्रियापदम्, किंकर्तृ ? हृदयं=चित्तम्, कं कर्मतापन्नम् ? 'तोषं'=प्रमोदम्, कस्मिन् सति ?-त्वयि [तव]विषये, केषु सत्सु ?-हरि-हरादिषु देवेषु दृष्टेषु सत्सु=अवलोकितेषु सत्सु, **भवता** त्वया, **वीक्षितेन** किं जातम् ?-**येन** प्रकारेण, **अन्यो**ऽपरः कश्चिद् देवः भवान्तरेऽपि मनो न हरति=न गृह्णाति, 'हरति' इति क्रियापदं, कः कर्ता ? 'अन्यः' कश्चिद् देवः, किं कर्मतापन्नं ?-'मनः'=चित्तं, कथं ?-'न', कस्मिन् भवान्तरेऽपि=अन्य-जन्मनि अपि, एकस्मात् भवाद् अन्यो भवो भवान्तरं, तस्मिन् भवान्तरेऽपि। क्व ?-भुवि लोके ॥२१॥

**स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्**
**नान्या सुतं त्वदुपमं जननी प्रसूता।**
**सर्वा दिशो दधति भानि सहस्त्ररश्मिं**
**प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥२२॥**

२२ कनकसागर०—हे देवेन्द्रपूज्य ! **स्त्रीणां**=नारीणां **शतानि, शतशः पुत्रान् जनयन्ति**। 'जनयन्ति' इति क्रियापदम्, कानि कर्तृणि ? 'स्त्रीणां शतानि', कान् कर्मतापन्नान् ?-'पुत्रान्' ?, किंभूतान् पुत्रान् ? 'शतशः'=अनेकान् , शतं वारान् इति शतशः । **अन्या जननि**(नी) **त्वदुपमं सुतं प्रसूता**=अजीजनत् । 'प्रसूता' इति क्रियापदम्, का कर्तृ(र्त्री)?-'जननी'=माता, कं कर्मतापन्नम् ?-'सुतं', पुत्रम्, किंभूतं सुतं ? 'त्वदुपमम्'-तव उपमा यस्य सः त्वदुपमः, तं त्वदुपमम्, कथं ? 'न', । दृष्टान्तमाह-**सर्वाः दिशः भानि दधति**=बिभ्रति । 'दधति' इति क्रियापदम्, काः कर्त्र्यः? 'दिशः', कानि कर्मतापन्नानि ?-'भानि'=नक्षत्राणि, किंभूताः दिशः ?-'सर्वाः' । **सहस्त्ररश्मिं** श्रीसूर्यं **प्राची एव दिग् जनयति**- पूर्वा एव दिग् प्रकटयति

अन्या दिग् न । जनयति इति क्रियापदम्, का कर्त्री ? दिक्, कं कर्मतापन्नं ?-'सहस्त्ररश्मिं'-सहस्त्रं रश्मयः किरणा यस्य सः-सहस्त्ररश्मिः, तं सहस्त्ररश्मिं, किंभूता दिग् ?-'प्राची एव'=पूर्वा एव, किंभूतं-सहस्त्ररश्मिम् ?-**स्फुरदंशुजालम्**-स्फुरन्तश्च ते अंशवश्च-स्फुरदंशवः, स्फुरदंशूनां जालं यत्र तत्-स्फुरदंशुजालम् ॥२२॥

**त्वामामनन्ति मुनयः परमं पुमांस-**
**मादित्यवर्णममलं तमसः परस्तात् ।**
**त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं**
**नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥२३॥**

२३ **कनकसागर०**—हे **मुनीन्द्र** ! **मुनयः त्वां परमं पुमांसं आमनन्ति**=कथयन्ति । 'आमनन्ति' इति क्रियापदम्, के कर्त्ता(रः) ?-'मुनयः' साधवः, कं कर्मतापन्नम् ?-त्वाम्, [किंभूतं त्वाम् ?-] 'पुमांसं' पुरुषं, पुनः किंभूतं त्वाम् ?-'परमं' उत्कृष्टं, पुनः किंभूतं ?-**अमलं** सकल[राग]-द्वेषमलरहितम्, न विद्यते मलो यस्य सः-अमलः, तं अमलम्, पुनः किंभूतं त्वाम् ?-**आदित्यवर्णं**-आदित्यस्येव वर्णो यस्य सः-आदित्यवर्णः, तं आदित्यवर्णम् । कथम् ?-**पुरस्तात्,** कस्य ?-**तमसः**=अज्ञानस्य । **त्वां**=भवन्तं, **उपलभ्य मुनयः मृत्युं** कृतान्तभयं **जयन्ति**=स्पो(स्फो)टयन्ति । [जयन्ति] इति क्रियापदम्, के कर्तारः ?-'मुनयः', कं कर्मतापन्नम् ? 'मृत्युम्'=मरणम्, किं कृत्वा ?-'उपलभ्य'=प्राप्य, कं कर्मतापन्नम् ?-'त्वाम्' कस्य ? **शिवपदस्य**=मोक्षस्थानस्य, **अन्यः** चित्यः[?] अपरः **पन्थाः** मार्गो न अस्ति । अस्ति इति क्रियापदम् ?, कः ?-'पन्थाः', किंभूतः पन्थाः ? अपरः अन्यः ('अन्यः'= अपर), कथं ?-'न', कस्य ? 'शिवपदस्य', किंभूतः पन्थाः ?-'**सम्यग्**'=समचीनः, पुनःकिंभूतः पन्थाः ?-**शिवः**=निरुपद्रवः ॥२३॥

**त्वामव्ययं विभुमचिन्त्यमसङ्ख्यमाद्यं**
**ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम् ।**
**योगीश्वरं विदितयोगमनेकमेकं**
**ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२४॥**

२४ **कनकसागर०**—हे भगवन् ! **सन्तः** पण्डिताः, **त्वां** एवंविधं **प्रवदन्ति**=प्रकर्षेण ब्रुवते । 'प्रवदन्ति' इति क्रियापदम्, के कर्त्तारः ?-'सन्तः', पण्डिताः, कं कर्मतापन्नम् ?-'त्वाम्,' किंभूतं त्वाम् ?-**अव्ययम्** न विद्यते व्ययः क्षयो यस्य सः-अव्ययः, तम् अव्ययम्, पुनः किंभूतं त्वाम् ?-**विभुं**=प्रभुम्, पुनः किंभूतं त्वाम् ?-**अचिन्त्यं** [अ]चिन्तनार्हम्,-न चिन्त्यः- अचिन्त्यः, तं अचिन्त्यम्, पुनः किं [भूतं त्वाम्] ?-**असङ्ख्यम्**-न विद्यते सङ्ख्या यस्य सः-असङ्ख्यः, तं असङ्ख्यम्, पुनः किं[भूतं त्वाम्] ?-**आद्यं**=प्रथमम्, पुनः किंभूतं त्वाम् ?-**ब्रह्माणम्**, बृंहति-अनन्तानन्देन वद्र्धते इति ब्रह्मा, तं ब्रह्माणम्, पुनः किंभूतं त्वाम् ?-**ईश्वरम्**-ईष्टे इति ईश्वरः, तं ईश्वरम्, पुनः किंभूतं त्वाम् ?-'**अनन्तम्**-न विद्यते अन्तो यस्य सः-अनन्तः, तं अनन्तं, मृत्युरहितम् इत्यर्थः, पुनः किंभूतं त्वाम् ?-**अनङ्गकेतुम्**-अनङ्गे केतुः-अनङ्गकेतुः [तं अनङ्गकेतुम्] कामनाशनम् इत्यर्थः, पुनः किंभूतं त्वाम् ?-**योगीश्वरम्**-योगो विद्यते येषां ते योगिनः, योगिनां ईश्वरः-योगीश्वरः, तं योगीश्वरम्, पुनः किं[भूतं त्वाम्] ?-**विदित-योगम्**-विदितो योगो येन सः-विदितयोगः, तं विदितयोगम्, पुनः किंभूतं त्वाम् ?-**अनेकम्**-न एको(कः) अनेकः, तं अनेकम्, ज्ञानेन सर्वगतत्वात्, पुनः किंभूतं त्वाम् ?-**एकं**-अद्वितीयम्, जीवद्रव्याद्यपेक्षया, पुनः किं[भूतं त्वाम्] ?-**ज्ञानस्वरूपम्**-ज्ञानमेव स्वरूपं यस्य सः-ज्ञानस्वरूपः, तं ज्ञानस्वरूपम्, पुनः किंभूतं त्वाम् ?-**अमलम्**-न विद्यते मलो यस्य सः-अमलः, तं अमलम्, अष्टादश दोषरहितम्, [१]पञ्चदश उक्तदोषा पृथक्तया ज्ञेया ॥२४॥

**बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्**
**त्वं शङ्करोऽसि भुवनत्रयशङ्करत्वात् ।**
**धाताऽसि धीर ! शिवमार्गविधेर्विधानाद्**
**व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥२५॥**

१. एतच्छ्लोके पञ्चदशगुणाः वर्णितास्ततो तत्प्रतिपक्षभूताः पंचदशदोषाः संभाव्यते।

**२५ कनकसागर०**—हे **विबुधार्चित** ? देवमहित ! **त्वमेव बुद्धः** अस्ति(असि)। अस्ति(असि) इति क्रियापदम्, कः कर्ता ? 'त्वमेव', किंभूतः त्वम् ? 'बुद्धः' ज्ञानवान्, कस्मात् ? **बुद्धिबोधात्**-मतिप्रकाशात्, बुद्धेः बोधः-बुद्धिबोधः, तस्मात् बुद्धिबोधात्, [किं संबोधने ? विबुधार्चित ?]-विबुधैः अर्चितः-विबुधार्चितः, तस्य संबोधने-हे विबुधार्चित। **त्वं शङ्करोऽसि**-शम्भुः, शं करोति इति शङ्करः, कस्मात् ?-**भुवनत्रय-शङ्करत्वात्**, भुवनानां त्रयं-भुवनत्रयं, शङ्करस्य भावः-शङ्करत्वं, भुवन-त्रयस्य शङ्करत्वम् भुवनत्रयशङ्करत्वम्, तस्मात्-भुवनत्रयशङ्करत्वात्, हे **धीर** ! त्वं **धाता असि**-विधाता विद्यसे। 'असि' इति क्रियापदम्, कः कर्ता ?-'त्वम्', किंभूतः त्वम् ?-'धाता' विधाता, कस्मात् ? **विधानात्**, कस्य ?-**शिवमार्गविधेः** मोक्षपंथ(पथ) क्रियायाः, शिवस्य मार्गः शिवमार्गः, शिवमार्गस्य विधिः-शिवमार्गविधिः, तस्य शिवमार्गविधेः, हे **भगवन् व्यक्तं**=प्रगटं, **त्वमेव पुरुषोत्तमोऽसि**। 'अस्ति(सि') इति क्रियापदम्, कः कर्ता ? 'त्वमेव', किंभूतः त्वम् ?-'पुरुषोत्तमः', पुरुषेषु उत्तमः-पुरुषोत्तमः, [किं संबोधने ?-हे भगवन् !]-'भगो' ज्ञानं अस्य अस्ति इति भगवान्, तस्य संबोधने-हे भगवन् ! ॥२५॥

**तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !**
**तुभ्यं नमः क्षितितलामलभूषणाय।**
**तुभ्यं नमस्त्रिजगतः परमेश्वराय**
**तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥२६॥**

**२६ कनकसागर०**—हे **नाथ** ! **ते**=तुभ्यं-भवते, **नमो** अस्तु। अस्तु इति क्रियापदम्, किंकर्तृ ?-'नमः', कस्मै ? 'तुभ्यम्', किंविशिष्टाय तुभ्यम् ?-**त्रिभुवनार्त्तिहराय**-त्रयाणां भुवनानां समाहारः-त्रिभुवनम्, त्रिभुवनस्य अर्त्तिः-त्रिभुवनाऽर्त्तिः, त्रिभुवनार्त्तिं हरति इति त्रिभुवनार्त्तिहरः-तस्मै त्रिभुवनातिहराय। [पुनः] ते **तुभ्यं नमो**[ऽस्तु], अस्तु इति क्रियापदम्, किं कर्तृ ?-'नमः', तुभ्यं किंलक्षणाय ?-**क्षितितलाऽमलभूषणाय**-क्षितेः तलं-क्षिति-तलम्, न विद्यते मलो

यत्र, तद् अमलम्, अमलं च तद् भूषणम्-अमल-भूषणम्, क्षितितलस्य अमलभूषणं-क्षितितलाऽमलभूषणम्, तस्मै क्षितितला-ऽमलभूषणाय। [पुनः] **तुभ्यं नमः**, अस्तु [इति क्रियापदम्, किं कर्तृ ?-'नमः', कस्मै ?-'तुभ्यं,'] किं [भूताय] तुभ्यम् ?-**परमेश्वराय**, परमश्चासौ ईश्वरश्च-परमेश्वरः, तस्मै परमेश्वराय, कस्य ?-**त्रिजगतः**, त्रयाणां जगतां समाहारः त्रिजगत्, तस्य [त्रिजगतः], हे **जिन ! तुभ्यं नमः**। अस्तु, किं [नमः], [कस्मै ?] तुभ्यं, [किंभूताय तुभ्यम् ?]-**भवोदधिशोषणाय**, भव एव उदधिः-भवोदधिः, भवोदधेः शोषणं(येन-सः भवोदधिशोषणः, अथवा भवोदधिं शोषयति-भवोदधिशोषणः) तस्मै-भवो० [दधिशोषणाय] ॥२६॥

**को विस्मयोऽत्र यदि नाम गुणैरशेषैस्-**
**त्वं संश्रितो निरवकाशतया मुनीश !।**
**दोषैरुपात्तविविधाश्रयजातगर्वैः**
**स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥२७॥**

२७ **कनकसागर०**—हे **मुनीश ! नाम** इति कोमलामन्त्रणे । **यदि निरवकाशतया, अशेषैः गुणैः त्वं संश्रितः** । 'संश्रित' इति क्रियापदम्, संश्रितः=आश्रितः, कर्मोक्तौ अशुद्धक्रिया, कैः कर्तृभिः ?-'गुणैः', कः कर्मतापन्नः ? 'त्वम्', किंलक्षणैः गुणैः ? 'अशेषैः'=समस्तैः, न विद्यते शेषो येषु ते-अशेषाः, तैः [अशेषैः], कया ?-'निरवकाशतया'-निरवकाशतः, या(वा) सर्वाङ्गव्यापकतया, निर्गतः अवकाशाद् इति निरवकाशः, निरवकाशस्य भावो-निरवकाशता, तया [निरवकाशतया], [किं सम्बोधने ?-हे मुनीश !]-मुनीनां ईशः मुनीशः, तस्याऽऽमन्त्रणं-हे मुनीश !। **अत्रार्थे को विस्मयः** किं कौतुकं अस्ति, **दोषैर्दूषणैः स्वप्नान्तरे कदाचिदपि त्वं न ईक्षितोऽसि**। 'असि' इति क्रियापदं, कः कर्ता ?-'त्वं', किंलक्षणः त्वं ?-'ईक्षितः=विलोकितः, कथं ?-'न', कैः ?-दोषैः, कस्मिन् ?-'स्वप्नान्तरेऽपि-स्वप्नावस्थायामपि, एकस्मात् स्वप्नादन्य[त्]स्वप्नम्-स्वप्नान्तरम्, तस्मिन् [-स्वप्नान्तरे], **कदाचिदपि** कस्मिंश्चिदपि, किमाश्चर्यम्, अत्र यतो गु(ग)रुड-दर्शनात् भुजङ्गा इव, सूर्येक्षणात् तमश्चर्या (तमस्विन्यः) इव दूरतो नश्यन्ति, तथा

विभोः दोषा नेशुः, । किं[भूतैः] दोषैः ?-**उपात्तविविधाश्रयजातगर्वैः**-विविधाश्च ते आश्रयाश्च विविधाश्रयाः, उपात्ताश्च ते विविधाश्रयाश्च उपात्त-विविधाश्रयाः, उपात्तविविधाश्रयै र्जातो गर्वो येषां ते-उपात्तविविधा-श्रयजातगर्वाः, तैः उपात्तविविधाश्रयजातगर्वैः, ॥२७॥

**उच्चैरशोकतरुसंश्रितमुन्मयूख-**
**माभाति रूपममलं भवतो नितान्तम् ।**
**स्पष्टोल्लसत्किरणमस्ततमोवितानं**
**बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥२८॥**

**२८ कनकसागर०**—अथ वृत्तचतुष्टयेन प्रातिहार्यचतुष्टयमाह—हे जिनेन्द्र ! **भवतो रूपं आभाति** शोभते, ['आभाति' इति क्रियापदम्,] किं कर्तृ ?-'रूपं', कस्य ? 'भवतः' तव, किंलक्षणं रूपम् ?-**उच्चैः**-अतिशयेन, **अशोकतरुसंश्रितम्**- न विद्यते शोको यत्र-अशोकः, अशोकश्चासौ तरुश्च-अशोकतरुश्च-अशोकतरुः, अशोकतरौ[1] संश्रितम् अशोकतरुसंश्रितम्, पुनः किंलक्षणं रूपम् ?-[**ऊन्मयूखम्**]-ऊद्ध्वं मयूखाः किरणा यस्य तत्-ऊन्मयूखम्, । पुनः किं[भूतं रूपम् ! **अमलम्**] न विद्यते मलो यत्र तद्-अमलम्-स्वेदादिरहितम्, कथं ?-**नितान्तम्**-निरन्तरम् । किमिव? -**रवेर्बिम्बमिव** यथा-'रवेः' सूर्यस्य, '**बिम्बं**' मण्डलं आभाति, कीदृशम् बिम्बं ?-**पयोधरपार्श्ववर्त्ति**=मेघसमीपवर्त्ति, पयो धरति इति पयोधरः, पयोधरस्य पार्श्वे वर्त्तते इत्येवंशीलं [यत्] पयोधरपार्श्ववर्त्ति, पुनः कीदृशम् ?-बिम्बम् ?-**स्पष्टोल्लसत्किरणम्**=प्रकटोद्यत्प्रभम्, उल्लसन्तश्च ते किरणाः-उल्लसत्किरणाः, स्पष्टा उल्लसत्किरणा यस्मिन् तत्-[स्पष्टोल्लसत्किरणम्, पुनः कीदृशं बिम्बम् ?]-**अस्ततमोवितानम्**-ध्वस्तान्धकारपटलम्, तमसो वितानं-तमोवितानं, अस्तं तमोवितानं येन तत्-अस्ततमोवितानम् । सूर्यमण्डलसमानं भवद्रूपं, मेघतुल्यो अशोक-[तरुः] इति ॥२८॥

---

१. 'अशोकतरुं संश्रितः' इत्यपि गुणाकरीयवृत्तौ० ।

**सिंहासने मणिमयूखशिखाविचित्रे**
**विभ्राजते तव वपुः कनकावदातम्।**
**बिम्बं वियद्विलसदंशुलतावितानं**
**तुङ्गोदयाद्रिशिरसीव सहस्त्ररश्मेः ॥२९॥**

२९ **कनकसागर०**—हे मुनीन्द्र ! **तव वपुः विभ्राजते**=शोभते, ['विभ्राजते' इति क्रियापदम्] किं कर्तृ ?-'वपुः'-शरीरं, कस्य ? 'तव'= भवतः, कीदृशं वपुः ?-**कनकावदातम्**कनकवद् अवदातं-गौरं-कनकावदातं, कस्मिन् ?-**सिंहासने**-सुवर्णनिष्पन्नासने, कीदृशे सिंहासने ? **मणिमयूखशिखाविचित्रे** मणीनां मयूखाः-मणिमयूखाः, मणिमयूखानां शिखाः-मणिमयूखशिखाः, मणिमयूखशिखाभिः विचित्रं-मणिमयूख-शिखाविचित्रम्, तस्मिन् [मणिमयूखशिखाविचित्रे,] किमिव ? सहस्त्ररश्मेः बिम्बमिव, सहस्त्रं रश्मयो यस्य सः-सहस्त्ररश्मिः, तस्य [सहस्त्ररश्मेः], यथा सहस्त्ररश्मेः-सूर्यस्य बिम्बं मण्डलं शोभते । कस्मिन् ? **तुङ्गोदयाद्रिशिरसि**-उन्नतपूर्वाचलशृङ्गे, उदयस्याद्रिः-उदयाद्रिः, तुङ्गश्चासौ उदयाद्रिः-तुङ्गोदयाद्रिः, तुङ्गोदयाद्रेः शिरः, तस्मिन्-तुङ्गोद[याद्रिशिरसि], कीदृशं बिम्बं ?-**वियद्विलसदंशुलतावितानम्**-'वियति'=आकाशे, 'विलसन्त' उद्योतमाना एव अंशवः कराः, त एव 'लतावितानं'-वल्लीविस्तारो यस्य तत्- वियद्वि[लसदंशुलता-वितानम्, अथवा विलसन्तश्च ते अंशवश्च विलसदंशवः, लतानां वितानं-लतावितानम् [वियति] विलसदंशव एव लतावितानं यस्य तद्-[वियद्-]विलसदंशुलतावितानम्। 'सिंहासनसमान उदयाचल, भगवंतना शरीरसमान ते सूर्यबिंब अे ओपमा ॥२९॥

**कुन्दावदातचलचामरचारुशोभं**
**विभ्राजते तव वपुः कलधौतकान्तम्।**
**उद्यच्छशाङ्कशुचिनिर्झरवारिधार-**
**मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥**

१. प्रताविदं वाक्यं गूर्जरगिरानिबद्धम्।

**३० कनकसागर०**—हे विभो ! **तव विपु: विभ्राजते**=शोभते, भवत: शरीरं चकास्ति, कीदृशं वपु: ?-**कलधौतकान्तं**=चामीकरवत् रुचिरं, [कलधौतं सुवर्णमिव कान्तं] कलधौतकान्तं, पुन: कीदृशं वपु: ? **कुन्दावदातचलचामरचारुशोभम्**-चलानि च तानि-चामराणि च चल-चामराणि, कुन्दवद् अवदातानि-कुन्दावदातानि, कुन्दावदातानि च तानि चलचामराणि-कुन्दा[वदातचलचामराणि], कुन्दावदातचलचामरैश्चारुर्मनोहरा शोभा यस्य तत्-कुन्दाव[दातचलचामरचारुशोभम्] किमिव ?-**सुरगिरेस्तट-मिव,** यथा 'सुरगिरे:' मेरो: तटं, विभ्राजते शोभते । ['विभ्राजते' क्रियापदम्,] किं कर्तृ ? 'तटं' शिखरं, कस्य ?-सुरगिरे:'-सुराणां गिरि: सुरगिरि: तस्य [सुरगिरे:], कीदृशं तटम् ?-**शातकौम्भम्**-शातकुम्भस्य इदम्-शातकौम्भम्, कथं ?-**उच्चै:** अतिशयेन, पुन: कीदृशं तटम् ?-**उद्य[च्छशाङ्कशुचि-निर्झरवारिधारम्]**-उद्यंश्चासौ शशाङ्कश्च उद्यच्छशाङ्क:, उद्यच्छशाङ्कवत् 'शुचय:'-उद्यच्छशाङ्कशुचय:, उद्यच्छशाङ्कशुचयो निर्झरवारिधारा: यस्य तत् उद्यच्छशाङ्क[शुचिनिर्झरवारिधारम्], चामर ते नीझरणवारी समान, मेरुना शिखर ते भगवंतना शरीर समान ॥३०॥

**छत्रत्रयं तव विभाति शशाङ्ककान्त-**
**मुच्चै: स्थितं स्थगितभानुकरप्रतापम् ।**
**मुक्ताफलप्रकरजालविवृद्धशोभं**
**प्रख्यापयत् त्रिजगत: परमेश्वरत्वम् ॥३१॥**

**३१ कनकसागर०**—हे स्वामिन् ! **तव छत्रत्रयं विभाति,** छत्राणां त्रयं-छत्रत्रयं, शोभते, कस्य ? 'तव'-भवत:, कीदृशं छत्रत्रयम् ?-**शशाङ्ककान्तम्**=चन्द्रमनोहरम्, शश: अङ्के यस्य स:-शशाङ्क:, शशाङ्कवत् कान्तं-शशाङ्ककान्तम्, पुन: किंविशिष्टं छत्रत्रयम् ?-**स्थितम्**- निविष्टम्, कथम् ?-**उच्चै:**-ऊद्र्ध्वम्, मूर्धस्थितम् इत्यर्थ:, पुन: किं[विशिष्टं] छत्रत्रयम् ?-**स्थगितभानुकरप्रतापम्**=आच्छादितसूर्यकरानुभावम्, भानो: करा:- भानुकरा:, भानुकराणां प्रताप:-भानुकर-प्रताप:, स्थगित: भानुकरप्रताप: येन तत्- स्थगित[भानुकरप्रतापम्], पुन: किं[भूतं]

छत्रत्रयम् ?-**मुक्ताफल-प्रकरजालविवृद्धशोभम्**-मुक्ताफलस्य[1] प्रकरः मुक्ताफलप्रकरः, मुक्ता-फलप्रकरस्य जालं-मुक्ताफल-प्रकरजालम्, मुक्ताफलप्रकरजालेन विवृद्धा शोभा यस्य तत्-मुक्ताफल[प्रकरजाल-विवृद्धशोभम्]। छत्रत्रयं किं कुर्वत्?-**प्रख्यापयत्**=किञ्चयत्[?], किं कर्मतापन्नम् ?-**परमेश्वरत्वम्**- परमेश्वरस्य भावः-परमेश्वरत्वम्, कस्य? **त्रिजगतः**, त्रयाणां जगतां: समाहारः-त्रिजगत्, तस्य त्रिजगतः ॥३१॥

**उन्निद्रहेमनवपङ्कजपुञ्जकान्ति-**
**पर्युल्लसन्नखमयूखशिखाभिरामौ।**
**पादौ पदानि तव यत्र जिनेन्द्र! धत्तः**
**पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥३२॥**

**३२ कनकसागर०**—हे **जिनेन्द्र! तव पादौ** भवतश्चरणौ, **यत्र** भूमौ **पदानि**= चरणप्रतिबिम्बानि **धत्तः** धारयतः। 'धत्त' इति क्रियापदम्?-कौ कर्तारौ?-'पादौ', कानि कर्मतापन्नानि?-'पदानि'-गमने चरणप्रतिबिम्बानि, क्व? 'यत्र'-भूमौ। **तत्र** धारयः[धरायां?] **विबुधाः** देवाः **पद्मानि परि-कल्पयन्ति**,-रचयन्ति निर्मापयन्ति इत्यर्थः। के कर्तारः?-'विबुधाः'=देवाः, कानि कर्मतापन्नानि?-'पद्मानि' कमलानि। कीदृशौ पादौ?-**उन्निद्र हेम [नवपङ्कजपुञ्जकान्ति-पर्युल्लसन्नखमयूखशिखाऽभिरामौ]** (१) नवानि च तानि पङ्कजानि च नवपङ्कजानि, हेम्नः नवपङ्कजानि-हेमनवपङ्कजानि, उन्निद्राणि हेमनवपङ्कजानि-उन्निद्रहेमनवपङ्कजानि, उन्निद्रहेमनवपङ्कजानां पुञ्जः-उन्निद्रहेमनवपङ्कजपुञ्जः [उन्निद्रहेमनव-पङ्कजपुञ्जस्य कान्तिः-उन्निद्रहेमनवपुञ्ज-कान्तिः] (२) नखानां मयूखाः-नखमयूखाः, नखमयूखानां शिखाः-नखमयूखशिखाः, पयुर्ल्लसन्त-(सन्त्य)श्च ताः नखमयूखशिखाः-पर्युल्लसन्नखमयूखशिखाः उन्निद्रहेमन-पङ्कजपुञ्जकान्त्या पर्युल्ल-सन्नखमयूखशिखाः-उन्निद्रहेमनव-पङ्कज-पुञ्जकान्ति-पर्युल्लसन्नखमयूख-

१. मुक्ताफलानां एकवनचम् जातित्वाद् युक्तम्।



शिखा:, उन्निद्रहेमनवपङ्‌जपुञ्जकान्ति-पर्युल्लसन्नखमयूखशिखाभि: अभिरामौ= मनोहरौ-उन्निद्र[हेमनवपङ्कज-पुञ्जकान्तिपर्युल्लसन्नख-मयूखशिखाभि]रामौ, एवंविधौ पादौ ॥३२॥

**इत्थं यथा तव विभूतिरभूज्जिनेन्द्र !**

**धर्मोपदेशनविधौ न तथा परस्य ।**

**यादृक् प्रभा दिनकृत: प्रहतान्धकारा**

**तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥३३॥**

३३ **कनकसागर०**—हे **जिनेन्द्र** ! **इत्थं**=पूर्वोक्तप्रकारेण, **यथा धर्मोपदेशनविधौ तव विभूति:**-अतिशयरूपा समृद्‌धि:, **अभूत्** जाता, [किं 'अभूत्' इति क्रियापदम्,] का कर्तृ(र्त्री) ?-'विभूति:' संपत्, कस्मिन् ?- 'धर्मोपदेशनविधौ'-धर्मव्याख्याक्षणे धर्मस्योपदेशनं-[धर्मोपदेशनं,] धर्मोपदेशनस्य विधि:-धर्मोपदेशनविधि:-तस्मिन् [धर्मोपदेशेनविधौ], जिनानां इन्द्र:-जिनेन्द्र:, तस्मात् [आ]मन्त्रणं, हे जिनेन्द्र !, उक्तमर्थं दृष्टान्तेन दृढयति-**दिनकृत: प्रहतान्धकार: (रा) प्रभा,** वर्तते (इति क्रियापदम्)-का कर्तृ-(र्त्री) ?-'प्रभा' द्युति:, प्रकर्षेण भाति इति प्रभा, कस्य ?-'दिनकृत:' सूर्यस्य, दिनं करोति इति दिनकृत्, तस्य [दिनकृत:], कीदृशी प्रभा ?-'**यादृक्**'-यादृशी, पुन: कीदृशी प्रभा ?-'**प्रहतान्धकारा**'- ध्वस्तध्वान्ता, प्रहतं अन्धकारं यया सा-प्रहतान्धकारा। **तादृक् प्रभा विकाशिनो-ऽपि ग्रहगणस्य कुत**:-[भवति], अपि न भवति, का कर्त्री ?-'प्रभा', कीदृशी ?- 'तादृक्'-तादृशी, कस्य ? 'ग्रह गणस्य'-भौमादे:, ग्रहाणां गण:-[ग्रहगण:] तस्य [ग्रह-गणस्य], किं लक्षणस्य. ग्रहगणस्य ?-'विकाशिनोऽपि'-तेजस्विनोऽपि, विकाशो-ऽस्यास्ति इति विकाशी, तस्य [विकाशिन:] ॥३३॥



**श्च्योतन्मदाविलविलोलकपोलमूल-**

**मत्तभ्रमद्‌भ्रमरनादविवृद्‌धकोपम् ।**

**ऐरावताभमिभमुद्‌धतमापतन्तं**

**दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥**

३४ **कनकसागर०**—गजभयहरं जिनं स्तौति—हे गजे(जिने)न्द्र ! **भवदाश्रितानां** नराणां **भयं नो भवति,** किंकर्तृ ?–'भयं', केषां ?–नराणाम् इति शेषः, किंलक्षणानां नराणां ?–'भवदाश्रितानां' त्वच्चरणस्थानां, भवन्तमाश्रितानां, भवन्तम्, आश्रिताः–भवदाश्रिताः, तेषां भवदाश्रितानाम्, किं कर्तृ(कृत्वा) ? **दृष्ट्वा**–वीक्ष्य, कं कर्मतापन्नम् ?–**इभं**–गजम्, किंलक्षणं गजम् ?–**ऐरावताऽऽभम्** महाकायत्वात्, ऐरावणसमम्,–एरावत्[१] आभा यस्य स–ऐरावताभः–तम्, पुनः किंलक्षणं इभं ?–**उद्धतम्,** दुर्विनीतम्, किं कुर्वन्तं इभम् ?–**आपतन्तम्**–सन्मुखमागच्छन्तम्, पुनः कीदृशम् इभम् ?–**श्च्योतन्मदाविल–लोलकपोलमूलमत्त–भ्रमद्–भ्रमरनादविवृद्धकोपम्** [१] श्च्योतंश्चासौ मदश्च श्च्योतन्मदः, श्च्योतन्मदेन आविलाः–श्च्योतन्मदाविलाः [२] कपोलयोः मूले–कपोलमूले, कपोलमूलयोः मत्ताः–कपोलमूलमत्ताः, [३] भ्रमन्तश्च ते भ्रमराश्च भ्रमद्भ्रमराः, कपोलमूलमत्ताश्च ते भ्रमद्भ्रमराश्च–कपोलमूलमत्तभ्रमद्भ्रमराः, श्च्योतन्मदाविलाश्च ते विलोलाश्च ते–कपोलमूल–मत्तभ्रमद्भ्रमराश्च श्च्योतन्मदाविलविलोल कपोलमूलमत्तभ्रमद्भ्रमराः, तेषां नादः–शब्दः,–श्च्योतन्मदाविलविलोलकपोलमूलमत्त–भ्रमद्भ्रमरनादः, [४] श्च्योतन्मदाविलविलोल–कपोलमूलमत्त–भ्रमद्भ्रमरनादेन विवृद्धः कोपः यस्य सः–श्च्योतन्मदा[विलविलोलकपोलमूलमत्त–भ्रमद्भ्रमरनादविवृद्ध]–कोपः, तं–श्च्योतन्मदा[विल–विलोल–कपोलमूलमत्त–भ्रमद्भ्रमरनाद–विवृद्ध]कोपम्, ॥३४॥

**भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्त–**
**मुक्ताफलप्रकरभूषितभूमिभागः ।**
**बद्धक्रमः क्रमगतं हरिणाधिपोऽपि**
**नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥**

३५ **कनकसागर०**—अथ सिंहभयहरं जिनं स्तौति—हे नरसिंह ! **हरिणाधिपोऽपि ते**=तव, **क्रमयुगाचलसंश्रितम्** पुरुषं **नाक्रामति**–न हन्तुं शक्नोति इत्यर्थः, ['नाऽऽक्रामति' इति क्रियापदम्,] कः कर्त्ता ?–'हरिणाधिपोऽपि' सिंहोऽपि,

१. इरावान् समुद्रः–तत्र भवः–ऐरावतः, इति समीचीनम् भाति।

हरिणानां अधिपः-हरिणाधिपः, कं कर्मता-पन्नम् ?-पुरुषम् इति शेषः, कीदृशं पुरुषम् ?-'क्रमयुगाचलसंश्रितम्' चरणयुग्मपर्वतकृतवासम्,-क्रमयोर्युगं क्रमयुगं, क्रमयुगमेव अचलः-क्रमयुगाचलः, क्रमयुगाचलं संश्रितः-क्रमयुगाचलसंश्रितः, [तं] ? क्रमयुगाचलसंश्रितम्, कीदृशं पुरुषं ?-**क्रमगतम्** क्रमयोर्गतः-क्रमगतः, तं [क्रमगतम्], फालप्राप्तम् इत्यर्थः। कीदृशो हरिणाधिपः ?-**बद्धक्रमः**-बद्धः कीलितः, क्रमः पराक्रमः यस्य स-बद्धक्रमः, पुनः कीदृग् हरिणा-धिपः ?-भिन्नेभ[कुम्भगलदुज्ज्वलशोणिताक्तमुक्ताफलप्रकरभूषित-भूमि]भागः, [१] भिन्नश्चासौ इभश्च-भिन्नेभः, भिन्नेभस्य कुम्भौ-भिन्नेभ-कुम्भौ, भिन्नेभकुम्भाभ्यां गलन्-भिन्नेभकुम्भगलन्, [भिन्नेभकुम्भगलन् च उज्ज्वलश्चभिन्नेभकुम्भ-गलदुज्ज्वलः] [२] शोणितेन अक्तः-शोणिताक्तः, मुक्ताकलानां प्रकरः-मुक्ताफलप्रकरः, शोणिताक्तश्चासौ मुक्ताफलप्रकरः-शोणिताक्त-मुक्ताफलप्रकरः, [३] भूमेः भागः-भूमिभागः, [४] भिन्नेभ-कुम्भगलदुज्ज्वलश्चासौ शोणिताक्तमुक्ताफलप्रकरः-भिन्नेभकुम्भगल-दुज्ज्वलशोणिताक्त-मुक्ताफलप्रकरः, भिन्नेभ-कुम्भगलदुज्ज्वल-शोणिता-क्तमुक्ताफलप्रकरेण भूषितो भूमिभागः येन सः-भिन्ने[भकुम्भगलदुज्ज्वल-शोणिताक्तमुक्ताफलप्रकरभूषितभूमि]भागः ॥३५॥

**कल्पान्तकालपवनोद्धतवह्निकल्पं**
**दावानलं ज्वलितमुज्ज्वलमुत्फुलिङ्गम्।**
**विश्वं जिघत्सुमिव सम्मुखमापतन्तं**
**त्वन्नामकीर्तनजलं शमयत्यशेषम्॥३६॥**

**३६ कनकसागर०**—अथ दावानलभयहरं [जिनं]स्तौति [स्तोतु]-माह—हे कर्मकाननक्षयकृशानो ? **त्वन्नामकीर्त्तनजलं दावानलं शमयति**-विध्यापयति, ['शमयति' इति क्रियापदम् ?]-किं कर्तृ ?-'त्वन्नाम-कीर्त्तनजलम्'-भवदभिधानस्तवननीरम्, तव नाम त्वन्नाम, त्वन्नाम्नः कीर्त्तनम्-त्वन्नामकीर्त्तनम्, त्वन्नामकीर्त्तनमेव जलं-त्वन्नामकीर्त्तनजलम्, । कं कर्मतापन्नम् ?-'दावानलम्',

वनवह्निम्, दावश्चासौ अनलश्च-दावाऽनल:-तम् [दावानलम्], कीदृशं दावानलम् ?-**कल्पान्तकालपवनोद्धत-वह्निकल्पम्**-कल्पस्य अन्त-कल्पान्त:, कल्पान्तश्चासौ कालश्च-कल्पान्त-काल:, कल्पान्तकालस्य पवन:-कल्पान्तकालपवन:, कल्पान्तकालपवनेन उद्धत:-कल्पान्तकालपवनोद्धत:, कल्पान्तकालपवनोद्धतश्चासौ वह्निश्च-कल्पान्तकालपवनोद्धतवह्नि:, कल्पान्तकालपवनोद्धतवह्ने: कल्प:-कल्पान्त[कालपवनोद्धतवह्निकल्प:], तं [कल्पान्तकालपवनोद्धत-वह्निकल्पम्], पुन: कीदृशं दावानलम् ?-[उ]**ज्ज्वलितम्**-दीप्तम्, पुन: कीदृशं दावानलम् ?-**उज्ज्वलम्**=रक्तम्, पुन: कीदृशम् ?-**उत्स्फुलिङ्गम्,** उच्छलद्वह्निकणम्, उद्ध्वं स्फुलिङ्गा यस्य स:-उत्स्फुलिङ्ग:, तं [उत्स्फुलिङ्गम्], दावानलं किं कुर्वन् (कुर्वन्तम्) ? **सन्मुखमापतन्तम्**-अभिमुखमायान्तम्, । **इव** उत्प्रेक्ष्यते, **विश्वं** जगत्, **जिघत्सुं**-जिघसिसुम् इव ॥३६॥

**रक्तेक्षणं समदकोकिलकण्ठनीलं**
**क्रोधोद्धतं फणिनमुत्फणमापतन्तम् ।**
**आक्रामति क्रमयुगेन निरस्तशङ्कस्-**
**त्वन्नामनागदमनी हृदि यस्य पुंस: ॥३७॥**

३७ **कनकसागर०**—अथ भुजङ्गमभयहरं जिनं स्तौति—हे नागेन्द्रदुर्ज्य(दुर्जय ?), यस्य **पुंस: हृदि त्वन्नामनागदमनी** वर्त्तते इति शेष:, ['वर्त्तते इति क्रियापदम्], का कर्त्री ?,'त्वन्नामनागदमनी', तव नाम-त्वन्नाम, त्वन्नाम एव नागदमनी-औषधीविशेषा (विशेषम्) जाङ्गुलीविद्या वा, त्वन्नामनागदमनी, कस्मिन्? **हृदि** चित्ते, कस्य ?-**पुंस**: पुरुषस्य, किं-लक्षणस्य पुंस: ?-**'यस्य'**। स पुमान् **निरस्तशङ्क:** सन् **क्रमयुगेन फणिनं आक्रमति,** रज्जुवत् घर्षति, ['आक्रमति' इति क्रियापदम्] क: कर्ता ?-'स पुमान्' कं कर्मतापन्नम् ?-'फणिनं' सर्पं, फणा विद्यते यस्य स फणी, तं [फणिनम्] केन ? [क्रमयुगेन], क्रमयोर्युगं-क्रमयुगं, तेन क्रमयुगेन= चरणयुगलेन, किंलक्षण: स: ?-निरस्तशङ्क, निरस्ता शङ्का

यस्य स निरस्तशङ्कः, निर्भय इत्यर्थः, कीदृशं फणिनम् ?-**रक्तेक्षणम्**-रक्ते ईक्षणे= नेत्रे यस्य सः-रक्तेक्षणः तं [रक्तेक्षणम्] पुनः कीदृशम् ?-फणिनम् ?-**समद-कोकिलकण्ठनीलम्**-सह मदेन वर्त्तते इति समदः, समदश्चासौ कोकिलश्च-समदकोकिलः, समदकोकिलस्य कण्ठः समदकोकिलकण्ठः, समदकोकिल-कण्ठवत् नीलः=श्यामः, समदकोकिलकण्ठनीलः, तं [समदकोकिलकण्ठनीलम्], पुनः कीदृशं फणिनम् ?-**क्रोधोद्धतं**-क्रोधेन उद्धतः-क्रोधोद्धतः, तं [कोधोद्धतम्] =क्रोधोत्कटम्, पुनः कीदृशं फणिनम् ?-[**उत्फणम्**] उद्ध्वं फणा यस्य उत्फणः, तं [उत्फणम्]। फणिनं किं कुर्वन्तम् ?-**आपतन्तम्**-सन्मुखं धावन्तम् ॥३७॥

**वल्गत्तुरङ्ग-गजगर्जितभीमनाद-**
**माजौ बलं बलवतामपि भूपतीनाम्।**
**उद्यद्दिवाकरमयूखशिखापविद्धं**
**त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥३८॥**

३८ **कनकसागर०**—अथ रणभयहरं जिनं स्तौति—हे देवाधिदेव ! **त्वत्कीर्त्तनात् आजौ बलवतामपि भूपतीनां बलं आशु**-शीघ्रम्, **भिदा-मुपैति** प्राप्नोति, 'उपैति' इति क्रियापदम्,-, किं कर्तृ ?-'बलं' कटकं, कां कर्मतापन्नाम्-'भिदां'=भेदम्, प्रलयं, याति इत्यर्थः, केषां बलम् ?-'भूपतीनां' भूपानां, भुवः पतयो-भूपतयः, तेषां [भूपतीनाम्] किं लक्षणानाम् [भूपती-नाम्] ?-'बलवतामपि' पराक्रमिणामपि, बलं विद्यते येषां ते-बलवन्तः, तेषां [बलवताम्], कस्यां विषये ?-'आजौ सङ्ग्रामे, किंलक्षणं बलम् ?-**वल्गत्तुरङ्ग-( गजगर्जितभीमनादम् )**-[१] तुरङ्गाश्च गजाश्च-तुरङ्ग-गजाः, वल्गन्तो धावन्तश्च ते तुरङ्ग-गजाः-वल्गत्तुरङ्ग-गजाः, वल्गत्-तुरङ्ग-गजानां गर्जितानि-वल्गत्तुरङ्ग-गजगर्जितानि, वल्गत्तुरंगाश्चगज-गर्जितानि-च-वल्गत्तुरङ्ग-गजगर्जितानि, (२) भीमाश्च ते नादाश्च-भीमनादाः, वल्गत्तुरङ्ग-गजगर्जिते(तैः) भीमनादाः यत्र तद्-वल्गत्तुरङ्ग-गजगर्जित-भीमनादम्। किमिव ?-**तम इव,** यथा 'तमो' अन्धकारं भिदामुपैति-भेदं

गच्छति । कीदृशं तमः ?-**उद्यद्दिवाकर(मयूख-शिखाऽपविद्धम्)** उद्यंश्चासौ दिवाकरश्च-उद्यद्दिवाकरः, उद्यद्दिवाकरस्य मयूखाः उद्यद्दिवाकरमयूखाः, उद्यद्दिवाकरमयूखानां शिखाः-उद्यद्दिवाकर-मयूखशिखाः, उद्यद्दिवाकर-मयूखशिखाभिः अपविद्धम्-उद्यद्दिवाकर-मयूखशिखाऽपविद्धम्, तत् ॥३८॥

**कुन्ताग्रभिन्नगजशोणितवारिवाह-**
**वेगावतारतरुणातुरयोधभीमे ।**
**युद्धे जयं विजितदुर्जयजेयपक्षास्-**
**त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥३९॥**

३९ **कनकसागर०**—अत्रापि संग्रामनिवारणकरभय[हर]स्तुतिः—हे जिनेन्द्र ! **जनाथ(जना अथ) युद्धे जयं लभन्ते** । 'लभन्ते' इति क्रियापदम्, लभन्ते प्राप्नुवन्ति, के कर्त्तारः ?-'जनाः', कं कर्मतापन्नम् ?-'जयम्', कस्मिन् ?-'युद्धे', संग्रामे, कीदृशा जनाः ?-**त्वत्पादपङ्कजवनाश्रयिणः**-त्वच्चरणकमलकाननभाजः, तव पादौ-त्वत्पादौ, पङ्के जायन्ते इति पङ्कजानि, पङ्कजानां वनं-पङ्कजवनम्, त्वत्पादौ एव पङ्कजवनम्-त्वत्पादपङ्कजवनम्, त्वत्पादपङ्कजवनं आश्रयन्ते इत्येवंशीलाः-त्वत्पादपङ्कजवनाऽऽश्रयिणः । पुनः कीदृशा जनाः ?-**विजितदुर्जय-जेयपक्षाः**, पराभूतोत्कटशत्रुगणाः (१) जेतुं योग्याः- जेयाः, जेयानां पक्षः-जेयपक्षः, (२) दुःखेन जयो यस्य स-दुर्जयः, दुर्जयश्चासौ जेयपक्षश्च-दुर्जयजेयपक्षः, विजितो दुर्जयजेयपक्षः यैः ते-विजितदुर्जयजेयपक्षाः । पुनः-कीदृशे युद्धे ?-**कुन्ताग्रभिन्नगजशोणितवारिवाह-वेगावतारतरुणा-तुरयोधभीमे**-(१) कुन्तानां अग्राणि-कुन्ताग्राणि, कुन्ताग्रैः भिन्नाः-कुन्ताग्रभिन्नाः, कुन्ताग्रभिन्नाश्च ते गजाः-कुन्ताग्रभिन्नगजाः, कुन्ताग्रभिन्न-गजानां शोणितम्-कुन्ताग्रभिन्नगजशोणितम्, (२) कुन्ताग्रभिन्नगजशोणितम् एव वारिवाहः-कुन्ताग्रभिन्नगजशोणितवारिवाहः, (३) वेगेन अवतारः-वेगावतारः, कुन्ताग्रभिन्नगजशोणितवारिवाहे वेगावतारः-कुन्ताग्रभिन्नगज-शोणितवारिवाहवेगावतारः । (४) तरणेन आतुराः-तरणातुराः,

कुन्ताग्रभिन्न-गजशोणितवारि-वाहवेगावतारेण (तारस्य) तरणातुराः- कुन्ताग्रभिन्नगज-शोणितवारिवाहवेगावतारतरणातुराः । (५) तरुणाश्च ते योधाः- तरुणयोधाः, [कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरुणातुर] योधैः-भीमं- कुन्ताग्र[भिन्नगजशोणितवारिवाहवे-गावतारतरुणातुरयोधभीमम्,]-तस्मिन् कुन्ता[ग्रभिन्नगजशोणितवारिवाहवेगावतारतरुणातुरयोधभीमे] ॥३९॥

**अम्भोनिधौ क्षुभितभीषणनक्रचक्र-**
**पाठीनपीठभयदोल्बणवाडवाग्नौ ।**
**रङ्गत्तरङ्गशिखरस्थितयानपात्रास्-**
**त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥४०॥**

४० **कनकसागर०**—अथ जलापदं प्रशमयन्नाह—हे भवार्णव-यानपात्र ! **अम्भोनिधौ** सांयात्रिकाः जनाः, **भवतः स्मरणाद् व्रजन्ति** पारं गच्छन्ति, ['व्रजन्ति' इति क्रियापदम्,] के कर्त्तारः ?-जनाः नाविकाः, कस्मिन् ?-'अम्भोनिधौ'-समुद्रे, किं कृत्वा ? **विहाय** त्यक्त्वा, कं कर्मतापन्नम् ?-'**त्रासं**'-भयं, आकस्मिकं भयम्, । किंभूताः जनाः-**रङ्गत्तरङ्गशिखरस्थितयानपात्राः**- उच्छल्- लत्कल्लोलवावर्त्तिवाहनाः [१] [रङ्गन्तः-तरङ्गाः रङ्गत्तरङ्गाः, तेषां शिखराणि]-रङ्गत्तरङ्ग-शिखराणि, रङ्गत्तरङ्गशिखरेषु स्थितानि यानपात्राणि येषां ते-रङ्गत्-तरङ्गशिखरस्थियानपात्राः, एवंविधाः पोतवणिजः कीदृशे अम्भोनिधौ [व्रजन्ति] ?-**क्षुभितभीषणनक्रचक्र-पाठीनपीठ-भयदोल्बणवाड-वाग्नौ**-[१] 'नक्राणां' दुष्टजलजीवानाम्, चक्राणि वृन्दानि-नक्रचक्राणि, भीषणानि च तानि नक्रचक्राणि-'भीषणनक्रचक्राणि', [२] पाठीनाश्चपीठाश्च पाठीन-पीठाः- जलचरजीवविशेषाः, [३] वाडवाश्चासौ अग्निः-जलचरजीवविशेषाः, [३] वाडवाश्चासौ अग्निः-वाडवाऽग्निः, उल्बणश्चासौ-वाडवाग्निः-उल्बणवाडवाग्निः, भयं ददाति इति भयदः, भयदश्चासौ उल्बणवाडवाग्निः-भयदोल्बणवाडवाग्निः-[४] भीषण-नक्रचक्राणि च पाठीन-पीठाश्च भयदोल्बणवाडवाग्निश्च-भीषणनक्रचक्र- पाठीन-पीठ-भयदोल्बणवाडवाग्नयः । [५] क्षुभिताः-भीषणनक्रचक्र-पाठीन-

पीठभयदोल्बण-वाडवाग्नयः-यत्र स-क्षुभितभीषणनक्रचक्र-पाठीन-पीठ-भयदोल्बणवाडवाग्निः, तस्मिन्-क्षुभितभीषणनक्रचक्र-पाठीन-पीठ-भयदोल्बणवाडवाग्नौ ॥४०॥

**उद्भूतभीषणजलोदरभारभुग्नाः**
**शोच्यां दशामुपगताश्च्युतजीविताशाः।**
**त्वत्पादपङ्कजरजोऽमृतदिग्धदेहा**
**मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४१॥**

**४१ कनकसागर०**—अथ रोगभयहरं (भयं) निवारयन्नाह—हे जिनेन्द्र! **मर्त्या उद्भूतभीषणजलोदरभारभ(भु)ग्नाः)** सन्तः, **त्वत्पाद-पङ्जकरजोऽमृतदिग्धदेहाः-मकरध्वजतुल्यरूपाः** भवन्ति, । 'भवन्ति' इति क्रियापदम्, के कर्त्तारः ?-'मर्त्याः' मनुष्याः, किंभूताः मर्त्याः ?-'उद्भूतभीषणजलोदरभारभ(भुग्नाः)-भीषणः जलोदरः-भीषणजलोदरः, उद्भूतश्चासौ भीषणजलोदरः-उद्भूतभीषणजलोदरः, उद्भूतभीषणजलोदरस्य भारः-उद्भूतभीषणजलोदरभारः, उद्भूतभीषणजलोदरभारेण भ(भु)ग्नाः-मोटिताः, उद्भूत-भीषणजलोदरभारभ(भु)ग्नाः । पुनः किंभूताः मर्त्याः ?-**उपगताः** प्राप्ताः, कां कर्मतापन्नाम् ?-**दशाम्,** अवस्थाम्, किंभूतां दशाम् ?-**शोच्याम्**-दीनां, शोचितुं योग्या शोच्या, ताम् [शोच्याम्] पुनः किंभूताः जनाः ?-'**च्युतजीविताशाः** जीवितस्य आशा-जीविताशा, च्युता जीविताशा यैः (येषां) ते-च्युतजीविताशाः, एवंविधाः मर्त्त्याः 'मकरध्वज-तुल्यरूपाः भवन्ति। मकरो ध्वजायां यस्य स-मकरध्वजः कन्दर्पः, मकर-ध्वजस्य तुल्यं रूपं येषां ते-मकरध्वजतुल्यरूपाः, किंभूताः मर्त्त्याः ?-**त्वत्पादपङ्कजरजोमृतदिग्धदेहाः**-तव पादौ-त्वत्पादौ, पङ्के जायते इति पङ्कजम्, त्वत्पादौ एव पङ्कजे-त्वत्पादपङ्कजे, त्वत्पाद पङ्कजयोः रजः-त्वत्पादपङ्करजः, त्वत्पादपङ्कजरज एव अमृतं-त्वत्पादपङ्कजो-ऽमृतम् त्वत्पादपङ्कजरजोऽमृतेन दिग्धं देहं येषां ते- त्वत्पादपङ्कज-रजोऽमृतदिग्धदेहाः ॥४१॥

**आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गा**
**गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।**
**त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः**
**सद्यः स्वयं विगतबन्धभया भवन्ति ॥४२॥**

४२ **कनकसागर०**—अथ बन्धनभयं निवारयन्नाह-हे [1]जिनेन्द्र-पूज्य ! **मनुजाः सद्यस्** तत्कालं, **विगतबन्धभया भवन्ति स्वयमेव** । ['भवन्ति'] इति क्रियापदम्, के कर्त्तारः ?-'मनुजाः' मनुष्याः, कीदृशाः ?-'विगत-बन्धभया' बन्धस्य भयम्-बन्धभयम्, विगतं बन्धभयं येभ्यः-ते विगतबन्धभयाः, कथं ?-'स्वयम्' आत्मने(नै)व, पुनः कथम् ?-'सद्यः' शीघ्रम् । किं कुर्वन्तः ? **स्मरन्तः** ध्यायन्तः, किं कर्मतापन्नम् ?-**त्वन्नाम-मन्त्रम्**-'श्रीऋषभाय नमः' इति पदम्, तव नाम-त्वन्नाम, त्वन्नाम एव मन्त्रः-त्वन्नाममन्त्रः, तं [त्वन्नाममन्त्रम्], कथम् ?-**अनिशम्** निरन्तरम्,। मनुजाः कीदृशाः ?-**उरुशृङ्खल-वेष्टिताङ्गाः** । कथम् ?-**आपाद-कण्ठम्**-पद-गलं यावत्, पादौ च कण्ठं च-पाद-कण्ठं, आ मर्यादीकृत्य-आपाद-कण्ठम् । पुनः कीदृशाः मनुजाः ?-**बृहन्निगडकोटिनिघृष्टजङ्घाः**-बृहत् चासौ निगडश्च-बृहन्निगडः, बृहन्निगडस्य कोटिः, [बृहन्निगड-कोटिः]बृहन्निगडकोट्या निघृष्टे जङ्घे येषां ते-बृहन्निगडकोटिनिघृष्टजङ्घाः,। कथम् ?-**गाढम्** निबिडम् ॥४२॥

**मत्तद्विपेन्द्र-मृगराज-दवानला-हि-**
**सङ्ग्राम-वारिधि-महोदर-बन्धनोत्थम् ।**
**तस्याशु नाशमुपयाति भयं भियेव**
**यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥**

**४३ कनकसागर०**—अथाष्टभयनाशेन स्तव (वं) संक्षेपयन्नाह—हे जिनराज ! **तस्य** प्राणिनः **भयं आशु**=शीघ्रं, **नाशं उपयाति** प्राप्नोति, किं कर्तृ ?-'भयं', कं कर्मतापन्नम् ?-'नाशं-' क्षयं उत्प्रेक्षते-**भियेव** भयेनेव, तस्य कस्य ?-**यो मतिमान् इमं अधीते**=पठति, ['अधीते' इति क्रियापदम्], कः कर्त्ता ?-'पुमान्', कं

१. जिन ! इन्द्रपूज्य ! अथवा हे जिनेन्द्र ! हे पूज्य ! इति ज्ञेयम् ।

कर्मतापन्नम् ?–'इमं' स्तवम्, यः किंलक्षणः ?–**'मतिमान्'** प्राज्ञः, मतिः अस्य अस्ति इति मतिमान्, कीदृशं स्तवम् ?–**तावकम्**, भयं कीदृशम् ?–**मत्तद्विपेन्द्र-मृगराज-[दवानला-ऽहि-संग्राम-वारिधि-बन्ध-नोत्थम्]**, द्विपानां इन्द्रः–द्विपेन्द्रः, मत्तश्चासौ द्विपेन्द्रश्च मत्तद्विपेन्द्रः, मृगाणां राजा–मृगराजः, दवश्चासौ अनलश्च–दवानलः, वारिणी (वारीणि) धीयन्ते अस्मिन् इति वारिधिः, महत् च तद् उदरं च महोदरम्[1], [अथ] मत्तद्विपेन्द्रश्च मृगराजश्च दावानलश्च अहिश्च संग्रामश्च वारिधिश्च महोदरं च बन्धनं च मत्तद्विपेन्द्र-मृगराज-दावानला-ऽहि-संग्राम-वारिधि-महोदर-बन्धनानि, तेभ्यः उत्तिष्ठति इति-मत्तद्विपेन्द्र-मृगराज-दवानला-ऽहि-संग्राम-वारिधि-महोदर-बन्धनोत्थम् ॥४३॥

**स्तोत्रस्रजं तव जिनेन्द्र ! गुणैर्निबद्धां**
**भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।**
**धत्ते जनो य इह कण्ठगतामजस्रं**
**तं 'मानतुङ्ग 'मवशा समुपैति लक्ष्मीः ॥४४॥**

**४४ कनकसागर०**—अथ स्तवनप्रभावं कविराह—हे **जिनेन्द्र** ! **इह** जगति **यो जनो** लोकः, **अजस्रं** निरन्तरम्, **तव स्तोत्र स्रजम्** कण्ठगतां **धत्ते** । **'धत्ते'** इति क्रियापदम्, 'धत्ते' धरति, कः कर्त्ता ? **यो जनः**, कां कर्मता-पन्नाम् ?–'स्तोत्रस्रजम्-स्तोत्रमेव स्रक्-स्तोत्रस्रक्-तां स्तोत्रस्रजम्, कस्य ? 'तव'-भवतः, किंलक्षणां स्तोत्रस्रजम् ?–**'कण्ठगताम्'** अपि', [कण्ठे गता] कण्ठगता, ताम् [कण्ठगताम्], किं लक्षणां ?–**निबद्धां** रचिताम्, कैः ?–**गुणैः**–पूर्वोक्तज्ञान-दर्शन-चारित्र-रूपैः [2]अवराकैः, केन ?–**मया**–**श्रीमान-तुङ्ग**सूरिणा, कया ?–**भक्त्या,** भावपूर्वक(कम्), स्तोत्रस्रजं किं लक्षणाम् ?–**रुचिरवर्णविचित्रपुष्पाम्**-'रुचिरा' मनोहराः, 'वर्णा'-अक्षराणि विशेषणभूतानि, 'विचित्राणि'-यमक-श्लेषाऽनुप्राप्तद्वयार्थादिनि (दीनि), तान्येव पुष्पाणि यस्यां सा-(रुचिर-वर्ण-विचित्रपुष्पा) रुचिराश्च ते वर्णाश्च-रुचिरवर्णाः, रुचिवर्णाश्च (वर्णैः) विचित्राणि-रुचिर-वर्णविचित्राणि,

१. अत्र बहुब्रीहिसमास साधु भाति । २. 'गुणानां अवराकत्वविशेषणं एवं ज्ञेयं – न भवन्ति जीवा वराकाः यैः ते-अवराकाः, येषु प्राप्तेषु जीवानां रङ्कत्वं नष्टमेव इतिभावः –

रुचिरवर्णविचित्राणि एव पुष्पाणि यस्यां सा-रुचिरवर्ण [विचित्रपुष्पा,], अथवा-रुचिरवर्णविचित्राणि-रुचिरवर्णाद् विचित्राणि एव पुष्पाणि यस्या। (तं पुरुषं) **लक्ष्मीः समुपैति,** का कर्त्री ?-'लक्ष्मीः', राज्यस्वर्गसत्का श्रीः, कं कर्मतापन्नम् ?- तं पुरुषम्, किंलक्षणा लक्ष्मीः ?-**अवशा,** न वशा, किं लक्षणं तं ?-**मानतुङ्गं,** मानेन तुङ्गो-मानतुङ्गः, तं मा(नतुङ्गम्)-पूज्योन्नतम्, स्तोत्रकर्त्रा कविना स्वनामसूचितम्, **मानतुङ्ग** इति-**यो जन इह** जगति, **स्तोत्रस्त्रजं कण्ठगतां धत्ते,** तं जनं **लक्ष्मीः समुपैति** - [इति] भावः ॥४४॥

[प्रशस्ति]

विलोक्य भूयसीं टीकां, नाम्ना **कनकसागरैः**।
**भक्तामरस्य** स्तोत्रस्य, वृत्तिर्विरचिता मुदा ॥१॥
राग-वेदर्षि-चन्द्रेण प्रमिते परिवत्सरे।
शुक्लमासे सिते पक्षे, सप्तम्यां बुधवासरे ॥२॥
इति भक्तामरस्तोत्रवृत्तिः संपूर्णम्।

प्रतपुष्पिकाः-संवत् १९३१ रा, मिति मार्गशिर्षस्य प्रतिपदायां=१ तिथौ, भौमवासरे, लिखितं, चुनीलालेन, स्ववाचनार्थम्यः, सुज्ञानगढमध्ये ॥ श्री ॥ श्री ॥ श्री ॥१॥



## ॥ आचार्य श्रीमद् भावदेवसूरि विरचिता चमत्कृतिपरिपूरिता मात्रानुस्वारविसर्ग रहिता जिनस्तुतिः ॥

-शा.सत्यदासः

अनवरतममर नरवर-शतनतपदकमलयमल! मलदलन !
जलजदलनयन ! गतमल ! शशधरवरवदन ! गजगमन !॥१॥

अचलबल ! सकलभयहर ! शमदमलयभवन ! जगदवन !
अपनय मम भवरसमर-मशरणजनशरण ! गतमरण !॥२॥

ऐं नमः । श्री परमात्मने नमः।

# पत्रपद्धतिः

**- सं.मुनिश्री जिनभद्रविजयाः**

(प्राचीनाऽज्ञातमहर्षिभिर्लिखितोऽयं ग्रन्थः केन लिखित इति न ज्ञायते अत्रानुल्लेखितत्वात् किन्तु केनाऽपि विनय-नय-न्याय-नैगम-निपुणैः परमर्षिभि र्लिखितो विभाव्यते यतोऽत्र आचार्योपाध्याय-शिष्य-मित्रमुनिभ्यः कथं पत्र-व्यवहारः क्रियते स दर्शितः नैकप्रकारेण विद्वच्चित्ताकर्षकरीत्या-काव्यरसमयघन इवायं पठित्वा विद्वज्जनमनोऽवश्यं मयूरायिष्यते।)

स्वस्ति श्रीमदमंदानंदसंदोहगर्भितोपयोगशालिनं, श्री परमेश्वरभानुमालिनं प्रणामप्राचीगिरितुंगशृंगसंगरंगिणं प्रणीय अथवा स्वस्ति श्रीमदगण्यपुण्यलावण्य-शुद्धागाधबोधिसंबंधसिंधुनाथं, अक्षीणत्रैलोक्यलक्ष्मीसंगमसनाथं, श्रीविश्वनाथं प्रणामसिंहासनासीनं विधाय अथवा स्वस्ति श्रीमदनंतसंतानाविच्छेदि-सच्चिदा-नंदकंदायमानं, सकलसुरासुरनरनिकरसरस-संगीयमानं परमात्मानं, ध्यान-नलिन-लीनमधुकरं विधाय अथवा स्वस्ति श्रीमत्परमैश्वर्य्यवर्य्य-सौंदर्य्य-लीलावितानघनकाननघनाघनं विपुलसकलसिद्धिबुद्धि-ऋद्धि-वृद्धि संसिद्धि-साधनं, श्री परमेश्वरं प्रणिय-नीपत्य अथवा स्वस्ति श्रीमत्प्रभुत्वसत्त्वाद्यनेक-विवेकिलोककोकवयस्यायमानासमानसद्गुणश्रेय-विराजमानं, स्वतः सिद्धसुज्ञानं भगवंतमभिनम्य अथवा स्वस्ति श्रीमंतमंतर्गतविततज्ञानालोकलोकं, स्वशक्ति-व्यक्तीकृतानंतसत्त्वसत्त्वादिगुण-श्रेणीरामणीयकं, परम-पुरुषं प्रणामपदवीं प्राप्य अथवा स्वस्ति श्रीमत् परमर्द्धि-सिद्धि-समृद्धि-वृद्धि-विधायिनं, सर्वजगज्जंतु-संतानतायिनं, भुक्तिमुक्त्यादिसर्वार्थसार्थदायिनं, भगवंतमानम्य अथवा स्वस्ति श्रीमदनंतसमतासुधांभोधिप्रवृद्धिपूर्णपार्वण-सुधाकारं, गांभीर्य्यमर्यादादिगुण-

श्रेणिरत्नाकरं, योगीश्वरसरसध्यानसरोवरमरालबालं, प्रणमदनेकच्छेकदक्षविवेकि-नाकिनायकसमुत्तेजितक्रमनख-मयूखमिलन्मौलिमौलि-माणिक्यमालं ,परमेश्वरं प्रणतिपद्मिनीपद्मिनीप्रियं प्रणीय अथवा स्वस्ति श्री परमानंदसंदर्भगर्भितज्ञानधारा-धाराधरं, सकलऋद्धि-सिद्धि-बुद्धि-बंधुरं, जगत्त्रयीप्रकाशनदिवाकरं श्रीमंत-परमेश्वरं प्रणतिपथपांथीकृत्य.

**अथ नगरवर्णनं** अभ्रंलिहगृहोत्तुंगशृंग-रंगत्पताका-परिस्फुरत्प्रांत-दूरीकृतविततपांशुप्रकारे, दानोदकभ्राजिष्णुगंधसिंधुरप्रायप्रचुरव्यवहारिबंधुरे, वरेण्यपुण्यपरिपाटीपाटीरवाटीसुरभीकृतविततस्फीतपरिसरे, निरवद्यमनोहरहृद्य-विद्याविद्याधरी-परीरंभसंरंभोत्सर्प्पत्सदर्पसुधीवर्गभर्गभार्गवादिसम्मोहनसमुत्पादन-सादरे, प्रवरपाथोधिपुत्रीविचित्रसौंदर्य्यदिदृक्षारसपिपासुपुरुषपरंपरासमाकर्षणहर्ष-प्रकर्ष-भासुरे, लीलातरंगिणीतरंगसंगसौभाग्यसागरे, विपुलसकलमंगलावली-लीलाकलनकौशलशालिविलासिलोकनिकरे, श्रीमति श्रीअमुकनगरे अथवा पुण्यनैपुण्यसंशोभिसत्तीर्थपृथ्वीपरिकरे, सर्वदोत्तुंगशृंगे शृंगरंगत्क्रीडाऽव्रीड-निबिड-स्नेहदेवदेवीवृंदचमत्कारकरे, स्फुटतटनिकटप्रकटीभूतप्रभूततरुनिकरसंसेचन-सावधान-प्रधानतटिनीतोयविस्तरे, चलच्चकोरचक्रवाकसरस-हंससारसजलचर-जंतुसंतानशालि-कमल-कैरव-तामरस-शतपत्र-सहस्रपत्रादि-राजीवराजिसरः-श्रेणीसुंदरे, निबिडतम-तमालतालहिंतालरसालादि-सालशाड्वलमंडलप्रवरे, नानाविध-दक्ष-पक्षि-लक्ष-साक्षेपमंजुकूंजितजातिसंजातचमत्कारयात्रिकप्रसरे, निपुणहरिण-रुरु-सरभ-चमरकुंजराद्यनेकारण्यक-जंतुसंतानप्रचुरे,प्रोत्तुंग पर्वततटी-तरुणीहार-विराजमानविपुलनिर्झरे, मनस्सदानंदन-नंदनवनसम-काननवरे।

**अथ योगींद्रान्प्रति** व्यक्तिकृतयोगयुक्ति-स्फूर्तिमत्कीर्त्तिपूर्त्ति-धवलीकृतदिगंतान्,-विशुद्धध्यानारामरोपणप्राविण्यपोषकसदोदंतान्, निरवद्य-चातुर्विद्य-महोदधिसमुल्लासनशारदशशिकांतान्-सविस्तरशास्त्रपद्धति-परिशीलन लब्धपरमार्थसार्थशांतदांतान्, नितांतशांतरससमुद्रान्, योगींद्रान् ।

**अथ पंडितान् प्रति** अश्रांतस्तुतिपाठपटिष्ठान्, देदीप्यमानप्रगुणगुण-गणगरिष्टान्, सर्वत्रप्राप्तप्रतिष्ठान्, प्रवरयोगचातुरीसंतुष्टीकृतविशिष्टान्, सच्चिदा-

नंदलहरीसंस्पर्शसंतुष्टान् सकलसज्जनमन:पंकजप्रविष्टान्, निखिलमंडितान् प्रवरपंडितान्, अमुकान्।

**अथ आचार्य्यान् प्रति** ऊहाऽपोहशमदमदयानुग्रहादिसंपन्नान्, सर्वागमशीललीलादिसद्गुण-समासन्नान्, ऐहिकपारत्रिकभोगेष्वानासक्तान्, केवल-परानुग्रहविद्योपयोगसंयुक्तान्, अविद्यासमद्भूताहंकार-ममकारादीच्छादिदोष-रहितान्, ब्रह्माद्वैतानंदादिसहितान्, सच्चिदानंदामंदमानससर:परिशीलन-राजहंसान् श्रीमदाचार्यावतंसान्।

**पुनराचार्य्यान् प्रति।** सर्वादेय-गेय-ध्येय-ज्ञेयरुपादिसंपत्तिशालि-परमपुरुषोत्तमप्रतिरुपान्, तेज:पुंजपूरदूरीकृतपातकतिमिरस्वरुपान्, सदैवोद्योतित-विततसंयमादिसंसेव्यमानप्रधानमोक्षमार्गान्, योगक्षेत्रोत्पन्नधर्मबीजफलितसर्ववर्गान्, प्रसर्प्पद्दर्प्प-कंदर्प-सर्प्पविहितोन्मादभंगभर्गान्, शास्त्ररहस्यवेदीसहृदयहृदयंगम-निरुपम-मन:सर्गान्, औदार्य्य-धैर्य्यगांभीर्य्यचातुर्य्यादिवर्य्यान्, श्रीमदाचार्यान् प्रति।

**अथोपाध्यायान् प्रति** सकलकलाशालिशिष्यावलीसंशोभितान्, निखिलवादिवृंदविहितमदोन्मादाद्यक्षोभितान्, परमाध्यात्मविद्याप्रलोभितान्, कलंकादिकमलिनीसमुल्लासनदिनकरान्, श्रीमत्पाठकप्रवरान्।

**पुन:पाठकान् प्रति** शब्दानुशासनसाहित्यतर्कच्छंदोलंकारादि-ग्रंथसार्थसमर्थनसावधानान्, चतुर्वेदवेदिकालंकरणप्राविण्यप्रधानान्, सदोपस्थित-श्रोतस्मार्त्तादिविधिशिक्षासमर्पणदीक्षागुरुन्, षट्तर्कीविपुलफलावली-परिपाक-प्रकासक-रसालतरून् इत्याद्यनेकगुणराजीवराजितान्, सर्वदैव सुस्मितान्, सर्व्वपृथ्वीतलप्रथितान्, श्रीमत्पाठकपटिष्ठान्।

**पुन: पंडितान् प्रति** सकलकविकुलकोटीकोटीरान् विद्वज्जन-समाजभ्राजमानान्यसामान्यरत्नावलीनि:सपत्नहीरान्, अनेकवादिवादरणसंरंभ-निर्ज्जयकार्यकरणवीराधिवीरान्, सज्जनमन:सहकारचारुकीरान्, सौजन्याद्यनेक-गुणमंडितान्, श्रीमत्प्रवरपंडितान्।

**पुन: पंडितान् प्रति** निरवद्यहृद्यविद्याविद्याधरीपरिरंभविद्याधरान्, विविधबुद्धिसिंधुसाधुसिंधुरान्, औत्पत्तिकी-वैनयिकी-कार्म्मिकी-पारिणामिकी-बुद्धिबंधुरान्, विद्यावज्जनवितान-नानागिरिनिकर-निर्झरभूधरान्, दुर्ज्जयस्मरवीर-

निर्जयकरणगंगाधरान्, श्रीमद्विबुधधुरंधरान्।

**पुनः गुरुन् प्रति** ब्रह्मानंदज्ञानमयमूर्त्तीन्, परमाध्यात्मविद्या-परिस्फुर्त्तीन्, विहितसुविहित-मनोरथपूर्तीन्, शरच्चंद्रमरीचिरोचिष्णुशुभ्रादभ्र-कीर्त्तीन्, विपुलविद्यार्थिसार्थमनोरथपूरणसुरतरून्, श्रीमत्सद्गुरुन् प्रति ।

पुन:0 सकलकविकुलकोटीकोटीरकीर्त्ति-मान-ज्ञान-ध्यान-दान-सन्मानादिगुणग्रामविराजमानान्, सत्त्वोपकारादि-गुणविमो-हितविद्वज्जन-श्रेणीवर्ण्यमानान्, योग्यवर्गविहित-परमानंदप्रदानान्, सर्वविद्यानिर-वद्याध्यात्मविद्या-वदान्यप्रधानान्, क्षमादिगुणमंडितपंडित-श्रेणीविराजमान-सन्नि-धानान्, श्रीमत्गुरुत्तमान् प्रति ।

**अथ ज्येष्ठगुरुभातृन् प्रति** सकलकलाकला(पा?)दिशिक्षा-विधिदक्षान्, स्वगुणश्रेणीसंतुष्ट-पुष्टीकृतसपक्षपक्षान्, अगण्यपुण्यनैपुण्य-वरेण्यलावण्यादिसम्मोहितसुहल्लक्षान्, विद्याधनदानधनदयक्षान्, श्रीमन्महनीय-हर्यक्षान् प्रति। पुन: विविधवचनरचनानवद्यगद्यपद्यादिसंदर्भितोक्ति-युक्तिव्यामोहितानेकनागरान्, कर्कशतर्कतर्कणचणविद्वन्मणिवर्णनीय-वैशारद्यादिगुण-रत्नरत्नाकरान्, गांभीर्यगुण-सागरान्, सधर्म्मकर्म्मादि-सदोज्जागरान्, परमप्रमोद-दातृन्, श्रीमज्जयेष्ठगुरुभ्रातृन्।

**अथ सदृशगुरुभ्रातृन् प्रति** प्रेमपयः-पूरसरित्पतीन्, अध्यात्म-शास्त्रशाणोल्लिखनपटूकृतनि:कपटमतीन्, ऐहिकामुष्मिकपापकारिविषय-व्यापारविरतीन्, धर्मकर्मसुशर्माचरणपरायणमुनिगणकृतरतीन्, सम्यक् समारा-धितसद्यतीन् सत्तीर्थ्यसार्थपृथ्वीपतीन्, पुनः सदृशगुरु-भ्रातृन् प्रति। पुन:0 अनेकविचारसारशास्त्रसमर्थन चतुर्मुखान्, विद्यार्थिसार्थसमर्पितसर्वसुखान्, निरवद्यविद्याविनोदद्विगुणी-कृतप्रतापतपनापहस्तितनिखिलदुर्मुखान्, सकलसुख-कारणमंत्रमंत्रणप्रगुणधीसखान्, मन्मनकमलविकाशनदिनकरान्, श्रीमत्सत्तीर्थ्य-प्रवरान् प्रति।

**अथ कनिष्टगुरुभ्रातृन् प्रति** विवेकव्रततिसंततिपल्लवनपयोधरान्, नयविनयादिगुणमाणिक्यमंडलीसमुत्पत्तिसागरान्, परमोत्तमधर्मकर्मादि-विधि-

व्यवहारसुजागरान्, रंजितानेकनागरान्, सौजन्यजन्य-कीर्त्तिप्रतानिनीवेष्टित-विष्टप-कारस्करान्, सुहृन्मन:पंकजप्रोल्लासनभास्करान्, गुरुचरणपरिचरण-करणनिपुणान्, सत्तीर्थ्यसद्गुणान् प्रति । पुन: कनिष्ठगुरुभ्रातृन् प्रति सद्बोधयोधप्रहतक्रोधादि-विद्वेषिप्रकारान्, अगण्यपुण्यलावण्यादिसाद्गुण्य-विस्तारान् क्षमार्जवदयासत्य-संतोषपीयूषपोषितसदाचारशरीरान्, परमानंद-कंदादित-रुसंसेचनरसिककीरान्, सर्वगुणबंधुरान्, गुरुबंधुसिंधुरान् प्रति।

अथ **ज्येष्ठशिष्यान् प्रति** गुरुजनमनोरंजनसावधानान्, सदागम-संगमशालिबुद्धि-शुद्धिप्रधानान्, शांतरसादिसरस-रसवतिनिर्माणसूपकारान्, अश्रांतविहितजनतोपकारान्, ज्ञानक्रियादिसुतरसंसारपारावारान् प्रकटीकृत-पुण्यप्राग्भारान्, मद्दृष्टिकुमुदिनीसुधासेचनसुधाकारान्, विज्ञविनेयप्रवरान् पूरिताभिमतकामान् सदाभिरामान् अमुकविज्ञविनेयान् प्रति।

**पुन: ज्येष्ठाशिष्यान् प्रति** स्वगुरुसेवासद्धर्मकादंबिनी-प्रकटनघनागमान्, शरच्चंद्रचंद्रिकाचंद्रचंदनादि-सद्भूतप्रभूतानंदकारी-वस्तुस्तो-मसन्निभसंगमान्, गुर्वाज्ञानिर्देशकरणनिपुणधिषणा-माणिक्यकोशान्, क्षमाशमा-दिसुभटसेनासामर्थ्यमथितदुर्दमविकटकिरातप्रायरोषादिदोषान्, विहितसज्जन-मन:संतोषपोषान्, सदा सुदक्षान्, लब्धलक्षान्।

अथ **मध्यस्थशिष्यान् प्रति** विनयादिगुणश्रेणिगुरुजनावर्ज्जननिपुणान्, सज्जनमन:पंकजपंकजबंधु-सन्निभसुगुणान्, भारतीस्फारालंकारसारहारसदृश-विचित्रशास्त्रसंजातश्रवणान्, गांभीर्यचातुर्यादिगुणप्रवणान्, वशीकृतकरणान्, सदाचरणान्, अमुकान् प्रति। पुनर्मध्यस्थशिष्यान् प्रति निर्दंभसेवासरंभ-चातुरीचमत्कृत-गुरुजनान्, संचितसच्छास्त्रविविधवचनबहुधनान्, धर्म्मराम-रामणीयतापादनप्रावृट्घनघनाघनान्, चतुरनिकरचेतश्चमत्कारिगंभीरमधुरस्वनान्, इत्याद्यनेकगुणसंपन्नान्, अमुकान् प्रति।

अथ **कनिष्ठशिष्यान् प्रति** सुगुरुसेवासंप्राप्त[1]सारशिष्यान्विचक्षण-गुणोचितान्, प्रशस्तशास्त्रादिलब्धार्थसार्थप्रमुदितान्, शिष्योचितविनयादिगुण-

१. ''संप्राप्यसारसिष्या'' इति हस्तप्रतौ। किन्त्वयं लिपिकर्त्तुर्दोष: संभाव्यते संप्राप्तसारशिष्यान् इति प्रतिभाति।

व्यवहारसुजागरान्, रंजितानेकनागरान्, सौजन्यजन्य-कीर्त्तिप्रतानिनीवेष्टित-विष्टप-कारस्करान्, सुहृन्मन:पंकजप्रोल्लासनभास्करान्, गुरुचरणपरिचरण-करणनिपुणान्, सत्तीर्थ्यसद्गुणान् प्रति । पुन: कनिष्ठगुरुभ्रातृन् प्रति सद्बोधयोधप्रहतक्रोधादि-विद्वेषिप्रकारान्, अगण्यपुण्यलावण्यादिसाद्गुण्य-विस्तारान् क्षमार्जवदयासत्य-संतोषपीयूषपोषितसदाचारशरीरान्, परमानंद-कंदादित-रुसंसेचनरसिककीरान्, सर्वगुणबंधुरान्, गुरुबंधुसिंधुरान् प्रति।

अथ **ज्येष्ठशिष्यान् प्रति** गुरुजनमनोरंजनसावधानान्, सदागम-संगमशालिबुद्धि-शुद्धिप्रधानान्, शांतरसादिसरस-रसवतिनिर्माणसूपकारान्, अश्रांतविहितजनतोपकारान्, ज्ञानक्रियादिसुतरसंसारपारावारान् प्रकटीकृत-पुण्यप्राग्भारान्, मद्दृष्टिकुमुदिनीसुधासेचनसुधाकारान्, विज्ञविनेयप्रवरान् पूरिताभिमतकामान् सदाभिरामान् अमुकविज्ञविनेयान् प्रति।

**पुन: ज्येष्ठाशिष्यान् प्रति** स्वगुरुसेवासद्धर्मकादंबिनी-प्रकटनघनागमान्, शरच्चंद्रचंद्रिकाचंद्रचंदनादि-सद्भूतप्रभूतानंदकारी-वस्तुस्तो-मसन्निभसंगमान्, गुर्वाज्ञानिर्देशकरणनिपुणधिषणा-माणिक्यकोशान्, क्षमाशमा-दिसुभटसेनासामर्थ्यमथितदुर्दमविकटकिरातप्रायरोषादिदोषान्, विहितसज्जन-मन:संतोषपोषान्, सदा सुदक्षान्, लब्धलक्षान्।

अथ **मध्यस्थशिष्यान् प्रति** विनयादिगुणश्रेणिगुरुजनावर्ज्जननिपुणान्, सज्जनमन:पंकजपंकजबंधु-सन्निभसुगुणान्, भारतीस्फारालंकारसारहारसदृश-विचित्रशास्त्रसंजातश्रवणान्, गांभीर्यचातुर्यादिगुणप्रवणान्, वशीकृतकरणान्, सदाचरणान्, अमुकान् प्रति। पुनर्मध्यस्थशिष्यान् प्रति निर्दंभसेवासरंभ-चातुरीचमत्कृत-गुरुजनान्, संचितसच्छास्त्रविविधवचनबहुधनान्, धर्म्मारामरामणीयतापादनप्रावृट्घनघनाघनान्, चतुरनिकरचेतश्चमत्कारिगंभीरमधुरस्वनान्, इत्याद्यनेकगुणसंपन्नान्, अमुकान् प्रति।

अथ **कनिष्ठशिष्यान् प्रति** सुगुरुसेवासंप्राप्त[1]सारशिष्यान्विचक्षण-गुणोचितान्, प्रशस्तशास्त्रादिलब्धार्थसार्थप्रमुदितान्, शिष्योचितविनयादिगुण-

१. ''संप्राप्यसारसिष्या'' इति हस्तप्रतौ। किन्त्वयं लिपिकर्त्तुर्दोष: संभाव्यते संप्राप्तसारशिष्यान् इति प्रतिभाति।



विदितान् गुरुशुश्रुषाप्रात:संध्योदयोद्रेकाभ्युदितान्, विचित्रा-नेकच्छात्रवृंद-वंदितान्, सदैवानंदितान् । पुन: कनिष्ठशिष्यान् प्रति भद्रक-प्रकृत्यादिगुणभावित-भूरिभव्यान्, निरवद्यविद्याभ्याससंस्तव्यान्, गुरुपरिपाटी-पांथीकृतमुग्धबुद्धिनव्यान् गुरुमनोरंजनलक्षणलक्ष-शोभायमान-भविकजनदिव्यान्, अमुकान् ।

**अथोत्तमान् सेवकान् प्रति** श्रीमत्सच्चिदारुपपरमात्मध्यानविधान-विध्वस्ततम:स्तोमान्, सत्पुरुषसेवासमुदय-सुरसरित्पतिसमुल्लासनसोमान्, परमेष्ठीभक्तिभावितजनाधारभूतान्, श्रुतिप्रोक्तधर्म्मयुक्तिसुरसरित्सरित्सदास्नान-पूतान्, सर्वोपकारकारणपरायणसदाऽकूतान्, सुबुद्धि-लोकप्रकरपुरुहूतान्, सद्भूतप्रभूतगुणविराजितान्, अमुकान् प्रति। पुनरुत्तमसेवकान् प्रति विद्वज्जनसेवाविधिसावधस्वभावान्, विज्ञाताध्यात्म-विद्याप्रकाशकशास्त्रोक्त-भावान्, कलिकालालंघनीयमहनीयप्रभावान्, परमात्मभावातिरिक्तभावाभावान्, परमार्थसार्थसावधानान्, विद्वज्जनदत्त-बहुमानान्, अमुकान् प्रति।

**अथ मध्यस्थसेवकान् प्रति** गुरुशुश्रुषादिविहितविधि-विधानबुद्धिबंधुरान्, मनोहरान्, महेश्वरप्रसादीकृतवेदोक्तधर्म्म-कर्म्मभारोद्वहन-सिंधुरान्, विविधगुणमाणिक्यश्रेणिरक्षणरोहणरोहणाचलपर्वतभूधरान्, दुर्ज्जय-दुर्विनीतशत्रुसंघातसंमर्द्दसमर्थचारुविद्याविद्याधरान्, सर्वत: सुंदरान्, अमुकान् प्रति । पुनर्मध्यस्थसेवकान् प्रति नीतिशास्त्रानुसारिमार्ग्गसंचारि-जनानंदकान् सज्जनजनमन:कमलविमलबोधदिनकरप्रभासन्निभप्रतिभासमुत्पादकान्, वेदांतवेद्य-वेदकपुरुषप्रीतिसमुत्पादकविचारसारबुद्धि-विभवान्, श्रीपरमेश्वरपरमगुरुपदपंकज-परिचरणकरणसावधानतादिगुणमाणिक्यमालाउत्पत्ति-स्थानकान्, सत्यसंतोषादि-सत्पुरुषलक्षणविराजमानान्, सज्जनावाप्त-सन्मानान् अमुकान् प्रति।



**अथ कनिष्ठसेवकान् प्रति** श्रीमत्परमेश्वरपरमगुरुप्रवराज्ञा-प्रतिपालनप्रवरान्, विनयादिसद्गुण-धुराधरणधुरीणान्, स्वव्यवहारोचितशास्त्र-परंपरापारीणान्, वेदांतविद्याविनोदनादपरिशीलणस्फुरदेणान्, सज्जनवरेण्यान्, अमुकान्, प्रति। पुन: कनिष्ठ सेवकान् प्रति विशुद्धश्रद्धाद्यलंकारालंकृत-गात्रान्, पुण्यपात्रीभवद्भावरुपसत्तीर्थस्नात्रान्, विहितसत्पुरुषचरणपरिचरण-यात्रान्, परमेश्वरसेवादिविधिसमुद्भूतविघ्न-व्रातरिपुसंघातमानमर्द्दनदक्ष-

क्षत्रान्, सद्धर्म-कर्मादिसुलक्षणपक्षानुमितिजन्मसमयसुनक्षत्रान्, सदैवपुण्य-पवित्रान्, अमुकान् प्रति ।

**अथोत्तमान् प्रति** चारुचंद्रचंदनचंद्रिकादिसद्भूतप्रभूत-पदार्थसार्थ-सारसंजातप्रकृतीन्, कपूर्रपूरादिशैत्यसौरभ्यानुरुपसहृदयंगममनोरमस्वभावा-वाप्तसर्वत्रसत्कृतीन्, यथोचितसामान्यविशेषपुरुष-विशेषविहितोपकृतीन्, सुदृष्टिपीयूषवृष्टिघटित-दया-दानदमादिसुक्षेत्रपरंपराप्रगटीकृतश्रेय:प्रशस्यशस्या-कारान्, शांतरसप्रसर-संजातसरित्संततिप्रवेशप्रदानरत्नाकरान्, अमर्ष-प्रकर्षांधकारसंभारनिराकरण-दिनकरान् सर्व्वेषु सर्वदा संकरान्, अमुकान् मित्रप्रवरान् प्रति ।

पुनर्मित्रप्रकृष्टान्0 ऐहिकामुष्मिक-प्रशस्तवस्तुविस्तारविषयोपदेश-पेशलवचनरचनापीयूषपूरक्षीरसागरान्, मैत्रीप्रमोदमाध्यस्थकारुण्यादि-वरेण्यगुणनिपुणतोपकारपात्रीकृतानेकनागरान्, औदार्य्यधैर्य्यगांभीर्य्यशौर्य्य-वीर्य्यादिगुणरत्नरत्नाकरान्, अविद्यारजनीनिराशोदभूतप्रभूतविद्याप्रभातोदय-दिवाकरान्, सर्वत: करुणाकरान्, प्रीतिपौलोमीपुरंदरान्, श्रीमन्मित्रधुरंधरान् अमुकान् प्रति।

**अथ मध्यस्थसुहृद: प्रति** मन:पंकजप्रसृतप्रेमपरिमल[1] प्रीति-पात्रीकृतसज्जनमधुकरान्, सत्पुरुषमन:पीयूषमयूखमणिगणसरसतापा-दनशरत्संपूर्णविधुकरान्, सन्मानदानादिप्रभृतिचतुरपुरुष-योग्यभाग्यादिलभ्य-सदिभ्यसभ्यसन्निभप्रभाप्राग्भारभासुरान्, अनेकलोकचमत्कारिविवेककोक-सूर्यबांधव-प्रभापूरविकस्वरान्, स्निग्धजनवर्णनीयस्वभावान्, दर्शितथार्थभावान् अमुकान् प्रति। पुन: मध्यस्थसुहृद: प्रति दक्षमित्रसपक्षलक्ष-विचक्षणपुरुषप्रधानान्, करालकलिकालप्रबलतपर्त्तुतापसंतापनिर्वापणनिपुणसरस-सरोवरसन्निधानान्, लब्धपंडितवर्णवर्णनीय-सुहृज्जनाकर्णनीय-महाजनमाननीय-गुणग्रामरामणीयकविधानान्, सत्पुरुषपरंपरापरिचिताभिधानान्, सर्वत: सावधानान्, लब्धसर्वत्रसन्मानान्, अमुकान् प्रति।

१. ''प्रेमकारीमल'' इति हस्तप्रतौ, ''प्रेमपरीमल'' इति प्रतिभाति।

**अथ कनिष्ठ सुहृदः प्रति** गुणगरिष्ठगुरुचरणनीरदसंततिचातकान्, सज्जनसंगतिसंजातसुकृततिदूरीकृतपातकान्, शरणागतजंतुसंघातदु:खरोषदोष-घातकान्, अध्यात्मरहस्यसुरसरित्प्रवाहलहरीनित्यस्नातकान्, मान्यजन-धन्यतमाशयान्, सज्जनश्लाघनीयविनयान्, सर्वत्र धर्मशास्त्रानुगतविहितसन्नयान्, अमुकान् प्रति। पुन: कनिष्ठ सुहृद: प्रति क्षमार्जवमार्दवा-दिसज्जनोचितगुणगुणालंकृतान्, विततवित्तवितरणगुणकरीरान् कामक्रोधादि-दुर्ज्जययोधजयपताकावरणयथोचितवीरान्, उदयागतप्राग्प्रारब्धकर्मकदम्बकदत्तसुख दु:खाध्यासनधीरान् मार्ग्गणगणाभीप्सितदायकान्, शरणागतत्रायकान्, अमुकान् प्रति

**अथ यतो लिख्यते तस्य ग्रामस्य वर्णनं** धर्म्मार्थकाममोक्षरुप-चतुरर्वर्ग्गसाधनबह्वादरचतुरनर-विराजितात्, नानादेशागतविद्यावज्जन-रंजितात् स्वगुणैर्विदितात्, अमुकनगरात् अथवा दिनकरकिरणतापतप्तचैत्यपरंपरा-शिखरस्थितपताकारुपरसनालीढसुधाकरसुधारसात्, अथवा गंभीरतागुणनिर्ज्जित-निर्ज्जरणीपतिप्राभृतीकृतप्रायस्वगतविविधरत्नराशिपूरितात्, अथवा रसालसाल-तालतमाल-हिंतालकदलीकदंबजंबीरकणवीरादिकारस्करकोदि-(टि?)- घटिता--रामरामणीयकरंजिततापसात्, विविधौषधिविराजितसन्निधानमेदनी-मंडितपर्वतात्, अनेकनानानिर्ज्जरवारिप्रवाहपरिपोषितसारस-हंसचक्रवाकके-किकपोतहरिणवातप्रमीप्रभृतिजंतुसंतानात् घनकाननात् ।

**अथ लेखलेखकस्य वर्णनं** अथ योगींद्रान् प्रति कया रीत्या लिख्यते विनयावनतकाययष्टि:, प्रणयामृतपानसंजातातीवसंपुष्टि:, प्रतिचरण-परिचरणकरण-सरणरणकीभाव:, भावप्रभावलब्धतुष्टि:, शिरसा स्वीकृत-परमेध्येयशिष्टि: सेवक अमुको विधिना सम्यक् प्रणम्य विज्ञप्तिं व्यातनोति। यथात्र प्रत्यहं सम्यक् श्रेयकृत्यं प्रवर्त्तते युष्मच्चरणप्रसत्ते: युष्माकमपि श्रीपरमेश्वरकृपया योगसमाधिपूर्विकां कुशलक्षेमवार्त्तां प्रत्यहं समीहे । इत: परं यथोचितोदंता: स्वशक्त्या लिखनीया:।

**अथ सद्गुरुन् प्रति** प्रणयरससरित्पति:, विहितविनयनति:, प्रेमप्रोल्लास-प्रोत्साहादिसुहृज्जनसंजातसंगति:, सेवा-विधिसावधान: अमुकजन: प्रणय पीयूषपात्रीं-पत्री प्रगुणयति यथाजन्यं चात्र सदगुरुधूर्य: श्रीमन्महनीय-

माहात्म्यान्मंगलमालावल्लीविस्तारमातंतनीति कारणं तत्र युष्मद्ध्यानघनाघन: युष्माकमपि स्ववपुर्पाटवादिपरमानंद-संदोहमाशासे अपरं स्वोचिता: समाचारा यथारुचि र्लिख्यते -

**पुनः गुरुन् प्रति** श्रीमन्महनीयशास्त्र-मौलिमाणिक्यमालामंडितमूर्धा, विनयविधिसावधानीकृतस्वात्मा, अष्टांगप्रणामपूर्वकं सेवक अमुक: विज्ञप्तिं प्रहिणोति । यथाविधेयमत्र श्रेय:प्रतानिनीनवपल्लवतामुपैति, श्रीमतां महनीयानां चरणस्मरणप्रकटितपुण्यप्राग्भारपीयूषपुष्करावर्त्तात्, श्रीमतां, ध्येयपुरुषाणां, स्नेहपरंपरोदंतमभिलषामि अपरं अथ यथार्हं उदन्ता: लिख्यन्ते।

**अथाचार्य्यान् प्रति** भक्तिभावितचित्तो, विनयनयाद्यनंतचित्त:, मार्दवार्ज्जवादिगुणकृतादर:, सेवक अमुकस्त्रिकरणशुध्या श्रद्धाबंधुर: विज्ञपयति। यथाविधेयविधिरत्र श्रीमत्परमेश्वरस्मरणादिसद्धर्मकार्यं निर्विघ्नं सानंदं, सकुशलं, समेधते । किंच श्रीमदाचार्यवर्य्याणां ध्यानमहिम्ना श्रीमतामपि नि:प्रत्यूहं संप्रत्यहं श्रेय:कृतोदंतं स्पृहयामि। अथ यथारुचि:। पुनराचार्यान् प्रति भूतलमिलन्मौलि: संयोजितकरकमल:, साष्टांगप्रणाम-पावनीभूतप्रभूतभक्ति-युक्तिसदापूत: सेवक अमुक विज्ञप्तिपत्रीं सितपत्रीं मंजूभाषिणीं ललितोपदां मन:प्रीतिकृते प्राभृतीकुरुते यथानिमित्ताधीनात्म-लाभमत्र उदयशिखिरिशिखरचूलावलंबिनि भगवति भानुमालिनि श्रीमत्परमेश्वरस्तुति-स्तोत्रादिपाठधर्मकर्मसशर्मसिद्धिमुपैति। श्रीमतां परमपवित्राणां साधूचरित्राणां कृपादृष्टिपीयूषवृष्टित: श्रीमतां सौजन्यजन्यकीर्तिस्फूर्त्तिप्रसिद्धानां परोपकारादिसद्गुणरामणीयकरमासमृद्धानां, श्रेय:श्रेणीं प्रतिदिनं वर्धमानां कामये। यथासमयं सा प्रसाद्या अपरं यथास्थितं समाचारा लिखनीया:

**अथोपाध्यायान् प्रति** प्रणयामृतपूर्णकलश:, भक्तिश्रद्धादि-गुणानलस:, विनयविधिसरससोल्लास:, स्निग्धमानस:, शिष्य अमुक:-साष्टांगप्रणाम: प्रतनोति विज्ञप्तिं यथाकृत्यमत्र परमेश्वरस्मरणादि-श्रीमद्ध्येयध्यानविधानादिविधि: प्रत्यहं प्रवर्त्तते । श्रीमन्महनीयमहिम्नां श्रीमदुपाध्यायसिंधुराणां श्रेय:परंपरां प्रवर्धमानां स्पृहयामि । अथ समाचारा: यथारुचि लिखनीया। पुन: उपाध्यायान् प्रति भक्ति-युक्त्यंबुजिनीपरिशीलनमधुकर:, प्रवर्द्धमान-विनयविधिसाधनसादर: प्रीति-पौलोमीपुरंदर:, सदानंदमेदुर:, अमुक: प्रणयपंकजप्रोल्लासपद्मिनिबंधुविज्ञप्तिपत्रीं

प्राभृतीकुरुते यथा प्रागभावप्रतियोगि चात्र श्रीमदिष्टपरमेष्ठीस्तुति-पाठादिशिष्टाभिमतं प्रत्युष-समये यथोचितं सुकृतकृत्यं प्रवर्त्तते । श्रीमतां सुज्ञानवतां तदेधमानमाशासे । अपरं यथोचितं समाचाराः लिखनीयाः।

**अथ पंडितान् प्रति** श्रीमन्महनीयकवित्वादिचातुरीरंजितचेताः, सज्जनोचितरीतिमत्भवद्गुणग्रामरामणीयरसिकः अमुकः प्रणयविनयानंदादिपूर्वकं विज्ञप्तिपत्रीमातंतनीति । यथाश्रेयोत्र तत्रत्यं तदीहे। अतः परं यथारुचिः । पुनः पंडितान् प्रति चतुर्वर्ग्गशास्त्रभृत्सु श्रीमत्सु भक्तियुक्तिबह्वादरः, युष्मत्संगतिलब्धज्ञानादिगुणरुचिरमतिः, विहिता-युष्मादृक्सज्जन-संगतिः, सोल्लासततिः, अमुकः सद्विज्ञप्तिलेखं सह्लेखं लिखति यथाजन्यं चात्र श्रीपरमेश्वरध्यानज्ञानादि ससुखं संजायते। श्रीमतां तत्समीहे। अतो यथारुचिः।

**अथ गुरुणां विज्ञप्तिः** सुभक्तिव्यक्तिभवद्रोमांच-कंचुकः, उल्लासोत्फुल्लल्लोचनयुगलः, संयोजितकरकमलः, साष्टांगप्रणतिविमलः, प्रवर्द्धमानस्नेहफलः सेवक अमुकः सविनयं प्रेमपात्रीं पत्रीं प्रगुणीकरोति यथाकृत्यमत्र श्रेयःश्रेणीमणीमालानिर्विघ्नकंठपीठहृदयाद्याश्लेषस्फूर्तिमुपैति। श्रीमत्पुरुषोत्तमप्रचुरतरप्रभावात्, श्रीमद्भक्तिप्रभावाच्च श्रीमद्गुरुणां गुण-गौरवगुरुणां श्रेयःकृत्योदंतान् निःप्रत्यूहान् प्रत्यहं समीहे । अतःपरं यथारुचिः। पुनः गुरुणां विज्ञप्तिः विनयप्रणतांगयष्टिः, कृतप्रतत-स्निग्धभावाकृष्टिः, शिरोन्यस्तप्रशस्तशिष्टिः, प्रादुर्भूतप्रचुरसंतुष्टिः, प्रणाम-रामणीयकसंजातसुधांभोधिवृष्टिः, शिशु अमुकः प्रणयरसपूरेण विज्ञप्तिवल्लीं पल्लवयति । यथा चात्र सुखवाटिकानवसारस्यमुपैति श्रीमद्ध्येध्यानविधानात् श्रीमतां सद्गुरुणां प्रसादाच्च किं च श्रीमतां कुशलक्षेमोदंतसूचकं पत्रं प्रकामं कामये। श्रीमद्गुरवः पूज्या किमधिकलेखनेनातः यथारुचि लिखनीयाः।

**अथ वृद्धगुरुभ्रातॄन्** सतीर्थ्यप्रथितगुणश्रेणीसावधानमनाः, प्रमोद-प्रकाशप्रह्वीभवत्तनु, यथोचितविनयादिव्यवहारवल्लीपल्लवघनाघनः, अमुकः गुणग्रहणरसिक, विनयप्रेमस्थेमशालिनी विज्ञप्तिपत्रीकमलिनीं भक्तिभानवीय-

प्रभया प्रकाशयति। यथाकार्यमत्र स्वोचितसुकृतसंततिः समुचितेष्टदेवता-साहचर्यादुपचयमुपैति। तत्प्रवृद्धिं च शुशुभवतां भवतां श्रीमतामायुष्मतां प्रतिक्षणं वाञ्छामि स्वच्छभावोऽहं। अपरं यथारुचिः लिखनीयाः। पुनः वृद्धगुरुभ्रातृन् प्रति विनयादिव्यवहारबंधुरः, श्रीमन्महनीय-चरणरेणुसिंदुर-पूरशिरोधरणसिंधुरः, प्रमोदमेदुरः अमुक विज्ञपयति। यथाश्रेयःपरंपराप्रसरी प्रसरीसरीतिचरिकर्त्ति च मनःपुरुषोत्तम-ध्यानादि-विधिः श्रीमतां महनीयानां कमनीयकृपा-कमलिनीपरिमलप्रसरात् तत्रत्य च सा मन्मनोमोदसंपदे यथा भवति तथा विधेयं अतः यथारुचि ।

अथ **सदृशगुरुभ्रातृन्** प्रकृष्टप्रणयवल्लिपल्लवनप्रावृषेण्यपयोधरः, अतीवमनःशुद्धिविधानसादरः, प्रोल्लासवल्ली-पल्लवनचतुरः, स्निग्धतासिंधुजल-क्रीडाकरणसिंधुरः, सतीर्थ्य अमुकः प्रीतिपत्रीं सितपत्रीं प्रहिणोति यथाश्रेयःकृत्यादि प्रवर्त्तते। श्रीमदिष्टशुभचिंतनादिविधेः अत्र सुखमेधते श्रीमतां तदेधमानमाशासे। अपरं तत्रत्य सुखसमाधिसमाचाराः प्रदेयाः येन प्रवर्द्धमानाः प्रीतयोऽत्र प्रसरंति।

अथ **ज्येष्ठगुरुभ्रातृन्** विनयवाटिकापल्लवनारामिकः, प्रव्यक्त-भक्तिभामिनीभव्यकामुकः, युष्मद्गुणविषयभावनाभावुकः, युष्मच्छिक्षा-परिशीलनश्रावकः, अमुकः सानंदं सस्नेहं सविनयं प्रेमपत्रं प्रगुणीकरोति यथासाध्यविधिरत्र श्रीगुरुचरणस्मरणादिकृत्यं प्रत्यहं प्रवर्त्तते । भवतां कृपावतां तदेधमानामाशासे । अतः परं यथारुचिः।

अथ **तुल्यगुरुभ्रातृन् प्रति** सौहार्दवार्दलप्रावृट्समयः, प्रतिवर्णिनीप्रगुणीकृतरसमयः, स्नेहवाटिकापटुताकरणे वसंतसमयः, प्रकटी-कृतप्रणयांकुरसमुदयः, यथोचितानुनयः, समित्रवया अमुकः प्रीतिपत्रीं प्रहिणोति। यथाऽत्र कुशलपरंपरानवपल्लवतां धत्ते श्रीमतां सौभाग्य-भाग्यवतामेतां प्रवर्द्धमानामाशासे। अतः परं यथारुचिसमाचाराः पुनः तुल्यगुरु भ्रातृन् प्रति सततहितचिंतनसावधानः युष्मद्गोचरप्रीतिविधिविधानः, प्रमादपरिहारसावधानः, प्रणयकारणीभूतयुष्मदीयगुणज्ञानः अमुकः सारस्यपेशलं

प्रीतिलेखं सुखोल्लेखं लिखति यथा यत्र सुखश्रेणीरमणीयतां बिभर्त्ति[1] स्फुर्त्तिमर्ती तथा युष्मदीयामभिकामये। अतः परं यथारुचिः। अथ कनिष्ठगुरुभ्रातॄन् प्रति स्नेहसरोरुहभृंगः, प्रस्फुरद्रागतरंगः प्रत्यहं स्मृति-विषयीकृतयुष्मन्मिलनप्रसंगः, समभिलषितप्रेमप्रसंगः, अमुकः सस्नेहं प्रेमपत्रं प्रपंचयति यथाऽत्र सातपरंपरा प्रवर्तते[2] शुभवतां भवतां तामतितमामीहे। अतः परं यथारुचि।

**पुनः कनिष्ठगुरु भ्रातॄन्** युष्मद्विषयस्नेहामृतपुर्णकुंभः, दूरीकृतविततदंभः, प्रकटितप्रणयारंभः, प्रेममंदिरस्थिरीकरणस्थंभः, अमुकः स्नेहालापपूर्वक पत्रं प्राभृतीकुरुते तथा च धर्मकर्मसशर्ममेधते श्रीपरमगुरुप्रसादात् युष्मदीयसुखोदंतान् समीहे। अतः परं यथारुचिः।

**अथोत्तमसेवकान् प्रति** श्रीमत्परमेश्वरगोचरभवदीयभक्ति-युक्तिव्यक्तिभूतसुखपोषः, भवदीयतत्वविचारसंचारप्रकटितसंतोषः, युष्मद्विहित-सेवागुणमाणिक्यसंग्रहकोषः, विनेयविनयस्मृतिदूरीकृतभिन्नतादोषः, अमुकः प्रेमपात्रं पत्रं प्रपंचयति । यथाकुशलमत्र श्रेयस्विनां मनस्विनां तदेधमानमाशासे। अतः परं यथारुचिः लिख्यते । पुनरुत्तमसेवकान् प्रति युष्मदीयसूक्ष्मेक्षिकाज्ञानरंजितचेतोवृतिः, संततविहितयुष्मद्गुणप्रवृत्तिः, पुष्टीकृत-प्रीतिः, स्वसूत्रितसुनिश्चलमित्रता-रीतिः, मुदितमनोवृत्तिः, अमुकः स्निग्धस्वांतः प्रेमपात्रं पत्रं प्रपंचयति। यथाऽत्र सुखसंततिः व्रततिरिव प्राप्नोति विस्तारं तत्र कारणं सदगुरुपुष्करावर्त्तः, युष्मास्वपि तत्प्रसादेन सुखमेधमानमीहे। अतः परं यथारुचिः।

**अथ मध्यस्थसेवकान् प्रति** युष्मदीयगुणगणरंजितमनःकमलः, सारस्यसरोवरस्नानविमलः, प्रसृतानन्दपरिमलः, स्नेहालापफलः, अमुकः सक्षेमप्रेमपात्रीं पत्रीं प्रकटीकुरुते यथा श्रेयोऽत्र श्री परमगुरुप्रसादात् श्रीमतां भवतां सौभाग्यवतां तत्समीहे । अतः परं यथारुचिः। पुनः मध्यस्थसेवकान् प्रति भवदीयविद्वत्तादिगुणप्रेमपात्रीभूतचित्तः, संगृहीत-स्नेहादिवित्तः, सर्वतः प्रीतः, प्रणयाभरणस्फीतः, अमुकः प्रणया-

१. "वभर्त्ति स्फुर्त्तिमर्तीं तयाथायुष्मदीयां" इति हस्तप्रतौ "बिभर्त्ति स्फुर्त्तिमर्तीं तथा युष्मदीयां" इति प्रतिभाति २. "वप्रत्त्वे" इति हस्तप्रतौ "प्रवर्त्तते" इति प्रतिभाति

लापकलापकेलीं कलयति यथा भूयसां श्रेयसां संततयः प्रसरंति श्रीमन्महनीयानां परमगुरुणां चरणोपासया[१] श्रीमतामायुष्मतां कुशलोदंतान् समीहे । अतः परं यथारुचिः।

**अथ कनिष्ठसेवकान् प्रति** सुप्रसन्नमानसः, विनिर्ज्जितालसः, स्नेहवश्यः, सदा सारस्य, अमुकः सप्रसादं सादरं लिखति यथाऽत्र प्रतिदिनं सुखमेधते श्रीमदीश्वरप्रसादात् शुभवतां भवतां तत्समीहे । अतः परं यथारुचिः। पुनः कनिष्ठसेवकान्0 प्रसन्नीकृतचेतोवृत्तिः, स्नेहोचितप्रवृत्तिः, अक्षयप्रसत्तिः, मनसिकृतभवदासत्तिः, अमुकः सादरं सस्नेहं च समालपयति अत्र श्रेयांसि समेधते श्रीमत्परमेश्वरप्रसादात् शुभवतां भवतां तान्येधमानानि समीहे । अतः परं यथारुचिः

**अथोत्तमान् सुहदां प्रति** प्राचीनपरिचयप्रादुर्भूतप्रभूतरीतिः, युष्मदीयसौहार्द्दवार्दलसंसेचनघननवपल्लवीभूतप्रभूतस्नेहारामस्फीतः, अतीववल्लभी भवद्भवदीयगुणग्रामरमणीयगीतिः निरंतरोल्लसद्भवद्गुणप्रतीतिः अमुकः प्रीतपत्रीसितपत्रीं विशदपक्षशुद्धां मधुराक्षरालापां, सद्गुणकलापां, प्राभृती-कुरुते । यथाजन्यं चात्र श्रेयः परंपराप्रोल्लासमासादयति श्रीपरमेष्ठि-विशिष्टस्मृतिमाहात्म्यात् श्रीमतां सद्गुणलीलावतां प्रीतिपद्मिनी-भास्वतां, सारस्यसरस्वतां, भवतां कुशलोदंतान् समीहे। अतः परं यथारुचिः। पुनः उत्तमान् प्रति प्रेमप्रावृषेण्यपयोधरधारास्फारीभूतप्रीतिकल्लोलिनीपूर्त्तिः, अभिनव-मोहसंदोहसरसीकृतमूर्त्तिः, सर्वतः प्रसरत्- सारस्यस्फूर्त्तिः, चेतोन्यस्त-भवदीयकीर्त्तिः, अमुकः प्रीतिपत्रीनलिनीं, स्नेहसौरभशालिनीं भक्तिव्यक्तिभ्रमद् विद्वन्मालानलिनींप्राभृतीकुरुते यथा जन्यं चात्र श्रेयः समेधते श्रीमद्ध्येयध्यानमहिम्ना परं श्रीमतां तत्समीहे।

**अथ मध्यस्थसुहृदः प्रति** स्नेहसुधाकुंभमग्नः, युष्मद्गुणग्रहणलग्नः, इष्टमित्रेतरप्रीतिभग्नः, प्रीतिक्षेत्रपल्लवनलब्धनिर्दोषलग्नः, अमुकः स्नेहपीयूष-तरंगिणीं प्रकटीकरोति यथाविधेयविधिरत्रश्रेयःकृत्यं निर्विघ्नं समेधते

१."चरणोपसःया" इति हस्तप्रतौ "चरणोपासया" इति प्रतिभाथि।

श्रीपरमेश्वरप्रसादात् शुभवतां भवतां तदाशासे। अतः परं यथारुचिः। पुनः मध्यस्थसुहृदः प्रति प्रोत्फुल्लन्मनःकमलःप्रीतितटिनीस्नाननिर्मलः, युष्मद्गुण-ग्रहकुशलः, प्रीतिलतास्वीकृतसारस्यफलः, अमुकः प्रीतिपीयूषपात्रीं-पत्रीं प्रपंचयति यथा श्रेयोवाटिका नवपल्लवतां धत्ते श्रीपरमेश्वरजलधरसेचनात् युष्मद्विषयवर्त्तिनीं तामपि नवपल्लवां समीहे। अपरमतः यथारुचि।

अथ **कनिष्ठसुहृदः प्रति** स्नेहसंमग्नमनोभावः, युष्मदगुणा-विस्मरणस्वभावः हृत्पट्टिकान्यस्तप्रीतिप्रभावः, सर्वतः शुद्धानुभावः, अमुकः प्रीतिपत्रीं पद्मिनीं प्रकाशयति यथा यत्र श्रेयः परिमलः प्रसरति श्रीमत्परमेश्वरप्रभाकरमहसा श्रीमदीयं श्रेयः समीहे। अतः परं यथारुचिः। पुनः कनिष्ठसुहृदं प्रति प्रीतिपंकजिनीमधुकरः, मनोन्यस्तस्निग्धसुंदरः यथावसरध्यातप्रीतिबंधुरः, युष्मद्धितचिंतनव्यापारभासुरः अमुक प्रीतिपत्री प्रतानिनीं नवपल्लवयति स्नेहघनरसेन यथा कार्यं चात्र सकलमंगलावली स्वैरं विलसति श्रीमत्परमेश्वरसुप्रसादात् भवदीयानां समीहे अतः परं यथारुचिः समाचाराः ।।श्री।।





# निःश्रेयसम्
संस्कृत-पत्रम्

## खण्ड-२
## अर्वाचीन कृतयः

परमगुरुदीक्षास्वीकार-एकशततमेऽब्दे पोषशुक्लत्रयोदश्याम्।

# ।। परमपरमगुरु-
# श्रीआत्मारामजीमहाराजसंक्षिप्तवृत्तम् ।।

-आ.श्री विजयश्रेयांसप्रभसूरीश्वराः

स एको बाल आसित्। यो जिनशासननभोङ्गणे तरणितेजो विस्तारितवान्। तस्य नाम दित्तासिंह आसित्। शिखसंप्रदायीय जाटकुले तस्य जन्माऽभवत्। पंजाबप्रांतीय लहेराग्राम निवासी गणेशसिंह-रुपादेव्योः प्रथमपुत्रः स सं.१८९३ चैत्रशुक्लप्रतिपदां जन्मना पवित्रीचकार। भव्यमुखाकृतिः, दिव्यभाल आजानुप्रलम्बितभुजद्वयो रुपलावण्योदधिः स यथा यथा वृद्धिंगतः तथा कस्य मनो नाऽहरत्? बालचापल्यात्-मन्मनालापाच्च स्वजनानामानन्दप्रदः स शिक्षावयः प्राप्तः, अध्यापकवर्गं चातुर्यात्-बुद्धि-प्रागल्भ्याच्च ररञ्ज। प्रथमदर्शनादेव च ग्रामठक्कुर-धर्मगुरुःअत्तरसिंघः तं प्रत्याकर्षितः।

मातापितरौ जन्मदाने - संस्कारदाने - परिपालने, अध्यापकवर्गश्च ज्ञानदाने निमित्तमात्रं सञ्जाताः । आकृतिः गुप्तगुणगरिमां प्रकटितवती। वयोवृद्धिछद्मेन भवन्तीं गुणवृद्धिं को निवारयिता? मातापितादिस्वजनाः नैके-नैकशः मनोरथमारुढाः अध्यापकास्तत् प्रगतिं दृष्टवा स्वशिक्षासाफल्यं मन्येरन्, ग्रामठक्कुरस्तु तं बालं स्वीयोत्तराधिकारीतया ददर्श। यथावसरं गणेशसिंहं तदर्थं सूचितवान् तेन च स्पष्टतया निषिद्धःस्तेन क्रुद्धः सन् तस्य असद्दोषमुद्भाव्य कारागृहे क्षेप्तुमादिष्टः। गणेशसिंह आपत्कालसहकारिणं स्वमित्रं जोधमलओशवालपार्श्वे जीराग्रामं गत्वा यथातथं ज्ञापयित्वा च-पुत्रं यथोचित्तं संवर्धन-संरक्षण-संस्करणाधिकारितया तमेव समर्पितवान्। कतिपयदिनानन्तरं कारायां क्षिप्तः स दिवं यियाय।

अथ 'जोधाल ओशवालः' सन्मित्रभावमुरीकृत्य कलाकलापं - संस्कारादि च

दातुं समुद्यतोऽभवत्! दित्तोऽपि च पुण्यप्रभावेण जैनकुलसंस्कारसुवासनावासितोऽभवत्। पञ्चमकालप्रभावेण तदानीं-भारतभूमौ सुविहितश्रमणगणसंख्याबाहुल्यं नासीत्। शैथील्यं व्याप्तमासित् तेन जले बुद्‌बुद इव स्व-स्वमताग्रहिणो किञ्चिदाचारशुद्धयादिबाह्यव्यवहारेण भव्यसमूहेषु आदरपात्रीबभुवु:। ते च जगज्जन्तुजीवातु-जिनमन्दिर-जिनमूर्तिप्रमुख-मारम्भरुपं प्रदर्श्य देश-विदेशेषु नैकान्मोहयितुं समर्था बभुवु:। तादृङ्मुनिवेषधारिणां तदा पंजाबेऽपि जैनसाधुरुपेण बहुलतया विहरणमासीत्। जोधमलओशवालमहोदयोऽपि तेनैव तन्मतानुसार्यासीत् ततो दित्तासिंहस्यापि तादृङ्मुनिभि: परिचयो बभूव, एकदा श्रीगंगारामजी श्रीजीवणलालजीप्रमुखमुनय: समाजग्मु:, वर्षावासोषितानां तेषां विशेषपरिचयेण, प्रवचनश्रवण-ज्ञानाध्ययनादिना विरक्तस्य दित्तासिंहस्य संसारत्याग-भावना सञ्जाता, पालकपितु: सूचनया रुपादेवीमातरमभिगम्य लघुबन्धुं-गोविंदसिंहं च मिलित्वाऽनीच्छतीं मातरं स्ववैराग्यदार्ढ्यं निवेदयित्वा स पुनरागत: पालकपितुर्गृहम्। वि.सं. १९१० वर्षे मृगशिर्षशुक्लपञ्चम्यां संसारत्यागं कृतवान्।

'श्रीआत्मारामुनि:' इति नूतननाम्नाऽऽत्मरमणता-बद्धलक्षस्तत्साफल्यं प्रति प्रगुणो जात:। गुरुसुश्रुषा-आज्ञापालन-आचारनिष्ठा-स्वाध्यायप्रभृतिष्वुद्यतो बभूव, कतिपयदिनेष्वेव प्रतिदिनं ३०० मितनव्यश्लोका: कण्ठस्थीकुर्वन् प्रथमवर्ष एव षोडशवर्षीयमुनिवरेण तेन प्रवचनप्रदानेन गुरुवरं श्रोतावर्गं च स्वप्रतिभादर्शनं कारितम्।

एवं काले गच्छति शास्त्रार्थं पठन् स: मुनिवरो यथानिर्धारितार्थश्रवणत: स्वात्मनि दुनोति स्म। किन्तु स्वगच्छे कमपि सत्यं दिदर्शयिषुं स न प्राप्त: यत्र यत्र सत्यगवेषक: स गतवान् तत्र तत्राऽसंतोष एव लब्ध: वृद्धश्रावकेभ्य: पंडितप्रवरेभ्यश्च जिज्ञासितार्थं, तदनुरुपामाचारपरंपरां च न प्राप तेन यथासम्प्रदायं कुर्वन्-जिनप्रतिमापूजनमारम्भबहुलं प्रतिपादयन् विचचार । मनसिखिन्न: स महात्मा गुरुवर्गस्य सम्प्रदायवृद्धानां चाचारविचाराऽसामञ्जस्यं च पश्यन् क्व गन्तव्यं कश्च प्रष्टव्यमिति चिन्तातुरो कालं निर्गमयति स्म।

एकदा गुर्वाज्ञयाऽऽग्रानगरे चातुर्मासार्थं गमनमभूत्। तत्रस्थ अतिवृद्धवयस्यपि चारित्ररतं शास्त्रज्ञं स्वपरागम-रहस्यवेदिनं स्वसम्प्रदायीयश्रीरत्नचन्द्रमुनिवराणां दर्शनमभूत्। मुनिसत्तमोऽपि आत्माराम-सदृशं जिज्ञासुं सत्यान्वेषकं विद्यार्थिनं मुनिं प्राप्य मुमोद। सोऽपि तं ज्ञानप्रदानकुशलं ज्ञानगुरुं सहृदयिनं प्राप्यातितरां मुमोद। पश्चात्तु जिज्ञासासमाधनयो: स्पर्धेव जज्ञिरे। पृच्छन्नात्मारामोमुनि: प्रत्युत्तरन्-मुनिपुंगवश्च स न विरराम। परस्परं परं

संतोषश्चाप्नुवतुस्तौ। ''श्रीजिनवर-गणधरदेवप्रज्ञापितागमरहस्यं, निर्युक्ति-भाष्य-चूर्णि-वृत्तिप्रभृतिभिरेव प्राप्यं, तत्कृते च संस्कृत-प्राकृत-व्याकरणं साङ्गोपाङ्गं पठितव्यं, जिनप्रतिमापूजनं न्यायोपेतं, अशुचिहस्तादिना ज्ञानपुस्तकानि अस्पृश्यानि'' इत्यादि हितवचनेन सम्प्रदायप्रणार्ली उन्मार्गरुपां जानन्नपि वार्धक्यापराधेन स्वयमत्यजन् सन्मार्गप्रतिपादनेन गुर्वाज्ञया विहरन्तमात्मारामुनिवरं प्रति तेन मुनिसत्तमेन बहूपकृतं।

कृतज्ञतोदधिना श्रीआत्मारामुनिनाऽपि सत्यं प्राप्य तथैव प्रवर्तनं प्रतिपादनं च मनसिकृत्योपकारं च शिरसिकृत्य ततो विहृतम्। दशवर्षं यावदज्ञानदोषेण ''जिनप्रतिमापूजा विफला सारम्भा'' इति प्ररुपणया सञ्चितपापपरमाणुनिचयं वस्तुतत्त्वप्रतिपादनेन परिमार्जयन्, सत्यमार्गं च दर्शयन्, विद्यार्थिनं मुनिगणं जिज्ञासुश्राद्धवर्गं च शुद्ध-श्रद्धामार्गे स्थापयन् स मुनिवरोऽथ स्वमताग्रहिणां सम्प्रदायवृद्धानां कोपविषयोऽजनि। तथाऽपि सत्यगवेषकेन सत्यप्रेमिणा मुनिवरेण स्थिरतया विचरितं क्रमशः अष्टादशमुनिवराः सहस्रशो श्राद्धाश्च सन्मार्गयायिनो कृता। दशाधिकवर्षं यावत्तद्देशे वेषे चैव विहृत्य जिनमार्गं प्रभावयन् सद्गुरुशरणप्राप्त्यर्थं गुर्जरधरां प्रति-सपरिवारं जगाम। जैनपुरी-राजनगर इत्याद्यभिधया प्रसिद्धे श्रीमत्यहमदाबादनगरे सहस्रशो जैनानां स्वागतं प्राप्य सद्गुरुशोधं कुर्वन् संविग्नशिरोमणिपंन्यासपदालंकृत-श्रीमन्मणिविजयगणिवराणां दर्शनं प्राप। तदन्तेवासि-मुख्यश्रीमन्बुद्धिविजयमुनिसत्तमाः पंजाबप्रान्तीयत्वेन स्वयूथ्यत्वेन च पूर्वपरिचिता आसन् श्रीआत्मारामुनिना पूर्वं वादप्रसङ्गे परास्तैः ''त्वयाऽपि तत्रैवागन्तव्यं भविष्यति'' इति प्रतिपादितं आसीत् वचनसिद्धिान्तानेव गुरुपदे स्थापयित्वा वि.सं.१९३२ वर्षे श्रीआत्मारामो महामुनिः सप्तदशमुनिपरिवृतः संविग्नशाखायां श्रीआनन्दविजयनाम्ना प्रव्रजितः।

शुद्धसमाचार्या विचरन् पादलिप्तपुर्यां सौराष्ट्रदेशभूषणं तीर्थाधिराजं, त्रैलोक्यपावनं, श्रीशंत्रुजयगिरिवरं श्रीयुगादिदेव-ऋषभस्वामिनं च नत्वा मेघमयूरन्यायेन (श्रद्धा-सद्भाव-प्रमोदकलां विस्तारयन्।) ननर्त। स्वसंवेदनं च निवेदयित्वा बहुकर्मराशिं भस्मसात् चकार। गुर्जरादिप्रदेशे पंजाबप्रान्ते च गुर्वाज्ञया विचरन्, जैनशासनं प्रभावयन्, उन्मार्गोन्मूलनं सन्मार्गस्थापनं च कुर्वन्,जैनशासनाम्बरे तरणिवत् चकाशामास। (चकाश)

स्वपरशास्त्रवेदित्वाप्रतिमप्रतिभाशालित्व-विशुद्धपंचाचारधारित्व-सुविहित-मुनिगणनेतृत्वानेककुवादि-मदनाशित्व-तत्त्वैदम्पर्यायवेत्तृत्व-बृहस्पतिसाक्षात्कारित्व-व्यवहारकौशल्यशालित्वादि-नैकगुणमणिशालित्वेन मूर्त्तो रोहणगिरिरिव स मुनिः पूर्वमहर्षिन् स्मारयन् विरराज।

तेजस्विनं, वचस्विनं, तपस्विनं, यशस्विनं, निस्पृहमूर्तिं च तं महामुनिं शासनधूर्वहने समर्थं ज्ञात्वा भारतवर्षीयश्रीजैनसङ्घेन १९४३ वर्षे कार्तिककृष्णपञ्चम्यां श्री सिद्धगिरिवर-शत्रुञ्जयमहातीर्थे आचार्य-पदग्रहणार्थं भृशमभ्यर्थ्य-संविग्नशाखायां प्रथमसुविहिताचार्यवर्यतया प्रतिष्ठापितः। "जैनाचार्यश्रीमद्- विजयानन्दसूरीश्वर" इत्यक्षरावलिं पावितवान्। तथापि 'श्रीआत्मारामजी महाराज' नाम्ना एव प्रसिद्धिं गतः।

युरोपदेशे सर्वधर्मपरिषदि भृशमामन्त्रितोऽपि जैनाचारमुररीकृत्य न जगाम। जैनसंघेन तदर्थं प्रेषणीयत्वेन पुरस्कृतं वीरचन्दराघवजी नामानं श्राद्धं जैनवाङ्मयरहस्यं, जैनाचारमहत्वं, स्याद्वाददर्शनसर्वस्वं च प्रज्ञापितं, स महोदय श्रीआत्मारामुनीश्वरप्रतिकृतिं गृहित्वा जग्मिवान्।

एवं जैनशासन-आराधना-प्रभावना रक्षादिभिः स्वपरोपकारं कुर्वन्तः सूरिवराः यत्र यत्र गतास्तत्र तत्र 'आत्माराममयं सर्वं सञ्जातं तथापि जिनागममर्यादां सुविहितश्रमणमर्यादां च कुत्रापि न मुमोचिरे। वि.सं. १९५२ वर्षे ज्येष्ठमासे-पंजाबप्रांतीय (वर्त्तमानकाले पाकिस्तानदेशे) गूजरानवालानगरे समाहितचित्तवृत्तयः **"अब हम चलते है, सबको खमाते है, नमो अरिहंताणं"** इति शब्दोच्चारपूर्वं विनश्वरदेहं त्यक्त्वा अविनाशपदवीं प्रति ते सूरिसत्तमा ययुः।



# ।। रामवचनमौक्तिकानि ।।

-मुनिश्री मोक्षरतिविजयाः

(व्याखानवाचस्पति-पूज्यपाद आचार्यप्रवर-
श्रीमद् रामचन्द्रसूरीश्वजी महाराजानां प्रवचनमहासागरोद्धृतानि कानिचिद्)

- स एव धार्मिकः, यः केवलं मोक्षमभिलषति ।
- तस्यैव मोक्षसुखानि अमृतमेव प्रतिभान्ति।
  यस्या संसारसुखानि विषमेव प्रतिभासन्ते।
- स्वयंकृतानि पापानि कश्चिदन्यो न जानाति,
  ततः किं? ननु स्वात्मा तु जानाति न?
- पुण्योदश्चेद्? कश्चिदपि त्रासयितुं न समर्थः।
  पापोदयश्चेद्? भगवानेव त्रातुं समर्थः!
- वैभवं विनाऽपि सुखं लभ्यते
  परंतु संतोषं विना नैव ।
- सुख सामग्री कियत्यपि भवतु !
  सद्गुणैर्विना मनःशान्तिः कुतः?
- पापाचरणेषु साहाय्यं संगं च कर्तुमुत्सुका बहवः!
  परंतु पापकर्मणां विपाके दुर्दशा समये कोऽपि निकटमपि नायाति।
- संसार सुखाभिलाषिणो दुर्लभः सद्धर्मः!
  सद्धर्माऽभिलाषिणः सुलभानि सर्वसुखानि।
- जैनत्वं किं नाम जिनवचनानां मनसा,
  वाचा कर्मणा स्वीकारः।

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

- यस्य चित्ते धर्माराधनाया: फलरुपेण केवलं संसारसुखानां कामना, तस्माद् मोक्षस्तु दूरतरमेव, मोक्षाभिलाषाऽपि दूरम्!
- य: सुखं प्रदाति स उपकारी।
  परंतु यो दु:खं प्रदत्ते स न शत्रु: ।
- पापेभ्यो दूरं तिष्ठन्तु।
  यो पापेभ्यो न बिभ्यन्ति, तेभ्योऽपि दूरं तिष्ठन्तु।
- पञ्च तनयान् मातापितरौ सस्नेहं पालयत:।
  परंतु पश्यतां कलिकालस्य कुप्रभावं......
  पञ्च तनया मातापितरौ सेवितुं न शक्नुवन्ति।
- हे भगवन्! कर्मसंयोगेन नरकंगतस्यापि मम मनसि यदि भवत: स्मृति र्निराबाधा वर्तते, तदा तन्नरकमपि स्वर्गाधिकं मन्ये! तथैव, पुण्योदयेन स्वर्गंगतस्यापि मम मनसि यदि भवत: स्मृतिर्विलीयेत, तदा तत्स्वर्गमपि नरकाधिकं मन्ये।
- ''संसारे वसति स श्रावक:''-नैषा शुद्धा व्याख्या।
  साधुर्भवितुमशक्नुवानो य: संसारे कर्मपरवशो वसति स श्रावक: एषा शुद्धा व्याख्या।
- यदीच्छसि मन:शान्तिं, द्वौमन्त्रान् सततं जप।
  स्पृहयामि न कस्मैचित्, शत्रुर्न मम कश्चन।।
- प्रार्थनीयमियदेव.....
  प्रथमम्, सुखसमये वैराग्यम्।
  चरमम्, दु:खागमने समाधि: ।



# ।। रामवचनमौक्तिकानि ।।

-मुनिश्री श्रुततिलक विजयाः

(येषां सूरीश्वराणां स्मृतौ प्रकाश्यते इदं पत्रं तेषां हृदयवेधकानि
कानिचन वचनानि अत्र संस्कृतेन अनूद्य प्रस्तूयन्ते)

१. स्वस्य दोषोपरि द्वेषः, परस्य दोषोपरि दया- एषाऽस्ति धर्मप्राप्ते र्योग्यता।

२. गृहस्थः कोऽपि शोभनः स्यान्नाम, तेन गृहस्थावस्था शोभना इति नास्ति, सा तु पापमय्येव। पङकजं सुंदरं किन्तु पङ्कः?...।

३. यत्रावस्थानमल्पम्, आवश्यकता अपाराः, दुःखं चानन्तम्-सोऽस्ति संसारः। यत्रावस्थानम् शाश्वतम्, आवश्यकता शून्या, सुखं चाक्षयम्-सोऽयं मोक्षः।

४. नास्तिको दुःखाद् बिभेति, आस्तिकः पापाद् बिभेति, किन्तु तात्त्विकधार्मिकः पापकारणीभूतेभ्यः सांसारिकसुखेभ्य एव बिभेति।

५. पापस्य हृदयपूर्वकः स्वीकारः, पापस्य पश्चात्तापश्च पापं निःशेषयत्येव।

६. पुण्योदयकाले अस्मान् पापकरणाद् रक्षेत्, पापोदयकाले च दुःखाद् रक्षेत् स धर्मः।

७. सम्यक्त्वी कष्टसहनं कर्त्तव्यं मन्यते, श्रावकः कष्टसहने अभ्यासं करोति, किन्तु साधुस्तु कष्टसहने आनन्दमनुभवति।

८. मोक्षपोषकः संसारव्यवहारो वरं, किन्तु संसारपोषको धर्मव्यवहारो दुरन्तः।

९. सर्वोऽपि जनो माम्, 'आग्रही' इति वदेत् तेन दुःखं नास्ति मम, किन्तु एकोऽपि जनो माम् 'असत्यवादी' इति वदेत् तन्मम कलङ्कम्।

१०. मलिनीभूतं वस्त्रं झटित्येव शुद्धीभवति। मलिनीभूतं शरीरमपि झटित्येव शुद्धीभवेत् किन्तु मलिनीभूतं मनः शुद्धीकर्तुं पुष्कल-प्रयत्नस्य आवश्यकता।

११. वीरमृत्योः कृते या सज्जता तदेव शोभनं जीवनम्।

१२. यः स्वस्य सुखं विस्मृत्यान्यस्य सुखं चिन्तयति स एवोदारः।

१३. सुखं भवतः करक्रोडे अस्ति, एतावत् करोतु-''मम किमप्यपेक्षितं नास्ति, मम कोप्यरि र्नास्ति''।

१४. पुण्योदयलभ्ये सुखे विलासो नाम दुर्गतिद्वारोद्घाटनम्।

१५. अस्मिन् संसारे यदि भवानतिथीभूय स्थास्यति तदा शान्ति र्भविष्यति। यद्यधिकारीभूय श्लेक्ष्यति तर्ह्यशान्ति र्भवन्तं परिवरिष्यति।

१६. सानन्दं, क्रियमाणः सुखोपभोगः पापं पुष्टीकरोति। सानन्दं स्वीक्रियमाणं कष्टं पापं पिष्टीकरोति। (चूर्णीकरोतीत्यर्थः)

१७. सज्जनीभूय जीवितुमिच्छति भवान्? त्रीन् गुणान्नङ्गीकुरु पापभयम्[1], [2]न्यायनिष्ठा, इच्छानियन्त्रणम्[3] च।

१८. मोक्षलक्ष्यहीनाः क्रिया नाम अङ्करहिता शून्याः।

१९. संसारस्तु स्मशानतोऽपि भयङ्करः, स्मशाने मृताः ज्वाल्यन्ते, संसारे तु जीवन्तो ज्वाल्यन्ते।

२०. धर्मवान् दरिद्रोऽपि सुखी, धर्महीनो धनिकोऽपि दुःखी।



# ।। समन्तभद्राचार्यस्य आप्तमीमांसा ।।

- एच्.वि. नागराज राव्

कर्णाटदेशे पुरा जैनमतं सर्वत्र प्रसृतम् आसीत्। बहूनि राजकुलानि अत्रत्यानि जैनमतावलम्बीनि आसन्। श्रेष्ठाः साहित्यकृतय आदौ जैनैर्व्यरच्यन्त। कन्नडभाषायाः श्रेष्ठाः कवयः पम्प-रन्न-जन्न-पोन्नादयो जैनाः। अत एव कन्नडसाहित्यस्य इतिहासे जैनयुगम् इति आदिमः कालोऽभिधीयते। कुन्दकुन्दादयः पूज्याः आचार्याः प्राकृतभाषायां दर्शनशास्त्रकृतीररचयन्। ऐदम्प्राथम्येनात्र देववाण्याम् अपि जैनाचार्या एव ग्रन्थान् निबबन्धुः। तत्र समन्तभद्राचार्यस्य विषये किञ्चिद् वक्तुमिच्छामः।

विख्यातो मीमांसकः कुमारिलभट्टः स्वग्रन्थे समन्तभद्रमतमुल्लिखतीति हेतोः समन्तभद्राचार्यस्य प्राचीनत्वं सिद्धं भवति। कदम्बवंशस्य राजानः कर्णाटराज्यं शासति स्म। तेषां राजधानी बनवासी। इयं पुरी अद्याप्यस्ति, इमामेव पम्पोऽपि प्राशंसत्। इयं पुरा जैनज्ञानकेन्द्रत्वेन व्यराजत। समन्तभद्रमुनिगणेन बनवासी गच्छः स्थापितः। राजावलीकथायां समन्तभद्राचार्यस्य जन्म भीमरथी-कृष्णवेण्योर्नद्योः मध्यभूमौ बभूव इति कथितम्। एवं तस्य कर्णाटदेशजत्वं सिध्यति। जैनपरम्पराया बहवः कवयः समन्तभद्रं प्रथमकविं प्रथमसंस्कृतस्तोत्रकारं च मन्यन्ते, तं बहुधा प्रशंसन्ति च। भगवज्जिनसेनाचार्यो महापुराणे इत्थं वदति-

> कवीनां गमकीनां च वादिनां वाग्मिनामपि।
> यशः सामन्तभद्रीयं मूर्ध्नि चूडामणीयते।। (१.४४)
> नमःसमन्तभद्राय महते कविवेधसे।
> यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ।। इति (१.४५)

वादीभसिंह इति प्रसिद्ध ओडेयदेवो गद्यचिन्तामणौ समन्तभद्राचार्यमित्थं स्तौति-

सरस्वतीस्वैर विहारभूमय:

समन्तभद्रप्रमुखा मुनीश्वरा: ।

जयन्ति वाग्वज्रनिपातघातित-

प्रतीपराद्धान्तमहीध्रकोटय:।।इति।।

अष्टशत्यामपि समन्तभद्रोऽवर्णीत्थम्-

श्रीवर्धमानमकलङ्कमनिन्द्यवन्द्य-

पादारविन्दयुगलं प्रणिपत्य मूर्ध्ना ।

भव्यैकलोकनयनं परिपालयन्तं;

स्याद्वादवर्त्म परिणौमि समन्तभद्रम् ।।

वसुनन्दिसिद्धान्तचक्रवर्ती चेत्थं श्लाधते समन्तभद्रम्-

लक्ष्मीभृत्परमं निरुक्तिनिरतं निर्वाणसौख्यप्रदं;

कुज्ञानातपवारणाय विधृतं छत्रं यथा भासुरम् ।

स्वज्ञानैर्नययुक्तिमौक्तिकसरै: संशोभमानं परं;

वन्दे तद्धतकालदोषममलं सामन्तभद्रं मतम् ।। इति

समन्तभद्राचार्यस्य कृतय:।

१. बृहत्स्वयम्भूस्तोत्रम्
(अस्य चतुर्विंशति स्तोत्रमित्यपि नामान्तरम्)
२. स्तुतिविद्या।
(अस्या एव जिनशतकमिति प्रसिद्धि:)
३. युक्त्यनुशासनम्।
४. आप्तमीमांसा।
५. रत्नकरण्डकश्रावकाचार:।
६. जीवसिद्धि:।
७. तत्त्वानुशासनम्।
८. प्राकृतव्याकरणम्।
९. प्रमाणपदार्थ:।
१०. कर्मप्राभृतटीका।
११. गन्धहस्तिमहाभाष्यम्।

एतेषु आद्यं त्रयं समन्तभद्राचार्यं श्रेष्ठं कविं दर्शयति। शिष्टं ग्रन्थाष्टकं तस्य

दार्शनिकत्वं द्योतयति। प्रज्ञाप्रतिभयोः सङ्गमं तस्मिन् पश्यामः। काव्ये शास्त्रे च तस्य समानं कौशलम्। कीदृशी तस्य प्रतिभा इति विज्ञातुं त एव ग्रन्थाः परिशीलनीयाः सहृदयैः। अस्माभिरत्र लघुनि लेखने केवलम् आप्तमीमांसायाः महत्त्वं प्रदर्शयितुं प्रयत्नः क्रियते। समन्तभद्राचार्यस्य दार्शनिकीं प्रज्ञां ज्ञातुं वादनैपुणीम् अवगन्तुं चाप्तमीमांसास्माकं साहायकं करोति। अनुष्टुप्छन्दसि विरचितास्त्रयोदशाधिकशतसंख्याः श्लोका ग्रन्थेऽस्मिन् विद्यन्ते। दश परिच्छेदास्सन्ति। स्याद्वादस्य समर्थना, एकान्तवादस्य निरसनं चात्र क्रियेते। परपक्षखण्डनमेवात्र प्रधानतया कृतम् इति भाति।

**देवागम-नभोयान-चामरादिविभूतयः।**
**मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान्।।**

इति। ग्रन्थारम्भश्लोकः। तीर्थंकरं सम्बोध्यैवं कथ्यते। त्वद्दर्शनार्थं देवानाम् आगमनं, नभोयानं चामरच्छत्रादिवैभवं च दृष्ट्वा त्वां महान्तं न मन्यामहे। यतस्तानि सर्वाणि मायाविषु ऐन्द्रजालिकेष्वपि दृश्यन्ते येषु किमपि महत्त्वं नास्तीति भावः। इन्द्रादिषु देवेषु यद् दृष्टं तत्त्वयि वर्तते चेत्तावतापि महत्त्वं नास्तीति द्वितीयश्लोकेनाह–

**अध्यात्मं बहिरप्येष,, विग्रहादिमहोदयः।**
**दिव्यः सत्यो दिवौकस्स्वप्यस्ति रागादिमत्सु सः।।**

इति। तर्हि तीर्थंकरस्य कथं महत्त्वम्? आप्तत्वात्। लोके बहवस्तीर्थकृतः। किन्तु तेषां विश्वसनीयता नास्ति। तदाह तृतीयेन श्लोकेन।

**तीर्थकृत्समयानां च, परस्परविरोधतः।**
**सर्वेषामाप्तता नास्ति, कश्चिदेव भवेद् गुरुः।।**

लोकोऽयं शाश्वत इति कश्चित्, अनित्य इत्यपरः। जगतः सर्वं दैवाधीनमित्येकः, कर्माधीनमिति अन्यः, आकस्मिकमित्यपरः। अतस्ते परस्परं विरुध्यन्ते। सर्वेषाम् आप्तेति वक्तुं न शक्यम्। कुतः? आप्तः खलु यथार्थवक्ता। यथार्थं वदतां विरोधः परस्परेण कथं संजाघटीति? तर्हि जैनाचार्ये तीर्थङ्करे वा आप्तत्वसाधकं वैशिष्ट्यं किम्? तत्प्रतिपादयति–

**दोषावरणयोर्हानिर्निःशेषास्त्यतिशायनात् ।**
**क्वचिद्यथा स्वहेतुभ्यो, बहिरन्तर्मलक्षयः ।।**
**सूक्ष्मान्तरितदूरार्थाः, प्रत्यक्षाः कस्यचिद्यथा ।**
**अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः ।।**

**स त्वमेवासि निर्दोषो, युक्तिशास्त्रविरोधिवाक् ।**

**अविरोधो यदिष्टं ते ,प्रसिद्धेन न बाध्यते ।।**

**त्वन्मतामृतबाह्यानां, सर्वथैकान्तवादिनाम् ।**

**आप्ताभिमानदग्धानां स्वेष्टं दृष्टेन बाध्यते ।।**

इति। मतान्तरेषु विरोध: कथं भवतीति समन्तभद्र: सयुक्ति प्रतिपादयति। भावैकान्तपक्षेऽभावनिह्नवो भवति। अभावोऽपि अनुभवगोचर इति विरोध:। प्रागभावस्य निषेधे सफलं कार्यद्रव्यम् अनादि स्यादिति दोषापत्ति:। प्रध्वंसाभावनिषेधे च सर्वस्य कार्यस्य नित्यता स्यात्। लोके घटादीन् नष्टान् जानीमहे। तस्माद्दोषापत्ति:। अन्योन्याभावस्य निषेधे एकं वस्तु सर्वात्मकं भवेदिति दोष: इत्यादीन् युक्तिविशेषान् प्रस्तौति समन्तभद्र:। अनेकान्तवादे न कश्चन दोष इति सिद्धान्तयति।

**द्वितीयपरिच्छेदे अद्वैतपक्षस्य दोषान्**

**सविस्तरं प्रतिपादयति समन्तभद्राचार्य:।**

**अद्वैतैकान्त्यपक्षेऽपि, दृष्टो भेदो विरुध्यते।**

**कारकाणां क्रियाया नैकं स्वस्मात्प्रजायते ।।**

**कर्मद्वैतं फलद्वैतं, लोकद्वैतं च नो भवेत्।**

**विद्याविद्याद्वयं न स्याद्, बन्धमोक्षद्वयं तथा।।**

**हेतोरद्वैतसिद्धिश्चेद्, द्वैतं स्याद्धेतुसाध्ययो:।**

**हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किम्?।।**

इति। एवमद्वैतैकान्तमतं प्रतिषिध्य समन्तभद्राचार्य: पृथक्त्वैकान्तमतमपि युक्त्या दूषयति। यथा-

**पृथक्त्वैकान्तपक्षेऽपि, पृथक्त्वादपृथक् तु तौ।**

**पृथक्त्वे न पृथक्त्वं स्यादनेकस्थो ह्यसौ गुण:।।**

इति। तृतीयपरिच्छेदे सर्व नित्यमिति पक्षं चेत्थं खण्डयति-

**नित्यत्वैकान्त-पक्षेऽपि, विक्रिया नोपपद्यते ।**

**प्रागेव कारकाभाव:, क्व प्रमाणं क्व तत्फलम् ।।इत्यादि।।**

सांख्या: सत्कार्यवादिन इति सुप्रसिद्धम्। ते वदन्ति-असदकरणात्,

उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात्, कारणभावाच्च सत्कार्यम् ।।इति।। तन्मतं च समन्तभद्राचार्यः सोपहासं खण्डयतीत्थम्-

**यदि स्यात् सर्वथा कार्यं, पुंवन्नोत्पत्तुमर्हति ।**

**परिणामप्रक्लृप्तिश्च, नित्यत्वैकान्तबाधिनी।। इति।।**

सर्वदा सर्वथा कार्यं सत्। तर्हि पुरुषवत् कार्यमपि नित्यं स्यात्। घट उत्पन्नो घटो नष्ट इति व्यवहारस्तर्हि अप्रामाणिकः स्यादिति भावः।

बौद्धाः सर्वं क्षणिकमित्याहुः। तेषां वादं च खण्डयन् समन्तभद्राचार्यः तन्मते बन्धमोक्षदिव्यवस्थाया असम्भवः इति सयुक्ति प्रतिपादयति। बौद्धैः सन्तानशब्देन यदुच्यते, यच्च संवृतिशब्देन लोकव्यवहारोपपादनाय प्रतिपाद्यते, तत्सर्वम् असङ्गतमिति समन्तभद्रो निरुपयति। यथा-

**न हेतुफलभावादिरन्यभावादनन्वयात्।**

**सन्तानान्तरवन्नैकः, सन्तानस्तद्वतः पृथक्।।**

**अन्येष्वनन्यशब्दोऽयं संवृति र्न मृषा कथम्।**

**मुख्यार्थः संवृतिर्न स्याद्, विना मुख्यान्न संवृतिः ।।**

इति। बौद्धानां केषाञ्चिन्मते विज्ञानसन्ततिरेवात्मा। तदुच्छेदो मोक्षः। मोक्षोऽपि अष्टाङ्गधर्महेतुकः। तत्सर्वमसङ्गतम्। सर्वस्य वस्तुनो नाशस्य तन्मते स्वाभाविकत्वात्। नाशयिता न नाशयतीति हिंसादे हिंसात्वमेव नास्ति। एवं च यः कोऽपि किमपि करोतु। धर्मस्याधर्मस्य वा कथैव न भवति। एतत्सर्वमभिप्रेत्य समन्तभद्रो वदति ।

**अहेतुकत्वान्नाशस्य हिंसा हेतु र्न हिंसकः।**

**चित्तसंन्ततिनाशश्च मोक्षो नाष्टाङ्गहेतुकः।। इति।**

नैयायिकाः सामान्यं समवायं च पदार्थत्वेन गणयन्ति ।

नित्यमेकमनेकानुगतं सामान्यम् ।

गुणगुणिनोः जातिव्यक्त्योश्च सम्बन्धः समवायः।

स चैकः इति आतिष्ठन्ते। तत्सर्वं खण्डयितुं समन्तभद्र आह-

**सामान्यं समवायश्चाप्येकैकत्र समाप्तितः।**

**अन्तरेणाश्रयं न स्यान्नाशोत्पादिषु को विधिः।।**

**सर्वथानभिसम्बन्धः, सामान्यसमवाययोः।**

**ताभ्यामर्थो न सम्बद्ध, स्तानि त्रीणि खपुष्पवत् ।।**

इति। ज्ञानादेव मुक्तिरिति पक्षमपि प्रतिक्षिपति सयुक्ति समन्तभद्रः। यद्वदति-

**अज्ञानाच्चेद् ध्रुवो बन्धो, ज्ञेयानन्त्यान्न केवली।**

**ज्ञानस्तोकाद्विमोक्षश्चेदज्ञानबहुतोऽन्यथा।।**

इति। अज्ञानाद्बन्ध इति वदसि चेत् सर्वेषां सदा बन्धप्रसङ्ग। सर्वज्ञादितरेषां सर्वेषां यत्र क्वापि विषये अज्ञानस्य सत्त्वात्। स्वल्पज्ञानादपि मोक्ष इति चेत् सर्वेषां सद्य एव मोक्षप्रसङ्गः। यस्मिन् कस्मिंश्चिद्विषये ज्ञानस्य सर्वेषां सत्वात्। एवमेकान्तवादेषु नानादोषान् उक्त्वा समन्तभद्रोऽनेकान्तवादापरपर्यायं स्याद्वादं प्रतिष्ठापयत्यन्तिमेन श्लोकेन-

**विधेयमीप्सितार्थाङ्गं, प्रतिषेध्याविरोधि यत्।**

**तथैवादेय-हेयत्वमिति, स्याद्वादसंस्थितिः।।इति।।**

अस्य मेधाविनः श्री समन्तभद्राचार्यस्य सर्वे ग्रन्थाः विद्वद्भिरध्येया विमर्शनीयाश्च। भारतीयदर्शनशास्त्रेषु जैनसिद्धान्तस्योत्कृष्टं स्थानमस्ति। जैनविपश्चिद्भिः परम्परेयं संरक्षणीया प्रयत्नेनेति शम्।



# ।। रामायणे कालगणनम् ।।

-कालूरि हनुमन्तरावः हैदराबाद

अस्मिन् लेखे इमावंशौ विचार्येते।

१. सीतारामलक्ष्मणानां पञ्चवट्यां निवासकालः कियान्?

२. सीतान्वेषणार्थं हनुमान् लङ्कायां कस्मिन् मासि प्रविष्टः?

पितुरादेशेन चतुर्दशवर्षाणि वस्तुं वनं प्रविष्टेन रामेण बहुमुनिनामाश्रमेषु निवसता दश वर्षाणि गमितानि। (अरण्य १०.२५)। ततः अगस्त्य वचनेन स पञ्चवटीं गत्वा न्यवसत्। रावणः सीतामपहृत्याशोकवने न्यस्य तस्या द्वादश मासावधिं ददौ (अरण्य ५४.२२)। तदन्तरे सुन्दरकाण्डे मास द्वयावधिं ददौ। (२०.८) अनेन गण्यते तस्य द्वादशमासावधे र्दशमासा गताः। मास द्वयादूर्ध्वं रामो रावणं हत्वा सीतया सहायोध्यां गतः। एवमशोकवने रावणेन सीतानिर्बन्धस्य काल एकः संवत्सरः। अतः पञ्चवट्यां निवासकालः त्रिणि वर्षाणि गण्यन्ते।

सीतान्वेषणार्थं हनुमान् लङ्कां कदागत इति प्रश्नो दुस्समाधानः। तत्र कारणं बहुपाठान्तरप्रक्षेप व्याकुलता। तथापि प्रयत्नः क्रियते।

वाली श्रावणमासे हतः। कार्तिके मासे सीतान्वेषणमादिश्य रामो गिरिगुहायां चतुरो मासानुवास। (किं.२५.१२-१५)। परन्तु कार्तिके प्राप्ते सुग्रीवस्योद्योगो न दृष्टः। (२९४५) पश्चात् सुग्रीवेण सेनाः दिक्षु प्रेषिता एक मासावधिं कृत्वा। (३९.६१) दक्षिणदिशायां गतानां विलम्बो जातः। कियान् स विलम्ब इति रामायणे अनुक्तम्। स्वयंप्रभागुहाया निर्गम्य वानरा वसन्तमनुप्राप्तं ददृशुरित्युक्तम्। (५२.१८)। तत्र गोविन्दराजः। ये वसन्ते फलन्ति ते शिशिरे पुष्पन्ति। शरत्कालान्ते मार्ग-शीर्षे मासि सेनां सन्निधाप्य पौषमासमवधिं कृत्वा सुग्रीवः प्रस्थापितवान्। स पौषो माघश्चातीतः। फाल्गुन एव प्रवृत्तः। तेन वसन्तः प्रत्यासन्न एव न प्राप्तः। (५३.१८)। महाभारतरामोपाख्याने च सुग्रीवो वानराणां मासावधिं

चकार।(वन २६६.१७)। दक्षिणदिशायां गता वानरा मासद्वयानन्तरमागताः। (२६६.२५)। इदानीं संदेहो जायते तदा वसन्तकालस्य प्राप्तिरासन्नता वा कथं स्यादिति। परन्तु अत्र दृष्ट्वा हैमन्तिकान् वृक्षानिति, हेमन्तम् इति पाठान्तरे स्तः संशोधितप्रकाशन-ग्रन्थस्याधःसूचिकायाम्। अनयोः पाठान्तरयोर्ग्रहणेन तदा हेमन्तकालः प्रवर्तते स्म न वसन्तकाल इति भवेत्।

अथ हनुमान् लङ्कां गतः। तत्र पुनरुक्तं ''पुष्पिताग्रान वसन्तादौ, ददर्श विविधान् द्रुमान्'' इति। (सुं.१२.२) तदा वसन्तकालः असंभवः। अत्र च पाठान्तरं विद्यते ''पुष्पिताग्रानथापश्यदेकत्र विविधान् द्रुमान्'' इति। वसन्तकालः अनुक्तः। एतत्पाठान्तरग्रहणेन तदा वसन्तकालो न भवति। हेमन्तकाल एव भवेत्। अनेन विचारेण सिध्यति हनुमान् लङ्कां माघान्ते फाल्गुने वा प्रविष्ट इति।

किष्किन्धाकाण्डे प्रथमे सर्गे रामलक्ष्मणौ पम्पासरस्समीपे चरतः स्म। बहुषु श्लोकेषु तदा प्रवर्तमानो वसन्तकालो वर्णितः। पम्पासरसो नातिदूरे आसीत् ऋश्यमूकः। पम्पायाः शीघ्रमेव तौ ऋश्यमूकं प्राप्तौ स्याताम्। आगच्छन्तौ तौ सुग्रीवः अपश्यत्। रामसुग्रीवस्नेहः वालिवधनिश्चयश्च शीघ्रं कृतौ। ततः शीघ्रमेव वालिवधः कृतो भवेत्। तदा वर्षाकालः प्रवर्तते स्म । तस्मात् रामलक्ष्मणयोः पम्पासरोगमनसमये वसन्तकालप्रवर्तनमसंभवम्।

एष सर्गः प्रक्षिप्तव्याप्तोऽस्ति। अस्मिन् सर्गे गोविन्दराजादिव्याख्यायुत ग्रन्थे १३१ श्लोकाः पौरस्त्यरामायणग्रन्थे ५१ श्लोकाः संशोधित प्रकाशग्रन्थे ४९ श्लोकाश्च सन्ति। वसन्तकालवर्णनं तु सर्वत्रास्ति। प्रथमं रामायणं बहुकालं गायकैः गानरुपेण प्रचारितमासीत् तदा बहु प्रक्षिप्ताः पाठाः रामायणे प्रविष्टाः स्युः। ते प्रक्षिप्ता बहुषु तालपत्रग्रन्थेषु प्रविष्टा भवेयुः। एवं प्रविष्टा वसन्तकालवर्णनप्रक्षिप्तश्लोका अस्मिन् सर्गे सन्तीत्युह्यम्। यत्र यत्र वृक्षपुष्पवर्णनमासीत् तत्र तत्र प्रक्षिप्तकारैर्वसन्तकालवर्णनश्लोकाः संयोजिता भवेयुः। किष्किन्धाकाण्डप्रथमसर्गसमये वसन्तकाल प्रवर्तनमसंभवम्। तदा ग्रीष्मावसानेन वर्षारम्भेण वा भवितव्यम्।

(श्लोकसंख्याः वटोदरनगरस्य प्राप्य संस्थानिर्मित-संशोधितरामायण-प्रकाशनानुसारेण पूर्णनगरस्य भण्डाकरसंस्थानिर्मितमहाभारतसंशोधितप्रकाशनानुसारेण च दत्ताः।)

**(लौकिकमतानुसारी-अयं लेखः)**

# ।। पारिस्थितिकं किञ्चित् ।।

-अशोकन् पुरनाट्टुकरा

परिस्थितिसम्बन्धिनी कापि वार्ता इदानीम् अनुकूला श्रूयते। अनुकूलाः भवितुम् असमर्थाः प्रवृत्तयः एव मानवानाम्। अत्यन्तं बिभीषिकां कामपि पारिस्थितिकीं वार्तां प्रस्तौमि। विश्वस्य प्रमुखानि नगराणि सर्वाण्यपि कालावस्थाशिखराङ्कं (Climatic Tipping Point) उपगच्छन्ति। अथवा आगोलतापनं इति अतिपरिचितनाम्ना उद्घुष्टं यत् तदासन्नं पदं प्राप्तम्। कालावस्थाव्यतियानस्य सीमा प्रतीक्षितात् बहुपूर्वमेव तरणीया इतीदं याथार्थ्यं लोकोऽयं सगौरवं न पश्यति प्रायः ई. २०५० तमवर्षात् प्राक् समस्तेऽपि विश्वे तापमानमधिकं भविष्यति यस्मात् प्रत्यागमनमसाध्यमेव। अतीत १५० वर्षेषु ई.२००५ तमवर्षे एव तापमानम् अधिकतमम् अनुभूतम्। इतः परं एतावत् तापमानं स्थिरं भविष्यति।

विश्वस्य प्रमुखानि नगराणि एतत् शिखराङ्कं कदा वा प्राप्स्यन्तीति परिस्थितिपत्रिकाकाराः (Nature Journal) ज्ञापितवन्तः सन्ति। लोकस्य १२ राज्येसु विद्यमानैः २१ कालावस्थापठनकेन्द्रैः विकासित ३९ पठनादर्शान् सविस्तरं पठित्वा ''हवाय् विश्वविद्यालयः'' एव प्रत्येकं नगरं कस्मिन् वर्षे तापमानस्य शिखराङ्कं प्राप्स्यतीति समुद्घुष्टवान्।

अस्माकं भारतस्य दश प्रमुखानि नगराणि अस्यां पट्टिकायां लब्धस्थानानि सन्ति। इन्डोनेष्यायाः मनोक्वारि नाम नगरं एव सर्वेषाम् आदौ एतत् शिखराङ्कं तरिष्यति। ई.२०२० तमे वर्षे आगोलतापनम् इति प्रतिमासं निरोद्धुं विना विलम्बम् अतिप्राधान्येन यानि कानिचित् प्रवर्तनानि कुर्वन्ति चेत् कालं किञ्चित् दीर्घीकर्तुं शक्नोति। यदि इदानीं विश्वस्य या गतिः सा आनुवर्तते चेत् नास्ति संशयः झटित्येव शिखराङ्कः आपतिष्यति। शिखराङ्कस्य प्रापणाय उद्दिष्टकालगणनामनुसृत्य राष्ट्राणि द्विधा विभक्तानि, 'हवाय् विश्वविद्यालयस्य' पठन विभागेन। भारते सर्वप्रथमं मुम्बई-चेन्नै इति नगरद्वयमेव २०३४ तमे वर्षे शिखराङ्कः प्राप्स्यति।

प्रतिरोधप्रवर्तनानि यदि सम्यक्तया आयोज्यन्ते तर्हि २०५१ तमवर्षपर्यन्तं कदाचित् दीर्घीकर्तुं शक्नुमः।

शिलाजातवस्तुनाम् अमितः उपयोगः हरितगृहवातकानां अमितं बहिः प्रेषणम् इत्यादिनि आगोलतापनवर्धनाय हेतुभूतानि अनेके विषयाः सन्ति। उष्णभूविभागे विद्यमानाः नगरा एव ध्रुवप्रदेशेभ्य अधिकं वेगेन शिखराङ्कं प्राप्स्यन्ति। साधारणया उष्णभूविभागस्य अन्तरीक्षतापमाने नाधिकं व्यतियानं दृश्यते। अतः अन्तरीक्षतापे जायमानम् अल्पमात्रमपि व्यतियानं तत्रत्याम् आवासव्यवस्थां आमूलं परिवर्त्तिष्यति। जैव- वैविध्यस्य भूरिणा अपि भागेन व्याप्तस्य उष्णभूविभागस्य इदं व्यतियानं जीवस्य सन्तुलितावस्थां नाशयिष्यति। प्रत्येकस्य राज्यस्य साम्पदिक-सैनिकबलं जनसंख्याधिक्यं वा आन्तरिक्षकं तापं व्यतियानं समीकर्तुं नैव प्रभवन्ति। विकसित-अविकसित-विकस्वर राज्यमिति भेदोऽपि नास्त्येवास्य तापव्यतियानस्य अत्र केरलम् उपविश्य 'प्रकृति' (Nature) इति पत्रिकायां प्रकाशिते वृत्तान्ते चर्च्यमाने बहुदूरे कुत्रापि सम्भाव्यमानं कालावस्थाव्यतियानं तथा अन्तरीक्ष्योष्मणः वर्धनं च तत्रत्यानेव जनान् बाधते खलु इति निस्सङ्गाः भवितुम् अर्हामः। अथवा तत्परिहाराय वयं किं कुर्म इति वादम् उन्नेष्यामः-सह तपिष्यामः। यद्यपि हवाय् विश्वविद्यालयस्य पट्टिकायां नैवान्तर्भूतं केरलं, तत्रत्या कापि वार्ता ज्ञेया एव। ऐक्यराष्ट्रसभायाः कालावस्था व्यतियाननिरिक्षणसंस्था अतीत जूण् मासे भारतसर्वकाराय किमपि आवेदनं समर्पितवती तत्र केरलमधिकृत्य एवं वदति कालावस्था व्यतियानात् समुद्रतले सञ्जातया उन्नत्या बहूनि राष्ट्राणि बिभीषिकामभिद्रवन्ति। तेषु अन्यतमं वर्तते केरलम्।

यदा वन-नदी नशीकरणम् अन्तरीक्षमलिनीकरणम् इत्यादि विरुद्धवादाः उन्नीयन्ते बोधवत्करणं वा क्रियते तत्सर्वं वृथा जल्पनमिति निराकर्तुं सुकरमेव उष्णम् अधिकं भवति चेत् ए.सी. यन्त्रं स्थापयामः इति वदन्ति। परन्तु गृहे, कार्याने कार्यालये च ए.सिं घटयित्वा कर्म कर्तुं प्रभवन्तः शते कति अस्ति? उष्णाधिक्ये दाहम् अनुभवन्तः जलोपप्लवे जले प्लवमानजीविताः एव भवन्ति भूरिणः अपि जनाः। आगोलतापनम् इति केवलं पठनवृत्तान्तेषु प्रयुक्तं साङ्केतिकं किमपि पदं नास्ति परन्तु कठिनं याथार्थ्यमेव, तस्य अनन्तरफलानि नानारुपेण मनुष्यस्य प्रकृतेश्च जीवितम् अस्वस्थं करिष्यत्येव। ए. सी. योजनेन आतपत्रधारणेन वा नैव निवापितुं शक्या भविष्यस्य तीक्ष्णम् उष्णम्।

Ref. (1) Nature Journal (2) 4, N, Frame Work & Convention on Climatic Change.)

# ।। सहकारस्य महिमा ।।

**बोधकथा**

**-देवर्षि कलानाथ शास्त्री**

श्रूयते यत् एकदा प्रजापतिः प्रसीदन् स्वभवने सहभोजमायोजितवान्। प्रजापतेः सुविशाले प्रासादे एकस्मिन् महाविशाले भोजनागारे देवानां सहभोजः आयोजितोऽभूत्, तस्मिन्नेव दिवसे याऽपरस्मिन् विशाले भोजनागारे दैत्यानां सहभोजोऽभूत्। पृथक्-पृथक् भोजनस्य व्यवस्था संभवतोऽस्मात् कारणात् कृता यन्मा देवदानवाः परस्परं कलहादि तत्र कार्षुरिति। सुविशालस्य प्रासादस्य प्रवेशद्वारे एव विश्वकर्मा स्वागतार्थं स्थितोऽभूत्। सोऽभिवादनपूर्वकं सर्वेषामेव स्वागतं व्याहरन् सर्वेषामागन्तुकानां द्वावपि हस्तौ एकैकेन काष्टपट्टकेन प्रत्येकं हस्तं वस्त्ररज्जुभिर्बद्ध्वा तेभ्यः स्व-स्व भोजनस्थलस्य मार्गं दर्शयति स्म। हस्तबन्धनस्य केयं चेष्टा का वाऽऽवश्यकता इति न जानाना देवा दानवाश्च मनस्येव क्रुद्धा अभूवन् यतः करद्वयमपि यदि प्रत्येकं काष्टपट्टकेन सह बन्धनबद्धं स्यात्तर्हि पाणि-कुंचनाभावे कथं स्याद् भोजनस्य संभवः? 'कीदृशीयं प्रजापतेः धूर्तता' इति समालोचनाऽपि प्रसृता किन्तु सभ्यतावशान्न केनापि प्रकटं विरोधो, विद्रोहो वा कृतः। देवाः स्वभोजनगृहे दानवाश्च स्वभोजनागारे समवेताः। तत्र हि स्वादूनि भोज्यानि पट्टकेषु निहितेषु सुवर्णपात्रेषु परिवेषितान्यासन्। किन्तु कथं भुज्यताम्? सर्वे किंकर्तव्यविमूढा अतिष्ठन्।

कतिपयक्षणान्तरं स्वयं प्रजापतिर्द्वयोरपि भोजनकक्षयोरतिथीन् अभिवादयितुं क्रमशः उपससर्प। प्रथमं दानवानां भोजनकक्षेऽयमगात्। तत्र हि स्वादूनि भोज्यानि धारयतां पात्राणां परितः समवेता दानवा हस्तस्याऽऽकुञ्चनेऽसमर्थाः ततश्च स्वमुखे ग्रासमर्पयितुमक्षमास्तारस्वरेण प्रजापतेरिमां धूर्ततां सगालिप्रदानं निन्दयतोऽभूवन्। प्रजापतिः कलहाशङ्कया द्वारादेव तूष्णीं परावृत्तो देवानां भोजनाऽऽगारे प्रविष्टः। तत्र तु शांतिं दृष्ट्वाऽऽश्चर्यान्वितोऽभूत्। देवानामपिकरद्वयं प्रत्येकं काष्ठस्तृतमासीत् किन्तु एकैकस्य पात्रस्योपरि द्वौ द्वौ देवौ परस्परसांमुख्येनोपविष्टौ स्वादूनि भोज्यानि हस्तेनादाय अन्योन्यस्य

मुखे समर्प्य तान्यास्वदयन्तावास्ताम्। स्वमुखे त्वाकुंचनाऽभावात् स्वयं हस्तप्रेषणमासीदसंभवम्। प्रजापतिना दृश्यमिदं दृष्ट्वा सप्रसादं साधुवादैरभिवादिता देवाः।

तदैव समीपस्थात् अपवरकात् भोजनागारात् (यत्र दानवाः सहभोजाय समवेता अभूवन्) कोलाहलः श्रुतः। प्रजापतिः शीघ्रमेव तत्र गत्वा परिस्थितिमपश्यत्। दानवाः सकोपं साक्रोशं च प्रजापतेः कर्मचारिभिः सह कलहं कुर्वन्तः, तान् प्रहर्तुं च उद्यता अदृश्यन्त।

त्वरितमेव काष्ठपट्टकेन कुंचनरहितीकृतं स्वहस्तं मोचयितुं भृत्यान् तारस्वरेण आदिशन्तो दानवाः प्रजापतेः अविनयम् आक्रोशन्तः अभूवन्। 'यदि भोजयितुम् इच्छा नाऽभूत् तर्हि किमिति निमन्त्रिता वयम्?' इत्यादि प्रलपन्तः ते प्रजापतिना तृष्णींभवितुं प्रार्थिताः। दानवैः कथितम्-'किमिति तूष्णीं भवामः? न पश्यसि त्वं यत् बन्धनबद्धेन करेण कथं वयं भोक्तुं प्रभविष्यामः?'

प्रजापतिना उत्तरितम्-किमिति न भविष्यन्ति समर्था भवन्तः भोक्तुम्? अस्यां स्थितावपि समुचितेन उपायेन धीमन्तो भोजनस्य प्रबन्धं सरलतया कर्तुं समर्था भवन्ति।'

'कथं भवन्ति समर्थाः?' इति साक्रोशं दानवा अपृच्छन्। प्रजापतिना कथितम्-'यदि भवन्तो द्रष्टुं वाञ्छन्ति तर्हि भवत्सु पञ्चषा महानुभावा मया सह चलन्तु, समीपस्थे भोजनागारे एतस्यामपि बन्धनबद्धहस्तायां स्थितौ सानन्दं देवाः कथं भोजनमास्वादयन्ति इति पश्यन्तु।'

एतत् श्रुत्वा कतिपये दानवाः अपरस्मिन् तस्मिन् भोजनागारे अगच्छन्। तत्र च परस्परं ग्रासप्रदानस्य दृश्यं दृष्ट्वा विस्मिता अभूवन्। प्रजापतिना प्रोक्तम्-'श्रीमन्तः, दृष्टं भवता कथमस्यां विवशायामपि स्थितौ देवैः कश्चन उपाय आसादितः। उपायोऽयं सहकारस्य अभूत्। श्रूयताम्-

**लोके साफल्यमूलं, स्यात् अन्योन्यसहकारिता।**

**प्रत्युत्पन्नमतित्वं च, न क्रोधो, न च वैशसम्।।**

सर्वमिदं दृश्यं पश्यन् विश्वकर्मा अपि सर्वेभ्यः घोषितवान् - सत्यम्। यः खलु अन्यं भोजयितुं जानाति स एव भोक्तुमपि प्रभवति। यः केवलं स्वयं भोक्तुं चिन्तयति, स भोक्तुं न प्रभवति।

*****

## वाक्यवृद्धेः कारणम्।

यथा शरीरमन्नेन वृक्षं खादेन वर्धते।
तथा हि संस्कृतं वाक्यं विशेषण विवर्धते।।

जन्मकाले मानवस्य शरीरं लघु भवति। इदं लघुशरीरं कालान्तरे क्रमशो वर्धते। शरीरस्य वर्धने पूर्वं दुग्धरुपं भोजनं तत्पश्चात् गोधूम-चणक-औदनादीनाम् अन्नानाम् भोजनं निमित्तं भवति। एवमेव एक: वृक्ष: अपि प्रारम्भे लघु: भवति। तत: स खादेन जलेन च क्रमश: वर्धते।

अनेन एव प्रकारेण संस्कृतभाषाया वाक्यमपि प्रारम्भकाले लघु भवति । तत्र केवलं क्रियापदमात्रम् वाक्यम् भवति। तद्यथा-पठति। लिखति। हसति। इति।

तत: वाक्ये क्रियापदानुसारि कर्तृपदम् आगच्छति। तद्यथा-देव: पठति। गणेश: लिखति। छात्र: हसति। इति। तदनन्तरं विवक्षानुसारं विभिन्नानि कारकपदानि संयुज्य वाक्यस्य मूलभूत: आकार: निश्चतो भवति वाक्यं चानेन सुतरां वर्धते। तद्यथा-ऋषीत: पठति। अस्य कर्तृक्रियावत: वाक्यस्य करणादिकारकै: विस्तर: भवति-ऋषीत: नेत्रेण ज्ञानाय सूर्यप्रकाशे कालिदासस्य शाकुन्तलं पठति। एवं प्रत्येकं वाक्यं वर्धते। वाक्यवृद्धे: अयम् एक: स्वाभाविक: विकल्परहित: अनिवार्य: च मार्ग:।

तत्पश्चात् एतादृशं क्रियाकारकपदयुक्तवाक्यं तेषां तेषां कारकपदानां विशेषणपदप्रयोगेण क्रमश: वृद्धिं गच्छति। तद्यथा-ऋषीत: पठति। इति लघु वाक्यम् कर्तृपदस्य क्रियापदस्य च विशेषणपदै:-कमलेशात्मज: विसनगरवास्तव्य: द्वाविंशतिवर्षीय: अधीतविद्य: ऋषीत: उच्चै: सम्यक् पठति। अत्र ऋषीत: इत्येकस्य कर्तृपदस्य चत्वारि विशेषणपदानि पठतीति एकस्य क्रियापदस्य द्वे विशेषणपदे प्रयुक्ते स्त:। एवं चास्मिन् वाक्ये नवपदानि संजातानि। विवक्षानुसारमित: अपि अधिकानि विशेषणपदानि प्रयोक्तुं शक्यते। अपरं चेदमुदाहरणम् -

''रामः रावणं जघान'' इत्येकम् प्रारम्भिकं वाक्यमस्ति। अस्मिन् वाक्ये त्रीणि पदानि सन्ति। एवमस्य वाक्यस्य आकारः लघुरेवास्ति। परन्तु यदा अस्मिन् वाक्ये विशेषणानाम् पदानाम् प्रयोगः भवति, तदा वाक्यमिदं निम्नानुसारं वर्धते।

१. एकैकं लघु विशेषणं प्रयुज्य-वीरः रामः राक्षसं रावणं जघान।- एतावत् दीर्घं वाक्यं भवति।

२. ततः अनेकेन विशेषणेन विशिष्टं वाक्यमितोऽपि दीर्घं भवितुमर्हति। यथा- महावीरः, जानकीवल्लभ, दाशरथिःरामः, दुर्जयं लङ्कापतिं रावणं जघान। अत्र रामस्य त्रीणि विशेषणानि प्रयुक्तानि सन्ति। रावणस्य च द्वे विशेषणे प्रयुक्ते स्तः।

३. एवमेव यावन्ति अधिकानि विशेषणानि वाक्ये प्रयुक्तानि भवन्ति वाक्यमपि तावत् दीर्घात् दीर्घतरं भवति। यथा सूर्यवंशीयः, भगवदवतारः कौशल्यानन्दनः राघवः विनीतो रामः, राक्षसकुलीनं सीतापहरणकारकं मिथ्याभिमानिनं प्रबलपराक्रमं राक्षसराजं रावणं लीलया जघान।

अस्मिन् वाक्ये रामस्य रावणस्य च पञ्च पञ्च विशेषणानि जघान इति क्रियापदस्य चैकं विशेषणं प्रयुक्तमस्ति।

एषा परम्परा अनन्ता अस्ति। यस्य वक्तुः यादृशः शब्दवैभवः भवति, स विशेषणपदानां प्रयोगैः तादृशमेव दीर्घतमम् वाक्यं रचयितुं प्रभवति।

यदि वयमपि दीर्घं वाक्यं रचयितुमिच्छुकः तर्हि अस्माकमपि विशालः शब्दकोशः भवेत् तदर्थं प्रयत्नः करणीयः इति दिक्।



# ।। ''योगशास्त्र'' - ग्रंथरत्नस्य परिचयपत्रम् ।।

-मुनिश्री आत्मदर्शनविजयाः

**ग्रन्थकर्तारः कलिकालसर्वज्ञश्रीहेमचन्द्रसूरयः।**

श्रीवीरशासने कोटिकगच्छ-वयरीशाखा चन्द्रगच्छरुपी-गगनतले सूर्यप्रतिभाः श्रीमदाऽऽर्यदिन्न-यशोभद्र-प्रद्युम्न-गुणसेन-देवचन्द्रसूरिपट्टप्रद्योतका-श्चौलुक्यवंश-चूडामण्य-ऽष्टादशस्वदेश-चतुर्दशमित्रदेशाऽमारिप्रवर्तक- रुदतिवित्तनिवारक-परमार्हत-श्रीकुमारपालभूपप्रतिबोधयितारः कलिकालसर्वज्ञबिरुद-धारका अनेकानेकशास्त्र-ग्रन्थप्रणेतारः श्री हेमचन्द्रसूरयोऽभवन्।

तेषां जन्म धंधुकानगर्यां मोढज्ञातिक-चाचिंग - पाहिण्यो गृहे ''वैक्रमीय-कल्याणक-कथा- **कलमकाश्यपीतमे** (११४५) संवत्सरेऽजायत। ''चांगदेव'' इति नाम पितृभ्यां स्थापितम्। क्रमेण स पूर्वाराधितपुण्योदयेन प्रतिबोधितपितृभ्यां कृतमहोत्सवपूर्वकं त्रंबावत्यां (स्तंभपुरे-खंभातनगरे) **''वैक्रमीय-कथा-गति चन्द्र-जीवतमे''** (११५४) संवत्सरे नवमवर्षे गुरुश्रीदेवचन्द्रसूरिपार्श्वे 'मुनिसोमचन्द्रविजय'-इति नाम्ना संयमजीवनं जग्राह।

पर्युपासितगुरुचरणांभोजप्राप्तगुरुकृपामोदेन विद्यमान-सर्वागमशास्त्राणां सांगोपांगावगाहनं कृतत्वात् । तात्त्विकसर्वज्ञविरह-दूषित पञ्चमकाले कलिकालेऽपि 'सर्वज्ञ' इति-बिरुदं सकलसंघेन तेभ्यो दापितम्। स्वगुरुभिरेव ते वैक्रमिय **काय-कारक-तनु-दीपतमे** (११६६) संवत्सरैकविंशतितमवर्षे 'श्रीहेमचन्द्रसूरय' रिति नूतननाम्ना जिनशासनस्य तृतीयपदे प्रतिष्ठिताः।

एकदा ते भगवन्तो विशिष्टक्षयोपशमाधानार्थं परमात्मवाण्यधिष्ठात्रीं सरस्वतीदेवीमाऽऽराधयितुं काश्मीरं प्रति प्रतस्थे। अपि तु द्वितीये तृतीये वा प्रयाणे-

नैवाऽज्झारानामतीर्थभूमौ सा सरस्वती भगवती प्रत्यक्षीभूय वचनसिद्धिवरदानं ददे। तेन चाऽनेक- शास्त्रग्रंथरचनाशक्तिधर्तृभि स्तैः सार्धत्रिकोटिप्रमितश्लोकानि रचितानि।

तै रचितानां केषांचिद्ग्रंथानां नामानि तु यथा-

| | | |
|---|---|---|
| १. सिद्धहेमबृहद्वृत्तिः | २ लघुवृत्तिः | ३ प्रमाणमिमांसा |
| ४. लिंगानुशासनम् | ५ छंदोनुशासनम् | ६ काव्यानुशासनम् |
| ७. द्वाश्रयकाव्यम् | ८ काव्यकोषः | ९ निघंटुकोषः |
| १०. सिद्धहेमबृहदन्यासः | ११ अभिधानचिंतामणिकोषः | १२. धातुपारायणः |
| १३. वेदंकुशः | १४ त्रिषष्ठिशलाकापुरुषचरित्रम् | १५. योगशास्त्रम् |
| १६. परिशिष्ट पर्व | १७ वीतरागस्तोत्रम् | १८. अन्ययोगव्यवच्छेदः |
| १९. अयोगव्यवच्छेदः | २० महादेवस्तोत्रमित्यादयः | |

पूर्वं तेषां समये श्रीसिद्धराजजयसिंहभूपति - गुर्जरदेशे पट्टणनगरे राज्यं कुर्वन्नाऽऽसीत्। तस्य राज्येऽनेकदर्शनाभिमानिनो दिग्गज-पण्डिता वादिनोऽभवन्। राजसभायां तेषां परस्परं वाद-विवादमपि जायते। अपि तु जैनाचार्यश्रीहेमचन्द्रसूरीश्वरं नृपोऽतिशयेन बहुमन्यते । तेन कदाचिदीर्ष्ययाविष्टा, ब्राह्मणपण्डिता जैनाचार्यं हीलयितुं सिद्धराजं न्यवेदयन् 'जैनधर्मस्य शास्त्रेषु नैकमपि संस्कृतव्याकरणं विद्यमानमस्ति यस्य नियमेन संस्कृतगीः सौष्ठवं प्राप्नुयात्। जैनधर्माचार्यास्त्वस्मदगुरुभी रचित-व्याकरण-शास्त्राधारेणैव धर्मवादं कुर्वन्ति।

एषा वार्ता नृपेण कलिकालसर्वज्ञभगवद्भ्यो निवेदिता। लब्धगुरु-सरस्वतिप्रसाद-श्री हेमचन्द्र-सूरिभिरेकेनैव संवत्सरेण **वैक्रमीय - कुच-गुण-दण्ड-द्विज-तमे** (११९२) संवत्सरे द्वात्रिंशत्पाद-युक्ताऽष्टाध्ययनात्मकं, संस्कृतव्याकरणमरच्यत। सर्वैः साङ्ख्य बौद्ध-मिमांसक-वैदिक-ब्राह्मणपण्डितैः तद्व्याकरणं सुपरीक्षितम्। एकमपि दोषमुद्भावयितुमशक्नुवन्तस्ते राजानमेवमुचुः -

'राजन्! श्री हेमचन्द्रसूरिभि-र्व्याकरणरचना तु सुष्ठु कृता । तथापि तस्मिन् तव वंशस्य कीर्तिस्तवगुणांश्च यावत् तव नाममात्रस्याऽपि नोल्लेखोऽस्ति, तर्हि वयं कथंकारं तद्व्याकरणस्य प्रशंसनं कुर्महे?' श्री सिद्धराजनृदेवोऽपि तत्सत्यापनार्थं स्वयं च निरीक्षितुं तद्व्याकरणशास्त्रं द्वितीयदिवसे सभायामाऽऽनयनार्थमाऽऽदिदेश। केनाऽपि प्रकारेणैतत् व्यतिकरं कलिकालसर्वज्ञभगवद्भि - र्ज्ञातम्। रात्रौ च ते शासनहीलना- निवारणार्थं वागीश्वरीध्याने निश्चला बभवुः। साऽपि प्रत्यक्षीभूय सूरीश्वरं निश्चिंतमकरोत्।

द्वितीय दिवसे यदा तद्ग्रंथः सभायामुद्घाटितस्तदा प्रत्येकपादस्य प्रान्ते नृपनामयुक्तं तद्वंश-गुणस्य कीर्तनं कुर्वन्तं श्लोकं नृप-सभापण्डितै र्दृष्टम्। सिद्धराजभूपालस्तेन साश्चर्योऽतीव तुष्टाव । तत्पश्चात् तद् व्याकरणग्रंन्थरत्नं 'श्री सिद्धहेमशब्दानुशासन' मिति जगति प्रसिद्धिं प्राप्तम् ।

तत्कालीनविद्यमानानि पाणिनि-चान्द्र-शाकटायन-भोजादि-व्याकरणा-न्यतिविस्तृत्वात् क्लिष्टान्यभवन्। तानि च व्याकरणानि विप्रकीर्णसूत्रमयत्वात् गौरवतादिदोषवन्त्याऽऽसन्। तदन्यकातन्त्रादि - व्याकरणान्यपि समासेनैव गुम्फितत्वान्न सम्पूर्णसंस्कृतगिरमाऽऽवृणन्ति स्म। श्री सिद्धहेमव्याकरणे तु कलिकालसर्वज्ञभगवद्भिः पूर्वव्याकरणसूत्रापेक्षया स्वरचितसूत्रेषु संज्ञा-मात्रा-प्रक्रियादिविषयकलघुता-सुकरबोधकतादि-वैशिष्ट्यं कृतमाऽऽसीत्। अत एव तदतिविस्तारादिदोषरहितं संपूर्ण - संस्कृतनियमालङ्कृतमद्वितीयं पंचांगिपूर्णव्याकरणमिति श्रेष्ठतामप्राप्नोत्।

''**सिद्धहेमचन्द्रशब्दानुशासन**'' मिति संज्ञायां यदनुशासनं पदं तेन कलिकालसर्वज्ञभगवद्भिः पाणिनीत्यादिपूर्वाचार्यरचितव्याकरणस्य पश्चादियं कृतिः कृताऽतः पूर्वाचार्याणामनुकरणं मया (हेमचन्द्रसूरिणा) कृतमेवं द्योतितं भवति। एतद् व्याकरणं संक्षिप्तत्वात् सरलत्वाच्च व्याकरणशेखरता-माबिभ्रति तेन ''सर्वे वैयाकरणीया अनुहेमचन्द्रसूरय'' इति लोकोक्ति र्जाता ।

कर्हिचित् तत्काले विहरन्तः श्री देवेन्द्रसूरयः, श्रीमलयगिरिसूरयः, श्री हेमचन्द्रसूरयश्च त्रयोऽपि सूरिवरा एकत्रीभूय मन्त्रसिद्धयै श्री गिरनारमहातीर्थं प्रति निरगच्छन्। तत्साधनायां पुष्पगंधीपद्मिनीस्त्रिय उपलब्धि-रावश्यकी बभूव। तस्या गवेषणायां ते क्रमेण कुमारग्रामं प्राप्तवन्तः । तत्र च रजकपार्श्वात् धौतपद्मिनी-स्त्रीवस्त्रासक्तभ्रमरगुञ्जारवेण ज्ञातं यद् ग्रामाधिपत्युः स्त्री पद्मिनी वर्तते ततस्ते ग्रामनायकस्य वसतौ चातुर्मासमुषित्वा विहारवेलायां राज्ञा किमपि प्रतिलाभयितुं विज्ञप्तिः कृता। सूरिश्रेष्ठा अप्यवसरं प्राप्य प्रोचुः-

'यदि तव रोचते, तर्हि त्वद्भार्याया अस्माकं कार्यमस्ति।' राज्ञा पृष्टम्, तस्याः किं प्रयोजनम्? ते उचुः गिरनारगुहायां मंत्रसिद्ध्यर्थं वयं प्रस्थितवन्तः सन्ति। तत्र निर्वस्त्रपद्मिनीस्त्रीसमक्षं मंत्रसाधनानुष्ठियते । तदा तु त्वयाऽस्माकं पार्श्वेऽसिपाणिना स्थातव्यम्। अस्मदन्यतमस्य मुखे यदि कामदेवः प्राभविष्येत् तर्हि त्वयासिना तस्य निर्विकल्पं शिरच्छेदः कर्तव्यः। एवं च कुर्वता यदि मंत्रसाधना निर्विघ्नं पूर्णीभविष्यति तर्हि महत्सिद्धिं वयमङ्गीकरिष्यावः ।

गुरुभगवत्सत्त्वगुणरञ्जितग्रामण्यानुज्ञाते सति त्रयोऽपि सूरयो गिरनारशिखरे मंत्रसाधनायां निश्चला बभुः । क्रमेण च निर्विघ्नं समाप्तिं प्राप्ताः । मंत्रराजाधिष्ठायकदेवः प्रकटीभूय वरदानं याचितुमकथयत् । तदा श्रीदेवेन्द्रसरिणा काञ्चीपुरस्थितजिनबिम्बयुक्तजिनालयं शेरिसातीर्थे आनयितुं ययाचे। श्रीमलयगिरिसूरिणा विशिष्टटीका-रचनाशक्ति-र्ययाचे। श्री हेमचन्द्रसूरिभिस्तु राजप्रतिबोधो याचितः । यतो, राज्ञि प्रतिबोधिते सति समग्रप्रजा अपि धर्मं भोत्स्यन्ते। तेन च जैनधर्मस्य सर्वत्रैकछत्रीसाम्राज्यं वर्तिष्यते। तुष्टदेवेन त्रयाणामपि सूरिपुङ्गवानां मनोवाञ्छितं प्रपूरितम् । तत्प्रभावेणैव श्री हेमचन्द्रसूरयो भिन्न-धर्मानुयायिकुमारपालभूपालं प्रतिबोधयितुमशक्नुवन्।

कोऽयं कुमारपालः ?

श्री सिद्धराज-जयसिंहगोपालस्य राजपट्टे तस्यैव भ्रातृव्यः कुमारपालो वैक्रमीय - **ग्रह-तत्व-धरा-राजतमे** (११९९) संवत्सरे महाकष्टपूर्वकं चतुःपञ्चाशत्वर्षेऽभ्यषिक्तः । श्री हेमचन्द्रसूरिसदुपदेशेन स शुद्धदेवगुरुधर्मतत्वबोधं प्राप्तवान्। वैक्रमीय - ''**कन्यामुखचरणमेरुतमे**'' (१२१६) संवत्सरे सप्ततिवर्षे तेन सम्यक्त्वयुक्तद्वादशव्रतानि जगृहे । तस्य राज्यकाले कोऽपि 'मारि' एवं प्रकारं हिंसकशब्दप्रयोगमपि कर्तुं नाऽशक्नोत्। तेन द्वात्रिंशद्देशेष्वमारिप्रवर्तनं कृतम्।

श्री कुमारपालभूपालेन जिनबिंब-जिनभवननिर्माण-जीर्णोद्धार-परमात्मभक्ति तीर्थयात्रा-श्रुतलेखनरक्षा-गुरुभक्ति-साधर्मिकवात्सल्य-न्यायनिष्ठता-प्रजावत्सलता-जीवदयाऽनुकंपादान-ब्रह्मचर्य-सामायिक-पौषध-चातुर्मासनियमादि-महाश्रावको-चितौचित्यपूर्णकर्तव्यपालनेन जैनशासनस्य प्रकृष्टोन्नतिराऽऽनीताः । श्री हेमचन्द्र-सूरिभगवत्कुमारपालभूपयोः सुधीर्वक्तृश्राद्धश्रोत्रो- र्योगेन तदा तु जैनशासनस्य स्वर्णयुगोऽभवत् ।

श्री कुमारपालनृपेण गुरुभगवन्त एवं विज्ञप्ताः यथा भगवन्! युष्मद्दर्शितकार्यं यद्यऽहं न संपादयामि तर्हि तस्मिन् मया प्रायश्चित्तं ग्राह्यम्। यदि च मम निवेदने भवता स्खलना भवेत् तर्हि कार्यसीदने नाऽहमुपालभ्यः। ते च कलिकाल सर्वज्ञभगवन्तः यद्यदाऽऽदिशति तत्तत् सर्वं श्रीकुमारपालनृपति-र्गुरुकृपा-देवभक्ति-धर्मश्रद्धाबलेन संपादयति। तस्य जीवने परदारसहोदरता-सात्त्विकतागुणद्वययोगात् अन्ये सामान्यदोषाअपि गुणदायका अभवन् ।

एकदा श्रीकुमारपालराज्ञा श्रीहेमचन्द्रसूरयोऽभ्यर्थिताः, ''स्वामिन्!

अनाप्तधर्मतत्त्वेन मयाऽज्ञानवशात् रसलोलुपतया च मांसभक्षणं कृतमाऽऽसीत्। तद्दोषेण मद्द्वात्रिंशद्दंता: मालिन्यं प्राप्ता:। तत्संशोधनार्थं किमपि शास्त्रग्रंथं रचयत यस्य स्वाध्यायेन मम दन्तशुद्धिः सुकरा भवेत्।

तस्याभ्यर्थनां मनसिकृत्य क्षणैकवेलायां सप्तश्लोकरचयितृभि: श्रीहेमचन्द्रसूरिभि-विंशतिप्रकाशात्मकश्रीवीतरागस्तव-द्वादशप्रकाशात्मक-श्रीयोगशास्त्रे द्वे ग्रन्थरत्ने श्रीकुमारपालभूपालोपकाराय संदृब्धे। एतद्द्वयो-र्ग्रंथरत्नयो: द्वात्रिंशदध्ययनस्वाध्यायेन श्रीकुमारपालेलापतिर्नित्यं स्वदन्तशुद्धिं समाचरत। तं विना न कदापि प्रात-र्मुखे जलमपि क्षिप्तवान्।

एतस्मिन् श्रीयोगशास्त्रमहाग्रन्थे श्री हेमचन्द्रसूरिभि: आदिधार्मिकजीवस्य लक्षणमादौ दर्शयित्वा तत्पश्चात् येन क्रमेण भव्यजीव: सम्यक्त्वं, देशविरतिं, सर्वविरतिं, धर्म-शुक्लध्याने योगनिरोधं च प्राप्य सिद्धस्वरुपीभवति तद् द्वादशाधिकैकसहस्रमूलश्लोकैः स्वोपज्ञटीकाविवरणे च सप्तत्यऽधिक-पञ्चशतद्वादशसहस्रश्लोकै: प्रदर्शितम्।

एतद् ग्रन्थविषयस्य संक्षेपेण परिचयस्त्वेवम्:-

* प्रथमप्रकाशे : योगमाहात्म्यम्, पञ्चमहाव्रतस्वरुपम्, पञ्चविंशतिभावना:, पञ्चसमिति-त्रिगुप्तय:, मार्गानुसारिपञ्चत्रिंशत्गुणवर्णनं च।
* द्वितीयप्रकाशे : सम्यक्त्वस्वरुपम्, पञ्चप्रकारमिथ्यात्त्वम्, सुदेव-सुगुरु-सुधर्मतत्त्वस्योपादेयता, कुदेव-कुगुरु-कुधर्मतत्त्वस्य हेयता, पञ्चाणुव्रतस्वरुपप्ररुपणं च।
* तृतीयप्रकाशे : त्रीणि गुणव्रतानि, चत्त्वारो महाविकृतय:, रात्रिभोजन-स्यानिष्टत्त्वम्, चतु:शिक्षाव्रतानि, सुपात्रदानमहिमा, द्वादशव्रतातिचारा:, सप्तक्षेत्रवर्णनम्, श्रावकस्याहोरात्रि-कीचर्या, सुश्राद्धस्यैकादशप्रमिता: प्रतिमा:, द्वाविंशति-परिषहा:, देशविरतस्यांऽतिमाराधनास्वरुपकथनंच।
* चतुर्थप्रकाशे : आत्मस्वरुपदर्शनम्, कषायभेदा:, इन्द्रियविजयोपदेश:, मनोनिग्रहस्योपाया:, द्वादशभावना:, ध्यानाऽऽसनप्रकाराश्च प्रज्ञप्ता:।
* पञ्चमप्रकाशे : द्रव्यप्राणायमाऽपेक्षया भावप्राणायमस्योत्तमत्त्वम् प्रोक्तम्।

* षष्ठप्रकाशे : धारणाध्यानस्वरुपम् सन्दर्शितम्।
* सप्तमप्रकाशे : ध्यातृ-ध्यान-ध्येयस्वरुपमुक्तम्।
* अष्टमप्रकाशे : पदस्थध्यानविधिः, पञ्चपरमेष्ठिमंत्रबीज-मायाबीजयोश्च स्वरुपं प्ररुपितम्।
* नवमप्रकाशे : रुपस्थध्यानस्वरुपप्रज्ञापनं।
* दशमप्रकाशे : रुपातीतध्यानस्वरुपम्, धर्मध्यानस्य चत्वारः प्रकाराः, तेषां च फलानि वर्णितानि।
* एकादशमप्रकाशे : शुक्लध्यानस्य चतुष्प्रकाराः, तीर्थंकरत्त्वस्य फलानि, केवलीसमुद्घातप्रक्रिया, योगनिरोधेन मोक्षप्राप्तिः, सिद्धजीवानां च स्वरुपमुक्तम्।
* द्वादशप्रकाशे : चित्तस्य चतुष्प्रकाराः, बाह्यात्माऽन्तरात्मा-परमात्म-स्वरुपमुन्मनीभावस्य च प्राप्तिराख्याता।

एवं मोक्षप्रासादारोहणनिःसरणीरुप-योगशास्त्रग्रन्थरत्नस्य सम्यक्परिशीलनेन भव्यजन्तवो रोगभूतं निजभोगजीवनं परित्यज्य भावारोग्यभूतयोगजीवनं च स्वीकृत्य **निःश्रेयसपदं** प्राप्नुयुरेषैव भावनाऽस्मद्ग्रन्थपरिचयप्रयत्नस्य।



# ।। क्रोधो वैश्वानरोपमः ।।

-साध्वर्याश्री नम्रगिराश्री

अस्मिन् जगति जीवाः क्रोधस्य पापरुपत्वं निकृष्टत्वं च अङ्गीकुर्वन्ति, परं न स्वीयक्रोधस्य, अपि तु परकीयक्रोधस्य।

एतस्मादेव कारणादनादिकालदारभ्य जीवानां हानिः सञ्जाता। यस्मिन् दिने परकृतक्रोधेन अस्माकं चित्तं दुर्भावकलुषितं न स्यात्, यस्मिन् दिने अस्मत्क्रोधः अस्मद्धानिकरः प्रतीयेत, तस्माद् दिनादात्मनः विकासः आरभ्येत। क्रमशश्च संपूर्ण उपशमभावो जायेत। विश्वेऽस्मिन् उच्चतमं सुखम् उपशमभावे संस्थितम्।

को नाम क्रोधः?

कस्मिन्नपि विषये दृढाग्रहस्य जनस्य तद्विषयिणी आसक्तिः, प्रीतिश्च जायते ततश्च इच्छातृष्णापेक्षाणाम् उद्भवो ध्रुवम्। यदि वा कारणविशेषात् स्वविचारानुकूलं कार्यं न घटते, इच्छापूर्ति वा न जायते तदा मनः सम्भ्रमव्याकुलं भवति। ततो यो भावो जायते ये च शब्दाः निरगच्छन्ति या च शरीरक्रियाविकृतिराविर्भवति, तत् सर्वं क्रोधसंज्ञकम्। ततो लुप्यति कर्तव्याकर्तव्यविषयकः विवेकः। ततो भवति संस्कारच्युतिः। आप्तोपदेश-श्रवणपठनेऽपि स संस्कार उपस्थितो न भवति। स्मृतिभ्रंशात् अन्तःकरणस्य कार्याकार्य-विवेचनसामर्थ्यरुपविवेकस्याभावः प्रभवति। ततश्च सम्भवति सर्वविधोऽप्यनर्थः। अमुनाप्रकारेण क्रोधाद्विनाशः प्रजायते।

कारणमन्तरेण स्वल्पकारणेन वा कोपमुपगच्छन् जनाः स्वजीवने स्वकीयपरकीयाणां प्रीतिं विनाशयति। अल्पस्यापि तस्य कोपस्य परिणामस्तु महान्। मनःशान्तिनाशः, स्वास्थ्यघातः, सम्बन्धविघटनम्, उत्साहभङ्गः, कार्यघर्षणम् इतीमानि क्रोधफलानि। एकस्य क्रोधः बहूनां क्लेशकरः सम्पद्यते। उक्तं च-

**''क्रोधो मूलमनर्थानां, क्रोधः संसारवर्धकः।**

**धर्मक्षयकरः क्रोधस्तस्मात्क्रोधं विवर्जयेत्।।**

श्री सिद्धर्षिगणिकृतउपमितिभवप्रपञ्चाकथायां क्रोधः वैश्वानरेण उपमितः।

**क्रोधो वैश्वानरोपमः-**

यस्मिन् गृहे अग्निर्जायते तदेव गृहं स प्रथमं दहति। एवमेव यस्य क्रोधः आविर्भवति तस्यैव जनस्य सः प्रथमं हानिं करोति। तस्मिन् क्षणे पुरःस्थितो जनो क्षमावृत्तिं नावलम्बते चेत् तस्यापि हानिर्भवति क्षमां भजते तदा न भवति। एवं क्रुद्धस्य हानिः ध्रुवा, पुरःस्थितस्य हानिः वैकल्पिकी।

क्रोधवशः कमठः सर्वैरुपायैः परमतारकं भगवन्तं पीडयामास। तेन तस्य हानिः सञ्जाताः। परं परमात्मा क्षमावृत्तिम् आधाय केवलज्ञानम् अवाप।

क्रोधस्य कुटुम्बम्-

क्रोधस्य स्वकीयं कुटुम्बं विद्यते। तस्य प्रिया भगिनी अनुक्तग्राहिता एषा सर्वदा सह भवति, क्रोधस्य पत्नी हिंसा, एषा अपि तस्य पृष्ठतः भूत्वा प्रेरयति कुकृत्ये, एतस्य भ्राता भवति अहङ्कारः, क्रोधस्य पिता भयः, तस्य अपत्यं नाम पिशुनता, निन्दनं च। पिशुनता भवति कर्णयोः निकटे, निन्दनं भवति मुखसमीपे। पुत्रोऽस्ति वैरः, तस्य स्नूषा असूया, क्रोधस्य पौत्री तिरस्कारशीलता, एषा सदा नासिकाग्रे तिष्ठन्ति तदा तदा स्वस्य प्रवृत्तिं दर्शयति, एतस्य जननी तु नासिका।

क्रोधफलं तिक्तं-

आमूलं यः तिक्तः सर्वेषाम् अप्रियश्च। तादृशस्य क्रोधवृक्षस्य फलं तिक्तमेव भविता। किमत्र आश्चर्यम्।

क्रुद्धमनाः जनः परनिपीडने,परत्रासने कटुतानिर्माणे परमयत्नशीलो जायते। परं निम्बभक्षक इव क्रुद्धो जनः तिक्तरुपं परिणामम् स्वयमेवानुभवति।

परमात्मा महावीरः त्रिपृष्ठवासुदेवस्य जन्मनि क्रोधाधीनः सन् शय्यापालकस्य कर्णयोः तप्तं सीसरसं पूरितवान्। स एव शय्यापालको गोपालो भूत्वा परमात्मनः कर्णयोः कीलौ विनिवेशितवान्।

एवं पूर्वतनस्य कोटिवर्षस्य संयमः क्रोधेन नश्यति।। कोटिवर्षात्मकस्य संयमस्य फलं सकृत्कृतेन क्रोधेन विनश्यति। एवं सति अस्मादृशानां जानानां का वार्ता, यैः संयमव्रतं

नैवाङ्गीकृतम् अथवा अङ्गीकृतमपि न पारितम्।

साधुजीवनं जीवन् तपोधनोऽपि शिष्यक्रोधनिमित्तेन 'चंडकौशिकः'-सर्परुपः जातः। अतः लब्धा धर्मसामग्री निष्फला न कार्या। भाग्येन अस्माभिः भगवान् प्राप्तः पुनः प्राप्नुयान्नवा इति न निश्चितम्।

विश्वे जनसम्बन्धकारिणी जिह्वैव सम्बन्धनाशिनी भवति चेत् तत सम्बन्धयोजकः स्यात् कः?

तथा कषायनाशकमेव तपः कषायकलुषितं भवति चेत् तत् कथमिव उपकुर्यात्? कषायनाशकश्च कः स्यात्?

अग्निशर्मा मासक्षपणस्य पारणं मासक्षपणेन करोति स्म। एतादृशं तपः कृत्वापि स यदा क्रुद्धो जातः तदा भवदुर्गतिं प्राप्तः। तस्य भवसङ्ख्यानां गणना कठिना।

यदि भवता प्राप्तव्यं सुखं....

लब्धव्य आनंदः....

हातव्यः क्रोधः....

तर्हि अग्रे पठनीयम्...

अद्यारभ्य एकं परीक्षणं कुर्मः (प्रथमस्तरः)

मम क्रोधः कदा भवति?

अहं कासु स्थितिषु क्रुध्यामि?

अहं कथं क्रुद्ध्यामि?

चिन्तयन्तु (द्वितीयस्तरः)

मम विचारा कीदृशा भवन्ति?

मम भावाः कीदृक्षाः सन्ति?

मम स्नेहः कुत्र भवति?

चिन्तयन्तु (तृतीयस्तरः)

एतासु कासु स्थितिषु अहं शान्तो भवामि?

किमहं क्रोधनियन्त्रणं कर्तुं शक्नोमि?

अहं कुत्र प्रयत्नं कर्तुं शक्नोमि?

क्रोधः महतीं हानिं करोति।



इदानीम् पश्याम: यत: क्रोधेन अस्माकं का हानि: इति।

अस्माभि: बुद्धौ नियंत्रणं न प्राप्यते।

क्रोधकारणात् रक्तभारो वर्धते।

अस्मदात्मा अशुद्धो भवति।

अस्माकं प्रगतिरवरुद्धयते।

क्रोधस्वभावात् मित्राणि, सम्बन्धिनश्च दूरं गच्छन्ति।

भवद्भ्यो हानि: रोचते वा? नैव....

अत इत: परं किं करणीयम्? क्रोधो न कर्तव्य:। क्रोधनियंत्रणं करणीयम्। सावधानेन भवितव्यं।

पश्याम:, क्रोध-निराकरणार्थम् कतिपया उपाया:।

१. तूष्णीं स्थातव्यम् : सर्वथा मौनमाचरणीयम्। वाक्-शौचं पालनीयम्। तेन अभद्रा: शब्दा: मुखान्न निर्गमिष्यन्ति। मनश्चशाम्यति।

२. श्वसने नियन्त्रणम् : दीर्धश्वसनेन प्राणे नियंत्रणं भवति। मन: प्रशाम्यति। दौर्बल्यं च नानुभूयते।

३. भगवत् स्मरणम् : इष्टदेवता स्मरणीया। श्रद्धया तन्नाम जपनीयम्। येन मन: पवित्रं, निर्मलं च भवति।



४. कार्य परिवर्तनम् : यत्र वयम् स्म: यत् कार्यं प्रचलति तत् त्यक्त्वा
स्थानपरिवर्तनम् : स्थानान्तरं करणीयम्। अन्यं कार्य करणीयम्। तेन विषयपरिवर्तनं भविष्यति। क्रोध उपशाम्यति।

५. आत्मबोध: : स्वयं मनसि नियन्त्रणं भवतु एतादृशं चिन्तनीयम्। मनसि सांत्वनपूर्णानि वचनानि वक्तव्यानि। यद्वा मनसे 'तूष्णीं भव' इति उपदेष्टव्यम्। पश्चात् क्रोधस्य कारणम् अन्वेष्टव्यं।

६. ताटस्थ्यभाव: : कस्मिन्नपि विषये सुखदु:खभावो न करणीय:। ममत्वं मास्तु। ताटस्थ्यवृत्ति र्भवतु। तेनोद्वेगो न्यूनो भविष्यति, अत: क्रोधोऽपि।

७. ध्येये लक्ष्यम् : कोपो मार्गोपरोधकः सञ्जायते वा इति चिन्तनीयम्। ध्येयबाधकः भवति वा इति विचार्यम्। तथास्ति चेत् लक्ष्यसाधने दक्षता भवतु। क्रोधं मार्गकण्टकं मत्वा तस्य उत्पाटने यत्नः कार्यः। तत उचितेन मार्गेण गन्त-व्यम्। ध्येयपथे लक्ष्यं साधनीयम्।

८. स्वमहत्त्वस्य चिन्तनम् : स्वविषये चिन्तनीयम्। समाजे मम प्रतिष्ठा का? कोपकारणात् सा विकृता भविष्यति वा? आत्मा स्मारणीयः। मम कार्यसिद्धिः का? जीवनस्य दूरगामी लक्ष्यं किम्? समुत्पन्नोद्वेगकारणतः कोपप्रसंगः क्षुद्र-विषयो, अहं ततः दूरं गच्छेयम् न वा? ततोऽपि महत्त्वपूर्णाः विषयाः मम जीवने सन्ति तेषां चिन्तनं अग्रक्रमेण करणीयम्।

९. परिणामचिन्तनम् : मयि अपरेषु च क्रोधनिमित्तानां कुपरिणामानां चिन्त-नम्। तेन स्वयं नियत्रणं सिद्ध्यति।

१०. सतर्कता: : शीघ्रकोपोऽहं, सम्मोहनशीलोऽहं इति विचिन्त्य सावधानतया वर्तितव्यम्। कोपेन मम व्यवहारो लज्जास्पदं भवति, इति अवधार्य मया सतर्केण भवितव्यम्। तदानीमेव आत्मानं रक्षितुं शक्नुयाम्।

**।। क्रोधकारणान्वेषणम् ।।**

विषयोयं विचिन्त्यताम्। निराकरणार्थं प्रयत्यताम्। यतो हि क्रोधो दोष एव। अस्माभिर्दृष्टम् हि क्रोधतः हानिरेव। क्रोधेन त्रुटिताः सम्बन्धाः पुन र्न संयुज्यन्ते। त्रुटितसम्बन्धैः जनैः सह पुनः व्यवहारो न भवति। अतः क्रोधः किमर्थम्? वयं भगवन्तः भवितुं योग्याः। भगवता सदृशः सत्तया स्मः । चिन्तयन्तु, भगवान् क्रुध्यति वा? भगवतो न कोऽपि प्रमादः तथापि गोपालकेन कर्णयोः किलः स्थापितः। तथापि भगवान् क्रुद्धो न वा? भगवान् तस्य अपेक्षया अनंतगुणः शक्तिमान् आसीत् तथापि स शान्तः स्थितः। कर्मोदयं मत्वा समभावेन सोढवान्। अतः सः भगवान् जातः ननु। भवन्तः कदापि भगवतः क्रुद्धां मूर्तिं दृष्टवन्तः किं। न दृष्टवन्तः खलु? तर्हि क्रोधः करणीयो न वा?

न...न...नैव...नैव...नै...व.

# ।। अहं आत्मा एकस्वरूप: स्थिर: ।।

-अमृत पटेल:

अहं आत्मा एकस्वरुप: स्थिर:

अहं आत्मा चेतन: चैतन्यवद् द्रव्यम् पदार्था: जडा पुद्गला: अचेतना संसारो द्वयोर्मिश्रभाव: आत्मा, तान् तान् पर्यायान् अवस्थाभेदान् अतति जीव: जीवति प्राणान् धारयति।

अत: 'अहं' आत्मा इत्युच्यते जीव इत्यपि यथा बाल-युवा-वृद्धादि भिन्नभिन्नावस्थासु यो वर्तते-वर्तमान: स तु एक एव मानव: मानव एव, नान्यो परावर्त्तित:,-नान्यथा परावर्तित: तथैव मानव-दानव-देव-पशु-पक्षि-नारकाद्यवस्थासु भिन्नासु आत्मा तु अभिन्न एव यो यस्मिन् देहे आसीत्। पदस्मिन् देहेऽपि स एव नाम्न: अर्थात् विविधावस्था: आत्मद्रव्यस्य पर्याय:।

यो जीवति स जीव:, अहं भिन्नास्ववस्थासु अजीवम्-जीवामि-जीविस्यामि इति काले त्रयेपि जीव इत्यभिधां लभे। जीवस्तु जीव एव नाऽजीव:।

अहं अभूवम्, भवामि, भविष्यामि। न मे नाशो विद्यते द्रव्यतया स्थिरोऽस्मि। प्राक्तनीं मानवाद्यवस्थां यदा त्यजामि तदा 'मृत' इति शब्दवार्त्तां प्राप्नोमि नवीनां चावस्थां यदा लेभे तदा 'जात' इति-किन्तु अवस्थाभेदं प्राप्नुवान्नहं मूलतोऽनश्वर: एक एवास्मि। एक एवास्म्यहमात्मा।



# ।। देव-गुरु वन्दनम् ।।

-विद्वद्वर्य-मुनिश्री धुरंधरविजया:

### ।। श्री वीतराग वंदना ।।

हे वीतराग! तव चरणवन्दनम् ।
विरतिरमणीरासखेलन-
सरस-सुरतरुनन्दनम् ।
भवदवानल दाहदाहन-
मलयगिरिजं चन्दनम् ।
कोटिकोटिभवालिसञ्चित-
पापवृन्दनिकन्दनम् ।
अमरनरवरकिन्नरौघै:
सततसेव्यमनिन्दनम् ।
मुक्तिरमणीरमणयोगै,
भव्यचित्तानंदनम् ।

### ।। श्री विमलाचल स्तुति ।।

श्री विमलाचल विमलनाम
भरतेश्वरनृप-विहित धाम
श्री ऋषभेश्वरपदपवित्र
कलिकल्मश-कुलवन-लवित्र !
जलदविराजित! गगनतुङ्ग !
धवल-देव-कुल-कलित-शृङ्ग!
साधकजनकृतशुद्धरुप
जय शत्रुञ्जय! तीर्थभूप !
इति विमलगिरीन्दं विनतसुरेन्द्रं,
वन्दे सीमंधरनूतं,
नेमिजिनेश्वर-रहित-जिनेश्वर-
समनिखिलेश्वर-पदपूतं ।।

### ।। श्री गुरु वंदना ।।

**(हार चित्र काव्य)**

संसार वासविरतं सुगतान्तरङ्गम्,
भदं भवोद्भव भयप्रशमं यमीशम्,
चन्द्राभवाचमभयं शुभकाय शोभम्,
वन्दे गुरुं वरगुणं सुनरेण लीनम्,




### ।। श्री प्रेमसूरीश्वर वंदना ।।

श्री प्रेमसूरिवर परमनाम ।
प्राणप्रियगुरुवरविहतकाम ।
शरणागतपालकदिव्यधाम ।
जडतासंहारकपदप्रणाम ।
जय रामचन्द्रसूरीशसेव्य!।
सेवंते यं शुभदेवदेव्य: ।
सुविशालगच्छनिर्माणदक्ष ।
भवभीमपयोधौ रक्ष रक्ष।

इति प्रेमसूरीन्द्रं नतनाकीन्द्रं,
संयमरमणीरम्यवरं।
स्वर्णोज्वलदेहं गुणगणगेहं,
वन्दे वरदायिप्रवरं ।।

# ।। श्री चैत्यवन्दन-स्तवनानुवादः ।।

-अनुवादकः विद्वद्वर्य मुनिश्री धुरंधरविजयाः

### ।। तुज मूर्तिने नीरखवा...चैत्यवंदनस्यानुवादः ।।

जिन! तव मूर्तिं वीक्षितुं, चक्षुर्मम झषते;
गातुं तव गुणगौरवं, रसना उल्लसते. ।।१।।

काया मम रोमाञ्चिता, तव चरणे स्पृशतः;
कथय किं नु सरतेऽथ, ते मां न हि तारयतः. ।।२।।

ज्ञात्वेदं करुणादृशा, दृष्टोऽहं नुवने;
**ज्ञानविमल**दृष्ट्या प्रभोः, किं न भवेद् भुवने! ।।३।।

### ।। श्री अजितनाथ प्रभो स्स्तवनस्यानुवादः ।।

शुभवेलायामवसरे रे, लग्ना प्रभुणा प्रीतिः,
प्रतिदिनमधिको वल्लभो रे, मम हृदये भवसीति; अजितजिन! अवधारय विनतिं,
तव चरणे मम मानसं रे, वहते परमरतिं...अजितजिन... ।।१।।

हृदयं मम हृदयालुकं रे, उच्छलतं सोल्लासं;
प्रतिघटिकायां वाञ्छते रे, तव दर्शनसंवासं...अजितजिन... ।।२।।

लगते मिष्टोऽमृतसमो रे, स्वामिंस्तव शुभसङ्गः;
तव मम नयनैर्मिलितै रे, भवते शीतलमङ्गम्...अजितजिन... ।।३।।

अवशत्वाद् घटिकैका रे, या तव विरहे याति;
वर्षशतीमिव मानसे रे, सा मम जिनवर भाति...अजितजिन... ।।४।।

भगवन्! भवतो यन्मयि रे, स्नेहरतिर्नहि कापि;
मम चित्तं त्वयि लम्पटं रे, विरमति नैव तथापि...अजितजिन... ।।५।।

स्नेहाधीनं सेवकं रे, नैजं जिन विज्ञाय;
देहि दर्शनमहोनिशं रे, **हंसरत्न** कुशलाय...अजितजिन... ।।६।।

**।। पार्श्वप्रभोः स्तवनस्यानुवादः ।।**

त्वं भगवन् मम तेऽहं निर्मम!,
क्षणमपि विस्मर नहि मां परम !;
मम विज्ञप्तिं स्वीकुरु कृपालय,
मां सेवकरुपेण निभालय...त्वं... ।।१।।

भ्रान्त्वा योनिं चतुरष्टलक्षं,
मां तव शरणागतमिह रक्ष;
कुगतिं कर्तय शिवसुखमर्पय,
भक्तं भृत्यं स्वपदे स्थापय...त्वं... ।।२।।

अक्षयनिधिस्तव पार्श्वे पूर्णः,
भर मम हस्तं कृपया तूर्णम्;
वामानन्दन विश्ववन्दनीय !,
देवेष्वनन्यस्त्वं प्रीणनीयः.त्वं... ।।३।।

पार्श्वं शंखेश्वर! तव संस्मरणं,
प्रतिपलमीहे तारणतरणं;

प्राणेभ्योऽप्यधिकप्रिय! कृपया,
स्नेहदृशा मां पश्याऽसमया...त्वं... ॥४॥

भक्तवत्सल इति त्वं विज्ञातः,
तव पृष्टिं नहि मुञ्चे मातः!;
तव पदसेवामीहे सततं,
चेतसि तस्मिन् भावे निरतः...त्वं... ॥५॥

**ज्ञानविमल**! तव भक्तिप्रभावः,
भव भव तापप्रशमस्वभावः;
अमृतमयी तव मूर्तिर्दृष्टा,
आंतरपापाः सर्वे मृष्टाः...त्वं... ॥६॥



# ।। श्रीरामचन्द्रीयमहाकाव्यम् ।।

**-मुनिश्री मोक्षरतिविजयाः**

**-: प्रथमसर्ग :-**

ऐन्द्रावलीमौलिमणीमरीचय,-श्चयश्च यस्या मिलिता मिथः श्रियम्[1]।
ददुस्त्रिलोकीजनतादृशेऽस्तु सा, श्रीपार्श्वदेवाङ्घ्रिनखद्युतिः श्रिये ।।१।।
।।उपजातिः।।

कुवासनावासितमन्मनोगृहं, केनाप्यचिन्त्यातिशयेन येन तत्।
सुवासनासौरभसम्भृतं कृतं, दृश्याद् गुरुर्मां स कृपास्पृशा दृशा ।।२।।

प्रक्षालयेत् पापमथो नवा मरुत्-सरस्वती[2] मज्जनगोचरीकृता ।
या ध्यातमात्राऽपि करोति पातक,-क्षयं मरुत् सा जयतात् सरस्वती ।।३।।

काव्यं कवेः काञ्चनतां मलाविलां, बिभ्रद् व्रजेल्लोकविलोक्यतां कथम्।
तत् तापयेयुर्यदि सज्जना नहि, स्वीयाशयैः पावकपावकोपमैः[3] ।।४।।

निपीय पीयूषमिदं[4] कथां नराः, परां श्रयन्तेऽमरतामितीव यम्।
श्रोतुं समुत्का अमृताशना अपि, स्तोतुं समर्थातनयं तमुत्सहे ।।५।।

अब्धौ बहिर्मात्रसरद्धिमोच्चय,-[5]प्रभं प्रभुः[6] श्रीप्रभुवृत्तमीक्षितुम् ।

---

1. शोभाम् 2. गङ्गानदी 3. पवित्रवह्निसमैः।। 4. अस्य कथारुपं पीयूषं निपीयेति सन्दर्भः ।।
5. समानम्।। 6. समर्थः।।



कथं नु वक्ष्ये निखिलं महत्तमं, स्थितं तदन्तर्दृगगोचरं यत: ॥६॥

[7]गणामृतांशोरथवाऽनुभावत:, समर्थयिष्ये तदपि प्रभाषितुम् ।
तमस्विनीवल्लभभा:प्रभावत:, किं चन्द्रकान्त: स्रवते जडोऽपि[8]न? ॥७॥

निधिर्निधीनामपि सोऽस्ति निश्चितं, जम्बूरिति द्वीपवरो यतोऽब्धिभि: ।
द्वीपैरसंख्यैश्च भटैरिवानिशं, मध्येजगद् दीव्यति वेष्टिताङ्गक: ॥८॥

मेरु: स मध्ये गिरिरत्र राजते, यं यान्ति चन्द्रार्कगणा: प्रदक्षिणम् ।
जिनेश्वरस्नात्रपय:क्षरद्रजा:, पूज्यत्वमाप्तोऽयमितीव भावत: ॥९॥

स भाति वर्षो भरतोऽत्र यं स्वयं, वीतापमृत्युं कुरुते स्म धर्मराट्[9]।
दिशं मदीयां यदयं समाश्रित,-स्तत: कृपायोग्य इतीव तर्कयन् ॥१०॥

स शोभते गुर्जरनीवृदत्र यं, [10]गौरीप्रियश्रीपरमेष्ठिन: खलु ।
अनन्यचित्तेन [11]सरस्वतीन्दिरा-गौरीश्रितं नित्यमुपासतेतराम्[12] ॥११॥

समृद्धय: केवलमत्र भौतिका, आध्यात्मिका अप्युदयन्ति भूतले।
इतीव कैश्चिद्विबुधैर्विनिर्मिता, तत्रास्ति पू: श्रीवटपद्रनामिका ॥१२॥



श्रीपद्रकाह्वस्तदुपान्तिके लघु,-र्ग्रामो नरै: कल्पमहीरुहैरिव ।
[13]बाह्येतराभिश्च भृत: समृद्धिभि,-र्विराजतेऽध:कृतनागनागर:[14] ॥१३॥

मैत्र्यस्ति पारस्परिकीह कापि यां, वीक्ष्योज्झितार्थैरपि किं विरोधिता ।

7. गच्छाधिपतेरित्यर्थ:।। 8. डलयोरैक्यादजलोऽपीत्यपि लभ्यते, तेन च निर्जलोऽपि चन्द्रकान्त: स्रवते इत्यपरोऽप्यर्थ: सङ्गच्छते ।। 9. यमराज:। 10. गोरीप्रिय:=महादेवो युवानश्च प्रमदाप्रिया:। श्रीपरमेष्ठी = ब्रह्मा च परमेष्ठिनश्चार्हन्नादय:, तथा च पवयोरैक्याद्देहलीदीपकन्यायेन च श्रीवर इत्यपि पदविग्रह: संभवति तेन च श्रीवर: = विष्णु: श्रीपतयश्च लक्ष्मीपतय इत्यर्थोऽ पि लभ्यते।। 11. सरस्वती = ब्रह्मपत्नी श्रुतदेवी च। इन्दिरा = विष्णुप्रिया धनलक्ष्मी च । गौरी = शिवाङ्गना ललनाश्च। ताभि: समाश्रितमिति ।। 12. यत्र नरा धर्मार्थकाममोक्षपरा इति भाव:।। 13. भौतिकात्मिकाभि:। 14. नागलोकामरसमुदय: ।

रुपेण कामा अपि नागरा यतो,-ऽभवन्नकामा[15] असमाः[16] समा[17] अपि ।।१४।।

पार्श्वस्थितेः श्रीलवणब्धितोऽर्जितं, लावण्यमङ्गेन पुनः स्वचेतसि ।
एतैः सकाशाद् गगनाद् विचक्षणै,-र्विशालताऽऽप्ता प्रकृतौ तनौ नहि ।।१५।।

विवेक एषां बहु किन्नु शस्यते, गुणोपयोगेऽपि यतः स वीक्ष्यते ।
बभूवुरेते दृढमुष्टयोऽजने[18], विसर्गकालेऽ-[20]दृढमुष्टयो जने ।।१६।।

उरभ्र [21]एवाविभवध्वनिश्रुतिः, सुगन्धिकाष्ठेऽगुरुशब्दयोजना।
कोषे हि यत्रारतिरीक्ष्यते पुनः, कुत्रापि नैव व्यभिचारदर्शनम् ।।१७।।

निरीक्ष्य नॄन् संविदतोऽपराङ्गिनां, सुखासुखे खात्मभवे इवेह तैः ।
मन्ये मतं स्वीकृतमेदद्भुतं, यदात्मभावोऽस्ति बहिस्तनावपि ।।१८।।

छोटेति नाम्नाचरितेन सज्जनः, सुनितिरीतिर्व्यवहारिहीरकः ।
तत्राभवन्नगरिकेषु मान्यवाग्, जिनेन्द्रपादाम्बुजयोर्मधुव्रतः ।।१९।।

वैरं विरोधः कटुता न केनचित्, कदापि सौम्यप्रकृतेः स्म विद्यते ।
तथाप्यमन्यन्तमहाविरोधिनं, तमात्मनः क्रोधमदादिदुर्गुणाः ।।२०।।

यदीयगम्भीरतया जितोऽम्बुधि,-र्वेलाछलादाक्रमणेच्छुकः किमु ।
विलोक्य यं स्वाधिकधैर्यशालिनं, स्वर्णाचलः स्तब्ध इवाभवन्ननु ।।२१।।

ब्राह्मी मुखाब्जं करपुष्करं पुनः, श्रिता यदीयं पुरुषोत्तमप्रिया ।
कान्तिः शरीरं हृदयं धृतिस्ततः, कीर्तिर्दिगन्तं कुपितेव संश्रिता ।।२२।।

15. संतोषवन्त इत्यर्थः। 16. अनुपमा । 17. सश्रीकाः। 18. शत्रुवर्गे । 19. प्रदानकाले। 20. अकृपणाः 21. अविः=मेषी।

कदापि चक्षु: परयोषित: क्वचिन्,-नासादयन्नेति वचश्च याचका:।
तथापि चित्रं मुहुरत्र गीयते, सर्वत्र दातेति यशोऽस्य सार्थकम् ।।२३।।

[22]पीयूषगोवृष्टिकरं तमोहरं, कुमुद्विकासाय सदा यमुद्यतम्।
अदोषमुच्चैरनुकर्तुमात्मना,-धुनापि यायाति विधु: प्रदक्षिणम् ।।२४।।

मृग्येत चेत् किं बहुनोदितेन तत्,-साधारण: कश्चन मानव: पर:।
दिवानिशं वित्प्रवरैर्जितश्रमै,-रवश्यमाप्येत तदा स एव हि ।।२५।।

दृष्ट्वा समर्थां निजरक्षणाय यां, सुशीलता स्राक् शरणं प्रपेदुषी ।
जगत्समुद्धारसमर्थदारक,- प्रसू: समर्थाभिधया प्रियास्य सा ।।२६।।

त्रिलोकलोकैरपि ही सुदुर्धरं, शीलं शिरोरत्नवदेनया धृतम् ।
इतीव शेषैरपि सद्गुणै: स्थितं, कृतत्वरैस्तत्पुरत: कृताञ्जलि ।।२७।।

एकाधिपत्यं सततं विजृम्भते, कामस्य कामं सुतनोस्तनौ [23]परम् ।
तस्या: सदालक्षितकामदर्शनं, मनो हि विस्मापयते न कं जनम् ।।२८।।

अनारतं वेदरवश्रवाद् भृशं, चिरेण निर्विण्णमति: पतीक्षणम् ।
दक्षा परिच्याव्य धरामुपागता, ध्रुवं समर्थाभिधया सरस्वती ।।२९।।

उपासितुं श्रीजिनमेकमीश्वरं, स्पर्द्धामिवास्या विदधत् परस्परम् ।
आस्योक्तमन्त:करणं तथा तनु,-प्रवर्तनं चातिशयेन राजते ।।३०।।

पादौ प्रयाणं नयने विलोकनं, पतत्त्रिपत्रे डयनं श्रुती श्रुतिम् ।

22. गौ: = किरणं वाणी च। तमस् = अन्धकारमज्ञानं च । कुमुद्विकासाय = पुष्पविशेषविकासाय क्षितौ च हर्षस्य विकासाय । सदेति पदं सर्वत्र योजनीयम्। स्वाधिकगुणशालिनं क्षितिस्थं तं श्रेष्ठिनं प्रदक्षिणयन्नहमपि तत्सम: सदा पीयू० सदा तमोहर: सदा कुमुद्विकासकोऽदोषो भवामीति विचारेण विधुरधुनापि पुन: पुन: प्रदक्षिणयति क्षितिमिति पद्यार्थ:।। 23. सर्वाङ्गसुन्दरा सेत्यर्थ:।

यथा तथान्तः करणे तयोर्दिवा,-निशं दधाते धियमेकिकां मिथः ।।३१।।

संतापितायां रविणा पयोधरै,-राश्वासितायामवनौ पयोभरैः।
केकायितैः कूजितदिक्षु केकिनां, वातेषु वातेषु च मृत्सुगन्धिषु ।।३२।।

विरच्य च प्रावरणं पयोमुचं, चिराद् रतोन्मग्ननिशानिशेशयोः ।
ग्रहेषु चोच्चस्थितिषु प्रसन्नतां, प्राप्तासु काष्ठासु किलाखिलासु च ।।३३।।

दोषत्रयोन्मुक्तशरीरया सुखं,-सुखेन सुष्वापमुपेतया तया।
निशीथिनीपश्चिमयाम एकदा, स्वप्नेऽम्बुजाक्ष्या ददृशे दिवाकरः।। विशेषकम् ।।

गवां विलासैः पृथिवीं प्रबोधयन्, विकासयन् पुष्करकाननश्रियम् ।
आनन्दयन् कोककुलानि नाशयन्, दोषास्तितां सर्वपथान्, प्रकाशयन् ।।३५।।

संत्रासयन् किञ्च चकोरधोरणी,-र्निमीलयन् कैरविणीकदम्बकम् ।
तमस्तिरस्कारकरान् करान् निजान्, प्रसारयन् घूकदृशोऽन्धतां नयन् ।।३६।।

तेजःसमाजैर्जनदर्शनीयता,-गुणं मुखेभ्यः ककुभां समर्पयन् ।
गम्यो न राहोर्नच वार्मुचामपि, स्वकीयमास्यं प्रविशँस्तयैक्षि सः ।।विशेषकम्।।

सुप्तोत्थिता साकथनीयसम्मदं, समुद्वहन्ती कलहंसगामिनी ।
पञ्च स्मरन्ती सततं नमस्कृतीः, स्वस्वामिना शोभितमाश्रयं गता ।।३८।।

नियोजयन्त्या करकुड्मलं तया, प्रियैर्वचोभिः प्रतिबोधितः प्रियः ।
तामादिदेशासितुमासनं तदा, तदासिता चानुमता प्रियेण सा ।।३९।।

तनावमात्रीं वदनेन तां मुहुः, समुद्गिरन्ती मुदमक्षरोपधेः[24] ।
स्वकान्तकर्णामृतसंमितं निजं, स्वप्नं समाख्यातवती यथेक्षितम् ।।युग्मम्।।



निपीतपीयूष इवाबभौ प्रिय:, सहर्षनेत्र: श्रुतमात्रतद्वचा: ।
विमुक्तिसेतुं कुलकेतुमात्मजं, विज्ञाय विज्ञ: क इवाप्नुयान्न शम् ।।४०।।

तमात्मजं त्वं प्रसविष्यसेऽचिराद्, योऽभूतपूर्वां द्युतिमार्हतं मतम् ।
प्रणेष्यतीति श्रुतिसौख्यदं वच:, पत्युस्तथेतीत्यभिनन्दितं तया ।।४१।।

विसृष्टया तेन तया स्वमाश्रयं, श्रित्वा समारभ्यत साकमालिभि:[25] ।
जिनेन्द्रसूरीन्द्रचरित्रसंस्तुति:। स्वस्वप्नवैफल्यनिवारणेप्सया ।।४२।।

प्रभाविनां कीर्तियशोगुणानिमा, दधु: स्तुवन्त्य: सुषमामलौकिकाम् ।
शङ्के स्त्रियस्ता न मनुष्ययोनय:, श्रुताधिदेव्या विविधास्तु मूर्तय: ।।४३।।



स्वीयप्रभातर्जितमामकप्रभ,-स्त्वत्कुक्षिभू: संभवितेति सुभ्रुवे ।
तस्यै नु वक्तुं निजगा: समुत्किरँ,-स्तदोदगाद् वारिजिनीविकासक:[26] ।।४४।।

कादम्बिनी वारि मणिं विदूरभू:, मुक्ताफलं शुक्तिरुदर्चिषं[27] शमी[28] ।
कल्पाङ्कुरं मेरुमही गुहा यथा, सिंहं तथा गर्भमुवाह सा तत: ।।४५।।

क्रमेण वृद्धावचसा विवेकितां, विचार्य यानासनभोजनादिकम्।
सम्पादयन्त्या सकलं शनै: शनै:, समर्थयाऽथो दधिरे सुदोहदा: ।।४६।।

निजाङ्गजोऽर्हच्छ्रुतवारिवर्षया, सर्वां यदाप्लावयिता वसुन्धराम् ।
ततो नु किं मीनदृशा स्म काम्यते, [29]कं वर्षतीर्मेघघटा विलोकितुम् ।।४७।।

संत्रासयिष्पत्यतिमात्रमङ्गजो, यदेककोऽप्यार्हतशासनद्विष:।
अनिन्दिताङ्गी स्पृहयाम्बभूव सा, श्रोतुं तत: कानननराजगर्जना: ।।४८।।

24. उपधे: = मिषात्। 25. सखीभि: समम्। 26. सूर्य:। 27. वह्निम्। 28. तन्नामा वृक्ष:। 29. जलम्।

तं स्वर्यशोभि: सितसृत्वरैस्तिर,-स्कर्ता प्रकामं निजनन्दनो यत: ।
इतीव चन्द्राननयाभिलष्यते, शङ्खस्य शब्दश्रवणं च दर्शनम् ।।४९।।

कर्तुं व्रतान्यर्चयितुं च शाश्वती,-र्मूर्तीर्जिनानामिति चान्यदोहदान् ।
छोटामहेभ्य: समपूरयत् तथा, यथा मन:प्रार्थितमामरस्तरु:[30] ।।५०।।

तनुस्तनुर्दोहदपूर्त्यनन्तरं, विराजते पोषवती नतभ्रुव:।
यथात्मलक्ष्मीर्गुणभूषणान्विता, श्रीमज्जिनाधीशमताप्त्यनन्तरम् ।।५१।।

प्रसूतिरेषा प्रथमेति तत्पिता, श्रीलालचन्द्राभिध इभ्यवृत्रहा ।
श्रुतं देहवाण इति क्षितौ निजं, ग्रामोत्तमं तां नयति स्म सक्षणम् ।।५२।।

अथाभिमुख्यं प्रसवस्य बिभ्रती, स्फुरत्प्रभा मन्दगती रराज सा।
कादम्बिनी ग्रिष्मऋतुक्षये यथा, निशावसाने च यथा हरेर्हरित् ।।५३।।

उच्चै: स्थितिं ग्रहगणेषु समागतेषु, श्रेष्ठयाश्रयं च भुवनैकभिषग्वरेषु ।
श्रीमज्जिनेन्द्रजननीव जिनाधिराजं, पुत्रं नृलोकतिलकं सुषुवे समर्था ।।५४।।
।।वसन्ततिलका।।

आस्याब्जमस्य जगतीजनपावनं किं, दृष्ट्वा तदा नु पवन: पवनो बभूव ।
अस्मन्मुखानि च यशोमिषतोऽचिरात् स, यच्चुम्बितेति किमु दिक्प्रमदा: प्रसेदु:।।५५।।

नेता स मां प्रति यतो जनताक्षिलक्षं, मोदादितीव ननृते ननु मोक्षलक्ष्म्या ।
लप्स्यामहेऽथ निलयं सकलेऽपि विश्वे,-ऽवल्गन् परस्परमितीव मुदा गुणाल्य:।।५६।।

पुण्येन च प्रतिभया च ममैव मूर्ति,-र्भावी सुतोऽयमिति वीक्ष्य नु सूरिराज: ।
आनन्दयुक्तविजया[31] इदमीयजन्म,-संवत्सरे दिवमयुर्गतचित्तचिन्ता: ।।५७।।

30. सुरतरु : कल्पवृक्ष: । 31. विजयानन्दसूरीश्वरा:।

अन्यं स्वीयं निकटजनमाबालगोपालबालं,
प्रोक्तेनात: किमिव बहुना प्राणिनोऽपि प्रकामम्।
आनन्दाम्भोधिलहरिषु संमज्जयञ् श्रेष्ठिवर्य,
-द्वन्द्वेनैतज्जनुरवसरे सुक्षण: संप्रवृत्त: ।।५८

इतिश्रीरामचन्द्रीयमहाकाव्ये तपागच्छाधिराज-व्याख्यानवाचस्पति-महाराष्ट्रदेशोद्धारकाचार्यदेव श्रीमद्विजयरामचन्द्र-सूरीश्वरचरितवर्णनात्मक: प्रथम: स्वर्ग: ।।

(सर्गेऽस्मिञ् चरितनायाकमातृपितृस्वरुपं स्वप्नदर्शनं दोहदपूरणं च सम्भावनीयमिति विभाव्य वर्णितमिति ध्येयं सहृदयै:)



# ।। श्री शंखेश्वरपार्श्वनाथाष्टकम् ।।

-आ.श्री विजयलब्धिसूरीश्वर समुदायवर्ति
मुनिश्री सिद्धसेनविजयाः

शङ्खेश्वरप्रभोर्मूर्ति-राषाढीश्रावकेन या;
कारिता निजश्रेयार्थं, तं पार्श्वं नौमि भक्तित: ।।१।।

खेटकपुरपार्श्वेशः, स्मरणीयस्तु सर्वदा;
मन: साध्यो मनोध्येय:, तं पार्श्वं नौमि भक्तित: ।।२।।

श्वासोच्छ्वासं प्रभुं पार्श्वं, स्मरन्ति मानवा: सदा;
पूर्यते वाञ्छितं तस्य, तं पार्श्वं नौमि भक्तित: ।।३।।

रत्नत्रयीप्रदाता य:, कामकुंभादितो वर:;
अद्वितीयगुणोपेत:, तं पार्श्वं नौमि भक्तित: ।।४।।

पार्श्वनाथप्रभोर्नाम, पुण्यपापप्रणाशकम्।
दर्शनात् पठनात् श्रेय:, तं पार्श्वं नौमि भक्तित: ।।५।।

श्वासोच्छ्वासाब्जगंधोऽस्य, स्वेदमलोज्झितं वपु:।
चित्रमतिशयं यस्य, तं पार्श्वं नौमि भक्तित: ।।६।।



नागोद्धृत: कृशानोश्च, दत्तमंत्रनमस्कृते:।
देवोऽभूत् तत्प्रभावेण, तं पार्श्वं नौमि भक्तित: ।।७।।

हरति रोगशोकादिन्, रणादिभीतिवारकम्।
यन्नामस्मरणं शीघ्रं, तं पार्श्वं नौमि भक्तित: ।।८।।

भगराजविमानेषु, भवनेष्वपि पूजिता।
भूरिकालं प्रभोर्मूतिस्तं पार्श्वं नौमि भक्तित: ।।९।।

गर्भे जन्मनि दीक्षायां, केवले निर्वृतौ तथा।
यस्येन्द्रा महिमां चक्रुस्तं पार्श्वं नौमि भक्तित: ।।१०।।

कारितो वासुदेवेन, जिनालय: सुशोभित: ।
श्री शंखेश्वरतीर्थस्य, तं पार्श्वं नौमि भक्तित: ।।११।।

नक्तंदिवा नृणां पार्श्व-प्रभो: स्मरणमात्रत:।
विघ्नौघा: प्रलयं यान्ति, तं पार्श्वं नौमि भक्तित: ।।१२।।





# ।। काव्यशास्त्र विनोदेन... ।।

-मुनिश्री सम्यग्दर्शनविजया:

(काव्यप्रियसहृदयचमत्कारकारिणीषु नैककाव्यपद्धतिषु 'अन्तरालापा' इति एका पद्धतिस्तत्रापि नाना-प्रकारा स्तेष्वेकविधे प्रकारे-''काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्'' इत्युक्तिमनुसृत्य प्रस्तूयन्ते काश्चित् सूक्तयोऽत्र। एतासु चरणत्रयं समस्यारुपं चतुर्थं चरणं शब्दत्रयमयं समाधानात्मकं-सूक्तस्वरुपश्चाऽस्ति।)

विपत्सु धारणीया का ?,

स्यात् क: पुण्यवतां सदा ?

कस्यै सदा यतितव्यं ?

**समतालाभो विमुक्तये** ।।१।।

सद्गुरूणां कृपा कीदृक् ?

भववासाय का भवेद् ?

सतां महोत्सवार्थं का ?

**मुक्तिदा ममतामृति:** ।।२।।

करणीयो कथं धर्म: ?

लभ्या धर्मेण का पुन: ?

वात्सल्यदानपात्रं क: ?

**भावतो निर्वृति र्लघु** ।।३।।

सतां कोपशम: कस्मिन् ?

कर्तव्य: कीदृश: सखा ?

परार्थकारक: कीदृक् ?

**प्रणते वत्सलो महान्** ।।४।।

धर्तव्या देवगुर्वो: का ?

कस्य मार्गश्च दर्शनं ?

प्रणये का सहाया स्यात् ?

**भक्ति र्मोक्षस्य दूतिका** ।।५।।

तुल्यशीलै: समं का स्याद्?

केन दीप: प्रकाशते?

द्रु: वार्-सेकेन किं कुर्याद्?

**मैत्री स्नेहेन वर्धते** ।।६।।

कै: संग: सदा कार्य: ?

कमले भ्रमरस्य का?।

स्यात् "**सम्यग्दर्शनं**" कस्मै?

**सद्भि: प्रीतिस्तु श्रेयसे** ।।७।।

***

-साध्वीवर्याश्री प्रशमनिधिश्री

नश्येद् तप:फलं कस्माद्?,

जीवान् का रोचते सदा?

किं तमोंऽशूदये कुर्याद्?,

**कोपाद् प्रीति विंनश्यति** ।।१।।

नरि को दुर्गुणो मुख्य: ?,

प्रधान: कश्च शासने?

सर्वेषामप्रिय: क: स्यात्?

**मानो विनयनाशक:** ।।२।।

आर्जवेन विजेया का?

सहाया: सङ्कटे च के?

किंरुपा दोषदृष्टिश्च ?

**माया मित्राणि नाशिनी** ।।३।।

दोषस्य मूलहेतु: क: ?

धर्मेण प्राप्यते च किम्?।

किं कर्त्तव्यं स्वदोषाणां?

**लोभ: सर्वं विनाशयेत्** ।।४।।

दर्शनं लक्ष्यते कस्माद्?

प्राप्तव्या साहसेण का?

कीदृशी स्यात् सतां प्रीति: ?

**प्रशमात्सिद्धिरक्षया** ।।५।।

# ।। चारित्र सप्तविंशिका–३ ।।

-मुनिश्री सम्यग्दर्शन विजयाः

**मंगलाचरणम्**

ऐन्द्राचर्व्यं वरमंगलैकनिलयं, मुक्त्यंबुजे षट्पदम्,
दुष्टानन्तविकारजालविकलं, शंखेश्वराधीश्वरम्।
ऐश्वर्यं प्रशमादिसौख्यजनकं, यद्दर्शनात्प्राप्यते।
तं श्रीपार्श्वजिनेश्वरं गुणनिधिं वन्दे मुदा श्रेयसे ।।१।।

उपजाति छंदः –

चारित्रमध्यात्मरसैकपानम् ।
चारित्रमेतद् वरबोधगानम् ।
चारित्रमेतद् गुणपुष्पवानम्[१]।
चारित्रमेतद् शिवधामयानम् ।।२।।

चारित्रमेतद् गुणवल्लिकंदं ।
चारित्रमेतद् यतिचित्तनन्दम् ।
चारित्रमन्तोरिपुघातचण्डम् ।
चारित्रमेतद् निहतत्त्रिदण्डम् ।।३।।

सिद्धान्तपूर्णं चरणं पृथिव्याम् ।
स्वाध्यायपूतं चरणं सदैव ।
वीताघपूञ्जं चरणं विशिष्टम् ।
चारित्रमेतद् भविनामभीष्टम् ।।४।।

१. सौरभम्



क्रोधं च लोभं मदनं च मानं ।
मायां तथा दुर्विषयाभिमानम् ।
विहाय ये सच्चरणं श्रयन्ते ।
स्वैरं स्वदन्ते समतामृतं ते ।।५।।

आत्मस्वरुपं सहजं व्यनक्ति ।
विभावरागं सहसा तनक्ति[1] ।
दौर्गत्यदुःखं भविनां भनक्ति ।
चारित्रमेतत् सततं भुनक्ति[2] ।।६।।

सारल्यभावेन निरस्तमालम्[3] ।
सद्धर्मसेवाऽऽहतकर्मजालम् ।
धीकुञ्जरक्षाकरणालवालम् ।
भक्त्या स्तुवेऽहं चरणं त्रिकालम् ।।७।।



दुःखाग[4] दावं[5], भववार्द्धिसेतुं ।
संसारमायाहरणैकहेतुम् ।
मुक्तिश्रियाः वासगृहस्य केतुं ।
चारित्रमेकं शरणं प्रपद्ये ।।८।।

दुष्कर्म सर्वं कवलं करोति ।
स्वात्मप्रदेशं धवलं तनोति ।
मोहारिभेदाय बलं चिनोति ।
भद्रं सदा तं चरणं प्रणौमि ।।९।।

चारित्रमेतद् दयितः क्षमायाः ।
चारित्रमेतद् द्रविणं[6] च भव्यं ।
चारित्रमेतद् द्रविणं[7] निवृत्यै ।
चारित्रमेतद् शरणं प्रपद्ये ।।१०।।

१. तनुकरोति। २. पालयति। ३. कपटम्। ४. वृक्षं। ५. दावानलं। ६. धनं। ७. पराक्रमम्।

चारित्रमेतद् सहजो विवेक: ।
विवेक लाभाच्च व्रजन्ति दोषा: ।
दोषारिनाशेन भवेद् विशुद्धि: ।
शुद्धिप्रभावेण शिवस्य लाभ: ।।११।।

चारित्रमध्यात्मगुणैरुदारम् ।
चारित्रमानंदसुखप्रसारम् ।
चारित्र[1]मंहोद्रुवने कुठारम् ।
चारित्रमेतद् प्रशमावतारम् ।।१२।।

मनोविशुद्धि र्जिनवाङ्निबद्धा ।
नि:संगयोगोऽपि तयैव साध्य: ।
नि:संगतायां चरणस्य सार: ।
चारित्रमेतद् सततं भजेऽहम् ।।१३।।

कामादिदुर्हृद्हननात् प्रसिद्धम् ।
दौर्भाग्य-दु:खं च यतो निषिद्धम् ।
क्षमा-गभीरादिगुणाप्तिलुब्धम् ।
नमामि नित्यं चरणं विशुद्धम् ।।१४।।

गुप्तित्रयं यस्य गुणे वरिष्ठं ।
स्यात् स्यन्दन: मोक्षपथे गरिष्ठ: ।
चारित्रमेतन्न करोत्यनिष्टं ।
सदा प्रदत्ते चरणं त्वभीष्टम् ।।१५।।

**चारित्रस्य सुमनोदामोपमा :-**

चारित्रं **वरपुष्पदामरुचिरं**, नैस्पृहजी[2]वायुतं,
श्री सम्यग्दशसाधुधर्मप्रसवै:, शीलाख्यसौरभ्यभृत्,

१. पाप्मन् । २. रज्जु ।

स्वाध्यायालिगणैः सदा कृतरवैः, पुण्यौघदिग्विस्तृतम्,
नैर्मल्यात्मपरागरागकलितं, चित्ते सदा नन्दतात् ।।१६।।

**चारित्रस्य नयनोपमा :-**

चारित्रं **नयनं** नवं क्षितितले, दृष्टं मया नो क्वचित्,
पश्येत् यत् कमनीयसद्गुणचयं, स्वीये स्वरुपे सदा,
नित्यं पौद्गलसूक्ष्मभावगमकम्, स्थूलेषु का तत्कथा,
तत्तद्भावविभावनैकप्रवणं, नाऽस्य क्वचित् व्याहतिः ।।१७।।

तारे ज्ञान-क्रियापरे हितकरे, जैनागमे व्यापृते,
पक्ष्मे द्वे व्यवहारनिश्चयनयौ, कारुण्यशीलो भ्रुवौ,
यस्य श्री चरणाम्बकस्य हितकृन् निर्वर्णनं[१] पावनं,
**सम्यगदर्शनदं** सदैव तमहं, चारित्रनेत्रं भजे ।।१८।। (युग्मम्)

**चारित्रस्य शरदर्त्तुपमा**

चारित्रं **शरदर्त्तु**रात्मसुखदा, मोहारिजाडयप्रदा,
योगे स्फूर्त्तिकरा विवेककरणे[२] संतुष्टि-पुष्टीष्टदा,
चित्ताभ्रं विमलीकरोति निपुणा साम्याख्यशैत्यधरा
निर्ग्रन्थाऽमृत[३]रोचिषेऽखिलकलाविस्तारिणी स्यात् सदा ।।१९।।

**चारित्रस्य दीपकोपमा ।**

चारित्रं **वरदीपकः** स्वकिरणैः मिथ्यातमिस्रं हरेत्।
दुर्वारि[४]स्मरमारुतैरविचलः स्याद्वादतेजोधरः ।
निःस्नेहोऽपि जिनेश-सद्गुरुजने स्नेहाविलः सर्वदा ।
सज्जश्चित्तगृहे प्रकाशकरणे चारित्रदीपोऽस्तु मे ।।२०।।

१. निरीक्षणं । २. देहे । ३. चन्द्रः । ४. कामदेवः

**चारित्रस्य केलिवाप्युपमा ।**

चारित्रं **केलिवापी** विमलनयजलैः सर्वतः शोभमाना ।
प्रज्ञा-ह्री-कीर्त्ति-प्रीति-मति-नृपतिवधूस्नात्रक्रीडोचितश्रीः।
नानायोगात्महंसाः गुणकमलवनै र्यत्र तन्वन्ति पोषं ।
स्यान्मे चारित्रवाप्यां प्रतिदिनमसकृन् मज्जनं स्वात्मशुद्ध्यै ।।२१।।

**चारित्रस्य चातकोपमा ।**

आत्मानंदनभस्तले विलसति स्वैरं मनोहारकः ।
श्रीतीर्थेशवचोघनाघनजलं प्रीत्या भृशं वाञ्छति ।
मिथ्यादर्शनवाक्सरोवर-नदी-कूपात्तु नैवेहते ।
चारित्रं वरचातकः शुभतनुः स स्यान्ममाऽऽश्रेयसम् ।।२२।।

**चारित्रस्य ज्वलनोपमा -**

चारित्रं **ज्वलनं** समुज्जवलगुणः पावित्र्यसर्पिर्हुतः।
शुक्लध्यानमरुत्सखा शुभमतिस्वाहाप्रियः चित्शिखः।
क्लिष्टाभ्यन्तरकर्मकाष्ठनिचयं दग्धुं सदैवोद्यतः ।
सम्यग्ज्ञानकुमार[1]पुत्रजनकः, जीयात् सदा मानसे ।।२३।।

**चारित्रस्य ब्रह्मोपमा -**

**ब्रह्मा** सच्चरणं नु सद्गुणजगत्स्रष्टा क्षमावाक्पिता ।
मुक्तीप्साकमलोद्भवः परिणतिप्रोल्लास हंसासनः।
धर्मध्यानचतुर्मुखाऽष्टविधधी[2]भेदश्रवःशोभनः ।
चारित्रं विमलं करोतु सहसा मे जाति-मृत्युक्षयः ।।२४।।

---

१. स्कन्दः २. बुद्धिप्रकारा एव कर्णाः यस्य स.

**चारित्रस्य महादेवोपमा -**

चारित्रं **गिरिशो** विरक्ति-विरति-स्वर्निम्न[1]गोमाप्रियः।
त्रिरत्नेक्षण[2]कामदेवदहनः, संसारसंहारकः।
ईशानुग्रहरोहिणी[3]पतिधरः, साधुगणाधीश्वरः।
श्री शीलाङ्गपिनाक[4]भृच्चरणमेतन्मानसे तिष्ठतु ॥२५॥

**चारित्रस्य-वासुदेवोपमा -**

चारित्रं **हरिरेष** सर्वसुभगो निर्वृत्तिराधाप्रियः।
वैराग्याब्धिशयस्तपोगिरिधरो धत्ते मनीषागदां।
[5]आगः-कंसविनाशको व्रततति-श्रीवत्सभृन् मोहनः ।
आत्मानन्दन-नन्द-नन्दन! सदा मे मानसे नन्दतात् ॥२६॥

**चारित्रस्य सदनोपमा-**

चारित्रं सदनं विवेकधवलं साधुप्रमोदास्पदम्।
स्वच्छैः पञ्चमहाव्रताऽपवरकैः संशोभि साम्याङ्गनम् ।
शश्वद् स्वात्मरते विलाससदनं रत्नत्रयं [6]कुट्टिमम्।
**सम्यगद्दर्शन**मूलमस्य शिवदं तं संश्रये **श्रेयसे** ॥२७॥

---

१. गङ्गागौर्योः स्वामी २. रत्नत्रयीरुपं नयनं ३. चन्द्रः ४. तन्नामशस्त्रं ५. दोषः। ६. तलम्।



# ।। श्री चतुर्विंशतिजिनचैत्यवन्दनानि ।।

-साध्वीवर्याश्री विरागदर्शनाश्री

## ।। श्री आदिजिन चैत्यवंदनम् ।।

वसंततिलका: –

* ऐन्द्रालिमौलिमुकुटार्चितपादपद्मम् ।
मिथ्यांधकारदलने त्रिजगत्प्रदीपम्।
भाषानुसार्यखिलसंशयनाशिवाचम्।
वंदेऽरिहंत–वृषभं प्रथमं जिनेन्द्रम् ।।१।।

* त्वां प्राप्य नाभिकुलकैरवचंद्रबिम्ब !
धन्योऽस्मि नाथ! सफलं मम जन्म मेने ।
सा शर्वरी सुखकरी दिवसोऽपि शस्य:
स्याद् दर्शनं तव यदा शिवशर्मकारं ।।२।।

* प्राप्ता: श्रियोऽद्य सकला: खलु मारुदेव !
तीर्णं मया चुलुकवत् भववारिराशि:
दृष्टोऽसि यत्त्वमतिदुर्लभ आदिदेव !
नैस्स्वे सुपर्वमणितुल्य! मरौ सरोवत् ।।३।।

***

## ।। श्री अजितजिन चैत्यवंदनम् ।।

* इक्ष्वाकुवंशतरणे! जितशत्रुसूनो!
कल्याणकंद! जय कंचनकांतिदेह! ।
कंदर्पघाति! गजलाञ्छन! तार तार !
पुण्यौघशालिविजयासुत! देहि बोधिम् ।।१।।

* दुस्तीर्णरौद्रभवदावहुताशनीरं,
दुर्जेयमोहभटमान विनाशवीरं।
वन्देऽजितं जिनवरं गिरिसारधीरं।
मिथ्याकुवादजलभृत्हरणे समीरं ।।२।।

* रागादि चोरमुषितोऽस्मि सदा जिनेन्द्र!
युक्ता क्षमे सति प्रभौ न हि प्रेष्यपीडा ।
त्रस्तो भवेऽस्मि हतमोह! भ्रमन् विना त्वां।
देवं ततो प्रतिभवं जिन! संश्रये त्वां ।।३।।

***

## ।। श्री संभवजिन चैत्यवंदनम् ।।

* जीया: जितारिनृपपुत्र! जितारिवृंद !
सेनाम्ब! त्वं गुणगणाकर! भव्यबंधो! ।
देवाधिदेव! परमेश्वर! संभवेश !
तीर्थेश! नंद सुचिरं भगवञ्जिनेश ! ।।१।।

* कान्त्याऽस्तभास्कर! सुरासुरसेविताज्ञ !
देही प्रणम्य लभते शिवसंपदं त्वाम् ।
मोहारिराвि भवता जिन! दुर्जयोऽपि
निर्मोह! मां वितर मोहविनाशसत्त्वम् ।।२।।

* दिव्यै: सुखै र्मम सृतं मनुजै: सुखैस्तु
स्वामिन्! सदाऽस्तु सुलभं तव शासनं मे ।
नाथोऽसि त्वं प्रतिभवं तव सेवकोऽस्मि।
मे प्रार्थनां च सफलीकरु संभवैतां ।।३।।

***

## श्री अभिनंदन जिन चैत्यवंदनम्

* तुभ्यं नमो भुवनस्वाम्यभिनंदनाय ।
तुभ्यं नमो भवमहातरुकुंजराय ।
तुभ्यं नमो सुरनराधिपपूजिताय ।
तुभ्यं नमो जिनमताब्धिनिशाकराय ।।१।।

* संसारभीमगहने विषयादिचोरै:।
मां पीडितं भवभयंहर! पाहि पाहि ।
सन्तो हि भीतजनरक्षणकार्यदक्षा: ।
श्रेष्ठोऽस्ति तेषु भवतारण! मां सुरक्ष ।।२।।

* याचे न वैभव-धनं भवत: समीपे,
सेवा तवाऽस्तु चरणस्य भवे भवे मे।
प्राप्ता मयेह कथमप्यटता त्वदाज्ञा,
तस्यास्तथा कुरु न स्याज्जिन! खंडनं मे ।।३।।





# ।। तपोमहिमागानम् ।।

**-साध्वीवर्या श्रीप्रशमनिधिश्री**

तप: शिवाध्वपाथेयं, तप:सर्वार्थ साधकं।
तप: क्लेशाग्निपाथोदं, तप: दौर्गत्यबाधकं।।१।।

तप: मुक्तिवधूद्वाहे स्मराम्यहमहर्निशम्।
यावन्न मोक्षलाभ: स्यात्। तावत्तप: समाचरेत् ।।२।।

तपसा निर्जरा बह्वी, दुर्भेदकर्मणामपि।
तपसा निर्वृति: साक्षाद्, संसारेऽप्यनुभूयते ।।३।।

तपसे सौख्यदायाऽस्तु, नमो दौर्भाग्यवारिणे ।
तपसे कामदायाऽस्तु, नमो दारिद्रयदारिणे ।।४।।

तपसस्त्रस्यति मोह:, काकनाशं च नश्यति ।
तपसो भोजनासक्ति:, देहरागश्च लीयते ।।५।।

तपसो महिमागानं, कुर्वते सद्गुरुव्रजा: ।
तपस: स्मरणं श्रेष्ठं, मांगल्यकृद् शरणं पुन: ।।६।।

तपसि "**प्रशमो**" वर्य:, **श्रेयस्करी** च नम्रता ।
तपसि राजते नित्यं, सम्यग्दर्शनसद्गुण: ।।७।।



# ।। श्री वर्धमानमहावीरस्तवपञ्चकम् ।।

-डॉ. आचार्य रामकिशोर मिश्र
खेकडा (बागपत) पट्टीरामपुरम्-उ.प्र.

(१)

यःकर्मणाऽत्र मनसाऽत्र हृदा च वाचा,
जीवस्य पीडनविराम इहेत्यहिंसा।
तत्पालकं तमथ जैनमुनिं भजामि,
तं वर्धमानमिह वीरमहं नमामि ।।१।।

(२)

सीमासु कुण्डलपुरस्य बभूव शान्तिः,
मैत्री बभूव जनतासु शशाम वैरम्।
वीरं जगाद जननी भुवि निर्भयं यम्,
वन्दे मुनीन्द्रमिह तं त्रिशलातनूजम् ।।२।।

(३)

सांसारिकादिसुखसंग्रहमुक्तचेताः,
जीवात्मवान् स भगवानपरिग्रही यः ।
सिद्धार्थपुत्रमधुना यमहं स्मरामि,
तं वर्धमानमथ जैनमुनिं नमामि ।।३।।

(४)

योगेन सत्यवचसा व्रतपञ्चकेन,
ध्यानेन जीवदयया च तितिक्षया च।
स्वात्मानमेव कृतवानिह यो हि तीर्थम्,

तीर्थङ्करं तमथ जैनमुनिं स्मरामि ॥४॥

(५)

सिद्धार्थराजतनयाय महाजिनाय,
वीराय जैनमुनये त्रिशलात्मजाय,
जैनप्रवर्तकवराय मुनीश्वराय,
तस्मै नमो भगवते महते जिनाय ॥५॥

(६)

**रामकिशोरमिश्रेण**, शूकरक्षेत्रवासिना;
कृतं जनावबोधाय, महावीरस्तवपञ्चकम् ॥६॥



# ।। श्री सरस्वत्या वन्दनम् ।।

-डॉ. आचार्य रामकिशोर मिश्रः
खेकडा (बागपत) पट्टीरामपुरम्-उ.प्र.

(१)

हे श्वेत हंसपरिवाहिनिवन्दनीये !
गन्धर्वदेवदितिसूनुमनुष्यपूज्ये !
कुन्देन्दुशंखनिभभास्वरगौररुपे!
वीणाप्रवादिनि सरस्वति देवि! वन्दे ।।१।।

(२)

पृथ्व्यात्मकं जननि! गन्धमहं ददामि,
धूपं ददामि पवनात्मकमत्र तुभ्यम्।
दीपश्च ते हि दहनात्मकमर्पयामि,
सर्वोपचारमयि देवि! समर्पये ते ।।२।।

(३)

सम्पादयित्रि नतभक्तमनोमुदो हे!
विज्ञानतत्त्वरसदे! वरदे! यशोदे!
वेदान्तदे! दह च मे जडतां सुवर्णे!
वीणाप्रवादिनि सरस्वति देवि! वन्दे ।।३।।

(४)

वीणाधरे कमलवासिनि शुभ्रगात्रि!
ताराधिनाथवदने कविकीर्तनीये!
वागीश्वरि प्रथितपुस्तकधारयित्रि!
बुद्धिं प्रदेहि कवितावरदे नमस्ते ॥४॥

(५)

आनन्ददायिनि बुधाऽर्चितपादपद्मे!
त्वामाह्वयामि **कविरामकिशोरमिश्रः**।
ज्ञानेश्वरी त्वमसि मे कविताप्रदात्रि!
वीणाप्रवादिनि! सरस्वति देवि! वन्दे ॥५॥



# ।। हिन्दी भारत भारती ।।

(इयम् रचना हिन्दी-संस्कृत द्वयम् समम् अस्ति)

-डॉ. कृष्ण नारायण पाण्डेयः 'भारद्वाज'

उत्तर दक्षिण सर्वत्र, पूर्व पश्चिम विस्तृत,
हिन्दुस्तानी सुपर्याय हिन्दी भारत भारती ।।१।।

अरुणाचल प्रान्तस्य सम्पर्क सूत्र साधिका,
कन्याकुमारि कश्मीर हिन्दी भारत भारती ।।२।।

संस्कृत पुत्रिका दिव्य भारतवर्ष वाचिका,
हिन्दी उर्दू सुसंयुक्त हिन्दी भारत भारती ।।३।।

पंजाबी असमी वाणी ब्राह्मी लिपि प्रकाशिका,
लेखन देव नागरी, हिन्दी भारत भारती ।।४।।

सिन्धु सरस्वती रुप आंध्र केरल वासिनी,
कर्नाटकी महाराष्ट्र हिन्दी भारत भारती ।।५।।

मानवता सुरक्षार्थ भारत राष्ट्र संस्कृति,
मानव मूल भाषत्व हिन्दी भारत भारती ।।६।।

आर्य द्रविण एकत्व लोकहृदयवासिनी,
संस्कृत मानवी वाणी हिन्दी भारत भारती ।।७।।

ऐक्य साहित्य संपन्न विश्व साहित्य भारती,
विश्व कुल प्रचारार्थ हिन्दी भारत भारती ।।८।।

नव भाषा विज्ञानम् :- हिन्दी तत्समशब्दबाहुल्येन 'आधुनिक-संस्कृतम्' अस्ति। यदि पूर्णपदम् पृथकम् लिख्यते पठने सारल्यम् भवति। संस्कृतम् विश्वस्य मूलभाषा अस्ति। अन्य भाषाः संस्कृत प्राकृतम् अपभ्रन्शम् वा विकृतम् शब्दयुताः सन्ति। ''अ इ उ ण'' सूत्रेणं त्रिमूलसूत्रयुतम् संस्कृतम् मानवस्य मूल भाषा अस्ति। संस्कृतानंदः संस्थापक मानवता कुलम्।

# ।। संवेगप्पिय कुलकम् ।।

-मुनिश्री प्रशमरक्षित विजया:

नमिउं गुरुकमकमलं, गुरु गुणगुरुनियसिस्सेहिं।
जहा विनयं जुज्जइ, काउमहं तहा पवक्खामि ।।१।।

णिग्गहे अणुग्गहस्स, पहारे य पसायस्स मई जस्स।
सो चिय गुरुबहुमाणी, अण्णो पुणो वंचणापरो ।।२।।

किं वएण य तवेण य, नाणविणयनाणेहि य किं ताणं।
गुरुं पइ ण बहुमाणो, जइ हिययम्मि सिस्साणं खलु ।।३।।

जेसिं गुरुबहुमाणो, तेसिं परमगुरुसंजोगो होइ।
तओ सिद्धी निच्छिअं, विकप्पो तत्थ न कायव्वो ।।४।।

गुरुणो जइ कम्माइ, कुणन्ति ताइ नो सिस्सा कुणिज्जा।
तेहिं कहिज्जन्ताइं, अवस्समेव हिअयभत्तीए ।।५।।

गुरुआणाइ बज्झं पि, कयं लहु कज्जं न सुहयरं हुइ।
अणंकाइ सुण्णाणि व, तओ आणाधम्मं चरिज्ज ।।६।।

निवस्स आणालोवे, इक्कं चिय मरणफलं हुइ लोए।
गुरुणां पुण मुणिज्जा, अणंतखुत्तं दुहयरमेव ।।७।।

जहा विज्ज उवइट्ठो-सहाहि रोगी वि रोगमुक्को हुइ।
तहा गुरुजणोवइट्ठ - वयणेहि मुणी निरइयारो ।।८।।

सक्ककज्जम्मि पमाआ, निस्सत्तणं परिफुरइ साहुसुं।
तम्हा तं परिचत्ता, मुणिधम्मम्मि उज्जमं कुणह ।।९।।

मिगारिवित्तीए खलु, जइ चइत्थ गिहवासं तं तुमं पि।
तहा जयाहि जइधम्मे, सियालु व्व मा होउ कहं पि ।।१०।।

जस्स गुरुम्मि सुभत्ती. वज्जरेहुव्व निवसइ हिययम्मि।
जीविअं सहलं तस्स, वीरम्मि सुनक्खत्तमुणिव्व ।।११।।

अवखिंसणम्मि संते, गुरुणा गुरुभत्तिभावं थोवं पि।
एगलव्वुव्व सिस्सो, चइज्ज न हि चित्ताओ ।।१२।।

चक्खुउम्मिसनिम्मिसाई-मइलहुयकज्जाइं चिच्चा।
सव्वमण्णं पुच्छेज्जा, मेरा एसा मुणीणं हुइ ।।१३।।

गुरुवयणाओ जाइं, णिवडन्तवयणाइं गिण्हइ जो वि।
सो सिस्सो भणिअव्वो, ता सेसा न उण ते सिस्सा ।।१४।।

गुणकलियमपि दोसो-वेअं वयं न सुहोदयाय हवइ।
असुहपरिणामओच्चिय, विससंसत्तं पायसं पिव।।१५।।

भवणित्थारभावओ, नाणाइगुणग्गहणहेउओ जा।
कया भत्ती गुरुणं, सा नूणं हवइ सेयत्थं ।।१६।।

पुज्जाणं खलु सेवा, पूजाए हुइ साहूणं नियमा।
ता पुणो अणायारो, अबहुमाणं तेसिं कम्हा ? ।।१७।।



सुयनाणं परमत्था, केवलफलं भासिअं जिणमयम्मि।
पाविज्ज तं गुरुहिंतो, ता तेसु अणायर मई का ।।१८।।

गुरुकिवा उ सिस्साणं, परममङ्गलनियाणं जं वुत्तं।
तीए तं पययिज्जहि, अण्णहा विज्जाई मिच्छा ।।१९।।

चउदहपुव्विणो वि य, पमायवसओ वसन्ति णिगोएसु।
ता पमायं वज्जिउं, गुरुआणाउ तप्परा होन्तु ।।२०।।

गुरुकुलवासाइक्कन्ता, नाणाइगुणभाइणो णो कहवि।
अकम्हा दुट्ठदोसा-सेवणावसरो वि उवट्ठाइ ।।२१।।



सव्वगुणमूलभूए, गुरुकुलवासम्मि वसिज्जह सिस्सा! ।
जइ तुमे चरणत्थिणो, अण्णहा वयभङ्गहेऊ वि य।।२२।।

निरइयारसंजमत्थ-कयपावानुबन्धपरिहरणत्थं।
नाणाइलाहत्थं च, गुरुकुलवासो च्चिय तुमे सरणं।।२३।।

आगमा अप्पहियं य, आगमो गुरुविणयओ हुइ नूणं।
तओ अप्पहियत्थिणा, विणीएण भविअव्वं वरं।।२४।।

गुरुकयोवयाराणं, पच्चुवयारं काउं न सहसि जइ।
तो विणीओ होउं, पावहि सेवाइफलं झति ।।२५।।

गुरुवयणम्मि विणयजोग-पयडणपमुहनियाणं कुलगमेयं।
भणियव्वं सिस्सेहि, जइ तुमे विणयत्थिणो हुज्ज।।२६।।

संवेगप्पियकुलगं, संवेगप्पियमणमुणीणं कए।
**मुत्तिप्पहसूरिसिस्स, पसमरक्खिएण** रइयमेयं।।२७।।

# ।। नवकार-पहावेण मच्चुतो रक्खा ।।

-श्री सिद्धिसूरीश्वर समुदायवर्ति
साध्वीवर्याश्री जिनमति श्री

एगवीस समा पुरा पंच आराहगा सावगा कम्मिवि गामम्मि गमणं इच्छन्ति। तम्हा ते सव्वे धुवारणस्स आराउ नीसिहिआ । अन्ने वि पणयालीसा पहिआ तत्थ नावम्मि संति। दोन्निहिं नाविएहिं सणियं सणियं नावा जलम्मि प्पवाहिआ। नावा जाव मज्झभागे पत्ता ताव नाविएहिं पोक्कारो कओ।

'अरे! अरे! अम्हाणं अज्ज निच्छियं मच्चु भविस्सइ।' सव्वे पहिआ विम्हिअचित्ता ताण सम्मुहं पेच्छन्ति। नाविएहिं भणिअं, अम्हे सच्चं वक्खामो।

पहिएहिं पुच्छीअं, 'किं भूअं?'

तेहिं भणीअं, 'अज्ज अम्हेहिं मग्गो चुक्को।' इओ अग्गे बहुलं जलप्पवाहं आगमिस्सइ। सो प्पवाहो अम्हेहिं धरिउं न सक्किजइ। सो इयं नावा सम्मुहे ठिए खंभे आप्फालिउण खंडिस्सइ। अम्हे तरणे समत्था वि जलप्पवाहस्स बहुलयाए न तरिस्सामो। तम्हा अम्हे वि बुड्डिसामो। अहूणा रक्खाए को वि उवाओ नत्थि।

इय सोच्चा केइ पहिआ रुवंति। केइ पोक्कारं करन्ति। केइ नाविएम्मि अक्कोसन्ति । केई नियपरिवारं सरिऊण चिन्तापरा भवन्ति। केइ मच्चुभएण सुन्नमणा भवन्ति। ते पंच सावगेहिं वि सुअं। ते न रुयंति, न पोक्कारन्ति, न अक्कोस्सन्ति अवि उ धिइं धरिऊण परोप्परं नवकारो गुणणाए सूयन्ति। कर-जोडिउण, नयणे निमिलिऊण सागारी अणसणं पडिवज्जिऊण ते पंच वि सद्धाए एगमणे नवकारझाणं काउं लग्गा।

थोवसमयानंतरं तेहिं एकस्सग नाविअस्स सद्दं सूअं। 'अम्हे मच्चुं जिच्चा अग्गे वच्चामो अम्हाणं नावा अखंडं अत्थि। मच्चुभयं दूरं गयं। तओ नावा कंवि गामसमीपे पत्ता। सव्वेहिं आणंदेण जयजयारवो कओ। सावगाणं नवकारसद्धा दृढा जाया।

इत्थं नवकार-पहावो अज्ज वि अत्थि। अम्हे वि सो पहावो अणुहवणत्थं नवकार-गुणणाए पउणा भविज्जइ।

-इअ नवकार-पहावम्मि सावगाणं दिट्ठंतो।

# ।। कुवलयमालाकहाए संखित्तसरूवं ।।

**हेमचंद्राचार्य ज्ञानभंडार-पाटण**

**- पं.कुणालभाई हेमेन्द्रभाई कपासी**

''अत्थं भासई अरिहा सुत्तं ठायंति गणहरा निउणं''

(आवश्यकसूत्रे)

मुत्तुण दिट्ठिवायं कालिय-उक्कालियंग सिद्धंतं।
थीबालवायणत्थं पाईयमुइयं जिणवरेहिं।।

सव्वे जणा गिव्वाणगिरं न जाणन्ति। केण उवायेण जणा धम्मं वहेज्जा त्ति भावणाए जिणवरा थीबालाइणं कल्लाणाय लोयपसिद्धाए पाइअभासाए उवएसो दिन्ति।

सिरिवद्धमाणसामिणो परंपराए उज्जोयणसूरित्ति पसिद्धो आयरियो अभू। तेहिं आयरिएहिं पाइअभासानिबद्धा कुवलयमालाकहा रइया। शाके सं.७०० मिते संवच्छरे जावाले उरे इयं कहा गुम्फिआ। कहाए पंच मित्ताणं मुक्खापत्तिऐ वित्तंतो अइव मणहरो अत्थि। आयरियेहिं गज्जवज्जसंज्जुत्ताए कहाए विणोएण समं तत्तं पि अइवसरलाए भासाए कहिअं। तीए कहाए थोवं निदंसिअं। तस्स आसायगो वायओ तअं कहं पढिऊण अप्पाणं धम्मे भाविऊण अप्पणो भवब्भमणं सिढिलं करेज्जा।

जह किर तिलेषु तेल्लं, अहवा कुसुमम्मि होई सोरब्भं।
अण्णोण्णाणुगयं चिय, एवं चिय देहजीवाणं ।।१।।

जह देहम्मि सिणिद्धे, लग्गई रेणू अलक्खिओ चेव।
रागदोस सिणिद्धे जीवे कम्मं तहच्चेव ।।२।।

जह वच्चंते जीवे, वच्चइ देहं पि जत्थ सो जाइ।

तह मुत्तं पिव कम्मं, वच्चइ जीवस्स णिस्साए ॥३॥

जह मोरो उड्डीणो, वच्चइ घेत्तुं कलावपब्भारं।
तह वच्चइ जीवो वि, हु कम्मकलावेण परियरिओ ॥४॥

जह कोई इयर पुरिसो, रंधेऊण सयं ते भुंजे।
तह जीवो वि सयं चिय, काउं कम्मं सयं भुंजे ॥५॥

जह वित्थिण्णंमि सरे, गुंजावायाओ भमेज्ज दृढो।
तह संसारसमुद्दे, कम्माइद्धो भमइ जीवो ॥६॥

जह वच्चई को वि णरो, णीहरिउं जरधराउ णवयम्मि।
तह जीवो चइउण, जरदेहं जाइ देहम्मि ॥७॥

जह रयणं मयण सुगूहियं पिअंतोफुरंत-कंतिल्लं।
इय कम्मरासिगूढो, जीवो वि हु जाणए किंचि ॥८॥

जह जीवो लक्खसमूसियं पि, देहं जणेइ सज्जीवं।
पुण कुंथुदेह छूढो, तत्तियमेत्तेण संतुट्ठो ॥९॥

जह गयणयले पवणो, वच्चंतो णे य दीसई जणेण।
तह जीवो वि भमंतो, णयणेहिं ण घेप्पई भवम्मि ॥१०॥

जह किर घरम्मि दारेण, पविसमाणो णिरुंभइ वाअ।
इय जीवघरे रुंभसु, इंदियदाराइं पावस्स ॥११॥

जह डज्झइ तणकट्ठं, जालामालाउलेण जलणेण।

तह जीवस्स वि डज्झई, कम्मरयं झाणजोएण ।।११।।

बीयंकुराण व जहा, कारणकज्जाइं णेय णज्जंति।
इय जीवकम्मयाणं वि, सहभावोणंतकालम्मि ।।१२।।

जह धाउपत्थरम्मि, समउप्पण्णम्मि जलणजोएहिं।
डहिऊण पत्थरमलं, कीरइ निम्मलं कणयं ।।१३।।

तह जीव कम्मयाणं, अणाइकालम्मि झाणजोएण।
णिज्जरिय कम्मकिट्ठो, जीव अह कीरए विमलो ।।१४।।

जह विमलो चंदमणी, झरइ जलं चंदकिरणजोएण।
तह जीवो कम्ममलं, मुंचई लद्धूण सम्मत्तं ।।१५।।

जह सूरमणी जलणं, मुंचई सूरेण ताविओ संतो।
तह जीवो वि णाणं, पावइ तव सोसियप्पाणो ।।१६।।

जह पंकलेव-रहिओ, जलोवरिं ठाइ लाउओ सहसा।
तह सयलकम्ममुक्को, लोगग्गे ठाइ जीवो वि ।।१७।।






प्रकाशकम्
जगद्गुरु पू.आ.श्री
विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी-अहमदाबाद

Matiksha
M.: 9820715236